नाशयति। तत्सायंप्रातः प्रयुञ्जानोऽपापो भवति। य इदं गायत्रीहृदयं ब्राह्मणः प्रयतः पठेत् चत्वारो वेदा अधीता भवंति सर्वेषु तीर्थेषु स्नातो भवति सर्वैर्देवैर्ज्ञातो भवति सर्वप्रतिग्रहात्पूतो भवति अलेह्यलेहात्पूतो भवति अचोष्यचोषात्पूतो भवति सुरापानात्पूतो भवति सुवर्णस्तेयात्पूतो भवति पंक्तिभेदनात्पूतो भवति पतितसंभाषणात्पूतो भवति अनृतवचनात्पूतो भवति गुरुतल्पगमनात्पूतो भवति अगम्यागमनात्पूतो भवति वृषलीगमनात्पूतो भवति ब्रह्महत्यायाः पूतो भवति भ्रूणहत्यायाः पूतो भवति वीरहत्याः पूतो भवति अब्रह्मचारी सुब्रह्मचारी भवति अनेन हृदयाधीतेन क्रतुशतेनेष्टं भवति। षष्टिसहस्रं गायत्रीजपा भवंति। अष्टौ ब्राह्मणान्ग्राहयेत् अर्थ सिद्धिर्भवति य इदं गायत्रीहृदयं ब्राह्मणः प्रयतः पठेत्॥ सर्वपापैः प्रमुच्यते ब्रह्मलोके महीयते ब्रह्मलोके महीयते॥ इति गायत्र्युपनिषत् संपूर्णा॥ इति श्रीमन्त्रमहार्णवे मध्यखण्डे गायत्रीतंत्रे प्रथमस्तरङ्गः॥ १ ॥ ॥ ॥ ॥

श्रीगणेशाय नमः ॥ अथ श्रीदुर्गातंत्रप्रारंभः ॥ श्रीदेव्युवाच ॥ भगवन्सर्वतंत्रज्ञ साधकानां जयावह ॥ यत्पुरा सूचितं देव दुर्गापंचांगमुत्तमम् ॥ १ ॥ सर्वस्वं सर्वदेवानां रहस्यं सर्वमंत्रिणाम् ॥ तदद्य कृपया ब्रूहि यद्यस्ति मयि ते दया ॥ २ ॥ भैरव उवाच ॥ एतद्गुह्यतमं देवि पंचांगं तत्त्वलक्षणम् ॥ दुर्गायाः सारसर्वस्वं न कस्य कथितं मया ॥३॥ तव स्नेहात्प्रवक्ष्यामि दुर्गापंचांगमीश्वरि ॥ गुह्यं गोप्यतमं गुह्यं न देयं ब्रह्मवादिभिः॥४॥ या देवी दैत्यदमनी दुर्गेत्यष्टाक्षरात्मिका ॥ देवैराराधिता पूर्वं ब्रह्माच्युतपुरःसरैः ॥ ५ ॥ पुरंदरहितार्थाय वधार्थाय सुरद्विषाम्॥सैवं सृजति भूतानि राजसी परमेश्वरी ॥६॥ सात्त्विकी रक्षति प्रान्ते संहरिष्यति तामसी॥ इत्थं गुणत्रयीरूपा सृष्टिस्थितिलयात्मिका ॥ ७ ॥ अष्टाक्षरी महाविद्या संध्यातीता परात्मिका ॥ तस्याः पंचांगमधुना रहस्यं त्रिदिवौकसाम् ॥ ८ ॥ वक्ष्यामि परमप्रीत्या न चाख्येयं दुरात्मने ॥ अभक्ताय न दातव्यमित्याज्ञा पारमेश्वरी ॥ ९ ॥ अथ दुर्गानामप्राप्तिः (देवीरहस्यतंत्रे) "तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥ दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति" ॥१०॥(हिंगुलाद्रिखंडे उत्तरसंहितायाम्) आश्विने तु सिताष्टम्यां संगवे तु हतोऽसुरः ॥ तया देव्या महाविष्णोस्त्रैलोक्यसुखहेतवे ॥ ११ ॥ रुरुदैत्यस्य पुत्रो यो दुर्गसंज्ञोऽतितापदः ॥ तन्नाशकरणेनैव दुगानामाऽभवत्किल ॥ १२ ॥ तत्रादौ दुर्गापटलप्रारंभः ॥ दृष्ट्वा तंत्राण्यनेकानि पुराणानि विशेषतः ॥ जगन्मातुश्च दुर्गायाः पटलं कथयाम्यहम् ॥ १३ ॥ नामूलं लिख्यते किंचिदिह विज्ञेयमादरात् ॥ नैवात्र संशयः कार्य्यो नानाभेदविधानके ॥ १४ ॥ तंत्रांतरेष्वनेकानि विधानानि मुनीश्वरैः ॥ कथितानीह दुर्गायाः प्रसिद्धानि च संति वै ॥ १५ ॥ देशाद्देशाच्च तेषां वै संग्रहः क्रियते मया ॥ साधकानां हितार्थाय श्रीदुर्गायाः प्रसादतः ॥ १६ ॥ (देवीरहस्यतंत्रैकपंचाशत्तमे पटले) भैरव उवाच ॥ श्रीशैलराजशिखरे नानाद्रुमलताकुले ॥ वसंतलक्ष्मीनिलये समासीनमुमापतिम् ॥ १७ ॥ एकदा देवमीशानं शशिशेखरमुत्तमम् ॥ उमाश्रितार्धवपुषं देवदानवसेवितम् ॥ १८ ॥ ध्यानासक्ताक्षित्रितयं जटाजूटलतारुणम् ॥ भस्मांगरागधवलं नारायणनमस्कृतम् ॥ १९ ॥ ब्रह्मादिदेवप्रणतं गंधर्वजनवंदितम् ॥ यक्षराक्षसनागेन्द्रगन्धर्वकुल

पूजितम् ॥ २० ॥ भैरवं भैरवाकारं गिरीशं परमेश्वरम् ॥ उत्थाय विनता भूत्वा पर्यपृच्छत पार्वती ॥ २१ ॥ श्रीदेव्युवाच ॥ भगवन्सर्वलोकेश सर्वलोकनमस्कृत ॥ गुणातीत गणाध्यक्ष भूतेश्वर महेश्वर ॥ २२ ॥ सृजस्यवासि नित्यं त्वं संहरस्यखिलं जगत् ॥ चराचरं तत्त्वमेव किंपुनर्जपसि प्रभो ॥ २३ ॥ किं ध्यायसि महादेव सततं भक्तवत्सल ॥ वद शीघ्रं दयांभोधे यद्यहं प्रेयसी तव ॥ २४ ॥ ईश्वर उवाच ॥ देवि किं ते प्रवक्ष्यामि रहस्यमिदमद्भुतम् ॥ सर्वस्वं सारभूतं मे सर्वेषां तत्त्वमुत्तमम् ॥ २५ ॥ लक्षवारसहस्राणि वारितासि पुनः पुनः ॥ स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ॥ २६ ॥ अथ भक्त्या तव स्नेहाद्वक्ष्यामि परमाद्भुतम् ॥ देवीरहस्यतंत्रोक्तं तंत्रराजं महेश्वरि ॥ २७ ॥ सर्वागमैकमुकुटं सर्वसारमयं ध्रुवम् ॥ सर्वतंत्रमयं दिव्यं पटलं कथयाम्यहम् ॥ २८ ॥ अनुक्रमणिकां दिव्यां शृणु तंत्रस्य पार्वति ॥ यस्याः श्रवणमात्रेण कोटिपूजाफलं लभेत् ॥ २९ ॥ श्रीविद्यानिर्णयो देवि मंत्रसाधनकोऽपरः ॥ शिवमंत्रप्रकाशाख्यो दीक्षाविधिरनुत्तमः ॥ ३० ॥ पुरश्चर्याविधिर्देवि पंचरत्नेश्वरीक्रमः ॥ होमसाधनकश्चैव यंत्रपूजाविधिः परः ॥ ३१ ॥ आचारनिर्णयो देवि सर्वमेव प्रकाशितम् ॥ तत्रादौ देवि वक्ष्येऽहं दुर्गाभुवनमुत्तमम् ॥ ३२ ॥ अथ दुर्गाभुवनवर्णनम् ॥ जयं नाम महादिव्यं बहुविस्तारविस्तृतम् ॥ नानारत्नसमाकीर्णं सूर्यकोटिसमप्रभम् ॥ ३३ ॥ इन्द्रगोपकवर्णं च चन्द्रकोटिमनोहरम् ॥ अप्रमेयमसंख्येयमगम्यं सर्ववादिनाम् ॥ ३४ ॥ इदं दिव्यं जयं नाम भुवनं परमेश्वरि ॥ तत्रैव वसते दुर्गा नवरूपात्मिका परा ॥ ३५ ॥ या देवदेवी वरदा सर्वलोकैकसुंदरी ॥ या दुर्गेति स्मृता लोके ब्रह्मांडोदरवर्तिनी ॥ ३६ ॥ विष्णुना तपसा पूर्वमाराध्य परमेश्वरी ॥ महिषस्यासुरेन्द्रस्य वधार्थायावतारिता ॥ ३७ ॥ योगमाया महामाया सर्वदा परमेश्वरी ॥ तामेवाहर्निशं ध्याये श्रीविद्यां परमां जपे ॥ ३८ ॥ तामद्याहं प्रवक्ष्यामि विद्याच[illegible]णदायिनीम् ॥ यां श्रुत्वैव शिवो जातः पंचनादात्मकः शिवः ॥ ३९ ॥ यदा शुद्धारिहीना सा दुर्गा निष्कलरूपिणी ॥ साक्षाद्भुवनरूपापि महज्ज्योतिःस्वरूपिणी ॥ ४० ॥ तदाशवहकाले तु ज्योतीरूपे महेश्वरी ॥ शिवः प्रभामंडलतो निर्गतश्वेतनो विभुः ॥ ४१ ॥ अशृणोन्नादमाधारं


जगतां वीजमुत्तमम् ॥ अवमं सारमायां त्वं सृष्टोऽग्रे मनुनायकः ॥ ४२ ॥इति श्रुत्वा परानादं तारमित्युपदीर्यते ॥ शिवो जजाप सहसा
वीजं त्रिजगतां शिवे ॥ ४३ ॥ तेन मायेति शब्दं स शुश्राव गगनात्ततः ॥ इमं भज महेशान सदानंदालयं परम् ॥ ४४ ॥ बिंदुनाद
मयो देवः शिवोऽभूत्परमेश्वरः ॥ ततो नादं स शुश्राव दृष्टिकर्णविवर्जितम् ॥ ४५ ॥ दुर्गां भजेति स शिवः पंचनादात्मकोऽभवत् ॥
ततो जप्त्वा पराविद्यामसृजज्जगदंबिका ॥ ४६ ॥ आदौ वायुं शिवः सृष्ट्वा ततः सृष्टिं यथेच्छया ॥ इच्छामात्रं शिवे विश्वं विश्वेश्वरि
चराचरम् ॥ ४७ ॥ ससर्ज लवमात्रं स शितिकंठः शिवः शिवे ॥ इति मां गुप्तविद्यां तु लब्ध्वा गुरुपदार्चनात् ॥ ४८ ॥ किं किं
न साधयेल्लोके साधको मंत्रसाधकः ॥ वस्त्रं वाह्निं च कामं च धनं वृत्तं च साधकः ॥ ४९ ॥ वशीकुर्य्याद्यथाबुद्धि येन तुर्याकुलो
भवेत् ॥ श्रीचक्रमिदमाधारं देव्या विभवकारणम् ॥ ५० ॥ गह्वं सर्वस्वमंबायाः पूज्यं साधकसत्तमम् ॥ चक्रं लिखेन्महादेवि पूज्य
मब्जार्कयोर्दलैः ॥ ५१ ॥ येन देवी महामाया श्रीदुर्गाशु प्रसीदति ॥ चक्रेशं पजयेद्यस्तु नीलाभां दहतीं द्युतिम् ॥ ५२ ॥ ॥ वह्निंदु
सुर्यांबुरजं मंडलाकारमर्चयेत् ॥ लसन्मुकुटरोचिष्णुः स भवेत्साधकोत्तमः ॥ ५३ ॥ तस्य शंखनिभा कीर्तिर्भ्रमते भुवनत्रये ॥ ससु-
रासुरगंधर्वं वशं याति महेश्वरि ॥ ५४ ॥ शरासवरसानंदमयो भूत्वा जपेन्मनुम् ॥ खेटकास्तस्य तुष्यंति साधकस्यांगपूजनात् ॥
॥ ५५ ॥ तस्य रोगा विनश्यंति सर्वे शूलादयोऽचिरात् ॥ तर्जनीं तव वक्ष्यामि रिपवो यांति विद्रुताः ॥ ५६ ॥ तस्य गेहं धनं
गावो महिषा विष्टरं गजाः ॥ दुर्गा रत्नवती भूमिस्तस्य पीठं मनोहरम् ॥ ५७ ॥ साधकस्य भवेदेवं संपत्तिर्बहुधार्चनात् ॥ एवं ध्याये
न्महादेवीं दुर्गां दुर्गतिनाशिनीम् ॥ ५८ ॥ ध्यानेनानेन देवेन्द्रो भविष्यति हि साधकः ॥ इतीदं देवि तत्त्वं ते कथितं परमाद्भुतम् ॥
॥ ५९ ॥ अवक्तव्यमदातव्यं गोपनीयं स्वयोनिवत् ॥ ६० ॥ इति दुर्गाभुवनवर्णनम् ॥ ॥ अथ दुर्गाष्टाक्षरमंत्रप्रयोगः ॥ ॥२९४॥
(देवीरहस्यतंत्रे) नास्त्यांतरायबाहुल्यं नापि मित्रारिदूषणम् ॥ नो वा प्रयाससंयोगो नाचारयुगविप्लवः ॥ १ ॥ साक्षात्सिद्धिप्रदो मंत्रो
दुर्गायाः कलिनाशनः ॥ अष्टाक्षरोऽष्टसिद्धीशो गोपनीयो दिगंबरैः ॥ २ ॥ मंत्रो यथा—"ॐ ह्रीं दुं दुर्गायै नमः ।" इत्यष्टाक्षरो

मंत्रः ॥ अस्य विधानम् ॥ ॐ अस्य श्रीदुर्गाष्टाक्षरमंत्रस्य महेश्वर ऋषिः। श्रीदुर्गाष्टाक्षरात्मिका देवता। दुं बीजम्। ह्रीं शक्तिः ॥ ॐ कीलकाय नम इति दिग्बंधः। धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥ ॐ महेश्वरऋषये नमः शिरसि ॥ १ ॥ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ श्रीदुर्गाष्टाक्षरात्मिकादेवतायै नमो हृदि ॥ ३ ॥ दुं बीजाय नमो नाभौ ॥ ४ ॥ ह्रीं शक्तये नमो गह्ये ॥ ५ ॥ ॐ कीलकाय नमः पादयोः ॥ ६ ॥ नमो दिग्बंधः इति सर्वाङ्गे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ ह्रां हृदयाय नमः ॥ १ ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॥ २ ॥ ॐ ह्रूं शिखायै वषट् ॥ ३ ॥ ॐ ह्रैं कवचाय हुम् ॥ ४ ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ ॐ नमः शिरसि ॥ १ ॥ ॐ ह्रीं नमो मुखे ॥ २ ॥ ॐ दुं नमो वक्षसि ॥ ३ ॥ ॐ गां नमो नाभौ ॥४॥ ॐ यैं नमः पृष्ठे ॥ ५ ॥ ॐ नं नमो जान्वोः ॥ ६ ॥ ॐ मः नमः पादयोः ॥ ७ ॥ इति वर्णन्यासः ॥ ॐ ॐ आत्मतत्त्वाय नमः शिरसि ॥ १ ॥ ॐ ह्रीं विद्यातत्त्वाय नमो मुखे ॥२॥ ॐ दुं शिवतत्त्वाय नमो हृदि ॥ ३ ॥ ॐ गुरुतत्त्वाय नमो नाभौ ॥ ४ ॥ ॐ ह्रीं शक्तितत्त्वाय नमः जंघयोः ॥ ५ ॥ ॐ दुं शिवशक्तितत्त्वाय नमः पादयोः ॥ ६ ॥ इति तत्त्वन्यासः ॥ ॐ अँआँ कँ खँगँघँङँइँईँ हृदयाय नमः ॥ १ ॥ ॐ ह्रीं उँऊँचँछँजँझँञँऋँॠँ शिरसे स्वाहा ॥ २ ॥ ॐ दुं लृँटँठँडँढँणँॡँ शिखायै वषट् ॥ ३ ॥ ॐ गां एं तंथंदंधंनं ऐं कवचाय हुम् ॥ ४ ॥ ॐ यैं ओं पंफंबंभंमं औं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ नमः अंयंरंलंवंशंषंसंहंळंक्षंअः अस्त्राय फट् ॥६॥ इति शुद्धमातृकान्यासः ॥ एवं करन्यासं कुर्यात् ॥ ततः पद्धतिमार्गेण देवीकलामातृका विन्यस्य पूर्वोक्तषडंगं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ दूर्वानिभां त्रिनयनां विलसत्किरीटां शंखाब्जखड्गशरखेटकशूलचापान् ॥ संतर्जनीं च दधतीं महिषासनस्थां दुर्गां नवारकुलपीठगतां भजेऽहम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य ततः सर्वतोभद्रमंडले पीठपूजां विधाय मंडूकादिपीठदेवताः

पद्धतिमार्गेण संस्थाप्य नवपीठशक्तीः पूजयेत् ॥ तद्यथा—ॐ प्रभायै नमः ॥ १ ॥ ॐ मायायै नमः ॥ २ ॥ ॐ जयायै नमः ॥ ३ ॥ ॐ सूक्ष्मायै नमः ॥ ४ ॥ ॐ विशुद्धायै नमः ॥ ५ ॥ ॐ नंदिन्यै नमः ॥ ६ ॥ ॐ सुप्रभायै नमः ॥ ७ ॥ ॐ विजयायै नमः ॥ ८ ॥ ॐ सर्वसिद्धिदायै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रपत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य तस्योपरि श्रीचक्रं चतुर्द्वारं त्रिवृत्तमष्टदलं वृत्तं षडस्रं त्रिकोणं बिंद्वात्मकयंत्रमष्टगंधेन विलिख्य ॐ ह्रीं वज्रनखदंष्ट्रायुधाय महासिंहाय फट् ॥ इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पुनर्ध्यात्वावाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञया आवरणपूजां कुर्यात् ॥ तद्यथा—पुष्पांजलिमादाय ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि मे दुर्गे परिवारार्चनाय ते ॥ १ ॥ ॐ ह्रीं दुं सर्वसिद्धिप्रदाय श्रीचक्राय नमः ॥ इति पुष्पांजलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत ॥ तद्यथा—भूपुराभ्यंतरे पूर्वादिचतुर्दिक्षु ॐ ह्रीं दुं गं गणेशाय नमः गणेशश्रीपादुकां पूजयामि तर्पयामि नमः इति सर्वत्र ॥ १ ॥ ॐ ह्रौं कुमाराय नमः कुमारश्रीपा० ॥ २ ॥ ॐ प्रीं पुष्पदंताय नमः पुष्पदंतश्रीपा० ॥ ३ ॥ ॐ वैं विकर्तनाय नमः विकर्तनश्रीपा० ॥ ४ ॥ इति द्वारपालान् संपूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य ॥ ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदले पूज्यपूजकयोरंतराले प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण वामावर्तेन च ॐ ब्राह्म्यै नमः ब्राह्मीश्री० ॥१॥ ॐ नारायण्यै नमः नारायणीश्री० ॥२॥ ॐ चामुंडायै नमः चामुण्डाश्री० ॥३॥ ॐ अपराजितायै नमः अपराजिताश्री० ॥४॥ ॐ माहेश्वर्यै नमः माहेश्वरीश्री० ॥५॥ ॐ कौमार्यै नमः कौमारीश्री० ॥ ६ ॥ ॐ वाराह्यै नमः वाराहीश्री० ॥ ७ ॥ ॐ नारसिंह्यै नमः । नारसिंहीश्री० ॥ ८ ॥ इत्यष्टौ संपूज्य पुष्पांजलिमादाय मूलमुच्चार्य "अभीष्टसि०" ॐ ह्रीं दुं सर्वाशापूरकाय श्रीचक्राय नमः॥इति पुष्पांजलिं दद्यात्॥इति द्वितीयावरणम्॥२॥

ततोऽष्टदलाग्रेषु प्राचीक्रमेण वामावर्तेन च। ॐ असितांगभैरवाय नमः। असितांगभैरवश्री० ॥ १ ॥ ॐ रुरुभैरवाय नमः। रुरुभैरवश्री० ॥ २ ॥ ॐ चंडभैरवाय नमः। चंडभैरवश्री० ॥३॥ ॐ क्रोधभैरवाय नमः। क्रोधभैरवश्री० ॥ ४ ॥ ॐ उन्मत्तभैरवाय नमः। उन्मत्तभैरवश्री० ॥ ५ ॥ ॐ कपालभैरवाय नमः। कपालभैरवश्री० ॥ ६ ॥ ॐ भीषणभैरवाय नमः। भीषणभैरवश्री० ॥ ७ ॥ ॐ संहारभैरवाय नमः। संहारभैरवश्रीपा० ॥ ८ ॥ इत्यष्टौ भैरवान्पूजयित्वा पूर्वोक्तं पुष्पांजलिं च दद्यात्। इति तृतीयावरणम् ॥ ३ ॥ ततः नवकोणे देव्यग्निकोणमारभ्य वामावर्तेन च। ॐ शैलपुत्र्यै नमः। शैलपुत्रीश्रीपा० ॥ १ ॥ ॐ ब्रह्मचारिण्यै नमः। ब्रह्मचारिणीश्रीपा० ॥ २ ॥ ॐ चंडघंटायै नमः। चंडघंटाश्रीपा० ॥ ॥ ३ ॥ ॐ कूष्माण्डायै नमः। कूष्मांडाश्री० ॥ ४ ॥ ॐ स्कंदमात्रे नमः। स्कंदमातृश्री० ॥ ५ ॥ ॐ कात्यायन्यै नमः। कात्यायनीश्रीपा० ॥ ६ ॥ ॐ कालरात्र्यै नमः। कालरात्रिश्रीपा० ॥ ७ ॥ ॐ महागौर्यै नमः। महागौरीश्री० ॥ ८ ॥ ॐ सिद्धिदायै नमः। सिद्धिदाश्रीपा० ॥ ९ ॥ इति संपूज्य[१] ‘अभीष्ट०’ ॐ ह्रीं दुं अष्टसिद्धिदाय श्रीचक्राय नमः॥ इति दूर्वा

अथ दुर्गायन्त्रपूजनम्।



१ पाठांतरे-देवदूत्यै नमः इति पूजयेत्।

दलांजलिं च दद्यात् ॥ इति चतुर्थावरणम् ॥४॥ ततो वृत्ते पूर्वादिक्रमेण वामावर्तेन च ॥ ॐ अंबिकायै नमः अंबिकाश्रीपादुकां पूजयामि तर्पयामि नमः॥१॥ॐ अष्टाक्षरायै नमः अष्टाक्षराश्रीपा०॥२॥ॐ अष्टभुजायै नमः अष्टभुजाश्री०॥३॥ॐ नीलकंठायै नमः नीलकंठाश्रीपा० ॥४॥ ॐ जगदंबिकायै नमः जगदंबिकाश्री० ॥५॥ इति संपूज्य पुष्पांजलिं च दद्यात् ॥ इति पंचमावरणम् ॥५॥ ततो वृत्ते प्राचीक्रमेण वामावर्तेन च। ॐ शंखाय नमः ॥ १ ॥ ॐ पद्मायनमः ॥ २ ॥ ॐ खड्गाय नमः ॥ ३ ॥ ॐ बाणेभ्यो नमः ॥ ४ ॥ ॐ धनुषे नमः ॥ ५ ॥ ॐ खेटकाय नमः ॥ ६ ॥ ॐ शूलाय नमः ॥ ७ ॥ ॐ तर्जन्यै नमः ॥ ८ ॥ इत्यस्त्राणि संपूज्य पुष्पांजलिं च दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुरे पूर्वादिक्रमेण । ॐ लं इन्द्राय नमः ॥ १ ॥ ॐ रं अग्नये नमः ॥ २ ॥ ॐ मं यमाय नमः ॥ ३ ॥ ॐ क्षं निर्ऋतये नमः ॥ ४ ॥ ॐ वं वरुणाय नमः ॥ ५ ॥ ॐ यं वायवे नमः ॥ ६ ॥ ॐ कुं कुबेराय नमः ॥ ७ ॥ ॐ हं ईशानाय नमः ॥ ८ ॥ ॐ आं ब्रह्मणे नमः ॥ ९ ॥ ॐ ह्रीं अनंताय नमः ॥ १० ॥ तद्बाह्ये इन्द्रादिसमीपे ॐ वं वज्राय नमः ॥ १ ॥ ॐ शं शक्तये नमः ॥ २ ॥ ॐ दं दंडाय नमः ॥ ३ ॥ ॐ खं खड्गाय नमः ॥ ४ ॥ ॐ पां पाशाय नमः ॥ ५ ॥ ॐ अं अंकुशाय नमः ॥ ६ ॥ ॐ गं गदायै नमः ॥ ७ ॥ ॐ त्रिं त्रिशूलाय नमः ॥ ८ ॥ ॐ पं पद्माय नमः ॥ ९ ॥ ॐ चं चक्राय नमः ॥ १० ॥ इति इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं च दद्यात् । इति सप्तमावरणम् ॥७॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य षडंगं कृत्वा पुनर्ध्यात्वा देव्यग्रे मालामादाय जपं कुर्यात् । अस्य पुरश्चरणमष्टलक्षं चतुर्लक्षं वा एकलक्षं वा कुर्यात् ॥ तत्तद्दशांशहोमतर्पणमार्जनब्राह्मणभोजनं च कुर्यात । एवं कृते मन्त्रः सिद्धो भवति सिद्धे च मंत्रे मंत्री प्रयोगान् स[illegible] । तथा च–महाचीनक्रमस्थानां साधकानां जयावहः ॥ मन्त्रराजो महादेवि सद्यो भोगापवर्गदः ॥ १ ॥ वर्णलक्षं पुरश्चर्या तदर्धं वा महेश्वरि ॥ एकलक्षावधिं कुर्यान्नातो न्यूनं कदाचन ॥ २ ॥ यं विधाय कलौ मंत्री भवेत्कल्पद्रुमोपमः ॥ ततो मंत्रं जपेन्नित्यं दुर्गाया अष्टसिद्धिदम् ॥ ३ ॥ यं जप्त्वा साधको भूमौ विचरेद्भैरवो यथा ॥ स्तंभनं मोहनं चैव

मारणाकर्षणे ततः ॥ ४ ॥ वशीकारं तथोच्चाटं शांतिकं पौष्टिकं तथा ॥ एषां साधनमाचक्षे प्रयोगानां महेश्वरि ॥ ५ ॥ महाचीनक्रमस्थानां साधकानां हिताय च ॥ अयुतं तु जपेन्मूलं श्मशाने निशि साधकः ॥ ६ ॥ हुनेद्दशांशतः सर्पिर्यवान्मांसान्मृगच्युतान् ॥ स्तंभनं जायते क्षिप्रं वादिकामिजनांभसाम् ॥ ७ ॥ अयुतं प्रजपेद्देवि वटे रुद्राक्षमालया ॥ होमो दशांशतः कार्यो घृतपद्माक्षपंकजैः ॥ ८ ॥ आरग्वधैः स्वधामूलैर्मोहनं जायते क्षणात् ॥ देवानां दानवानां च का कथाऽल्पधियां नृणाम् ॥ ९ ॥ अयुतं प्रजपेन्मूलं वने साधकसत्तमः ॥ वेतसीमूलगो वापि हुनेत्तत्र दशांशतः ॥ १० ॥ घृतपायसशंबूकान् रिपुर्मृत्युमुखं व्रजेत् ॥ अयुतं प्रजपेद्रात्रौ शून्यागारे कुलेश्वरि ॥११॥ होमो दशांशतः कार्यो घृतव्योषधिजीरकैः ॥ कपिबीजैरपि प्रातर्भवेदाकर्षणं स्त्रियाः ॥ १२ ॥ अयुतं प्रजपेन्मूलं चत्वरे त्वरितं हुनेत् ॥ आज्याब्जेक्षुरसाखंडरक्तपुष्पाणि पार्वति ॥ १३ ॥ शक्रोऽपि वशतामेति किं पुनः क्षुद्रभूमिपः ॥ अयुतं प्रजपेन्मूलं साधकोऽश्वत्थमूलके ॥ १४ ॥ हुनेदाज्यं दशांशेन केशान् स्त्रीणां त्वचः कणान् ॥ रिपुमुच्चाटयेच्छीघ्रं यदि शक्रसमो भवेत् ॥ १५ ॥ अयुतं प्रजपेन्मूलं सुरद्रुमतले हुनेत् ॥ घृतांडकुक्कुटांगानि नानापुष्पाणि पृच्छकः ॥ १६ ॥ रोगोपद्रवकालस्य सद्यः शांतिर्भविष्यति ॥ अयुतं प्रजपेन्मूलं लीलोपवनमंडले ॥ १७ ॥ होमो दशांशतः कार्यो घृतमीनाज्यमस्तकैः ॥ पादैरष्टभिरीशानि सद्यः पुष्टिः प्रजायते ॥ १८ ॥ (शारदातिलके) राजा विजयते शत्रून् साधको विजयश्रियम् ॥ प्राप्नोति रोगी दीर्घायुः सर्वव्याधिविवर्जितः ॥ १९ ॥ वंध्याभिषिक्ता विधिना लभते तनयं वरम् ॥ मंत्रेणानेन संजप्तमाज्यं क्षुद्रज्वरापहम् ॥ २० ॥ गर्भिणीनां विशेषेण अप्तं भस्मादिकं ततः ॥ २१ ॥ इति श्रीदेवीरहस्यतंत्रे श्रीदुर्गाष्टाक्षरमंत्रप्रयोगः ॥

॥ श्रीगणेशाय नमः ॥ अथ श्रीचंडिकामालामंत्रप्रयोगः ॥ (उक्तं चाथर्वणागमसंहितायाम्) मंत्रो यथा—"ॐ ह्रः ॐ सौं ॐ ह्रौं ॐ श्रीं ह्रीं क्लीं श्रीजयजय चंडिका चामुंडे चंडिके त्रिदशमुकुटकोटिसंघट्टितचरणारविंदे गायत्रि सावित्रि सरस्वति अहिकृताभरणे भैरवरूपधारिणि प्रकटितदंष्ट्रोग्रवदने घोराननयने ज्वलज्ज्वालासहस्रपरिवृते महाट्टहासधवलीकृतदिगंतरे सर्वयुगपरिपूर्णे कपालहस्ते

गजाजिनोत्तरीयभूतवेतालपरिवृते अकंपितधराधरे मधुकैटभमहिषासुरधूम्रलोचनचंडमुंडरक्तबीजशुंभनिशुंभदैत्यनिकृंते कालरात्रि महामाये शिवे नित्ये ॐ ऐं ह्रीं ऐंद्रि आग्नेयि याम्ये नैर्ऋति वारुणि वायवि कौबेरि ऐशानि ब्रह्मविष्णुशिवस्थिते त्रिभुवनधराधरे वामे ज्येष्ठे रौद्रि अंबिके ब्राह्मीमाहेश्वरी कौमारी वैष्णवी वाराहींद्राणी ईशानी महालक्ष्मीः इति स्थिते महोग्रविषमहाविषोरगफणामणिमुकुटरत्नमहाज्वालामलमणिमहाहिहारबाहुकहोत्तमांगनवरत्ननिधिकोटितत्त्वबाहुजिह्वावाणीशब्दस्पर्शरूपरसगंधात्मिके क्षितिसाहसमध्यस्थिते महोज्ज्वलमहाविषोपविषगंधर्वविद्याधराधिपते ॐ ऐंकारा ॐ ह्रींकारा ॐ क्लींकारा हस्ते ॐ आँह्रींक्रौंअनग्नेनग्नेपाते प्रवेशय २ ॐ द्रां द्रीं शोषय २ ॐ द्रांद्रीं मोहय २ ॐ क्लांक्लींदीपय २ ॐ ब्लूंब्लूंसंतापय २ ॐ सौंसौंउन्मादय २ ॐ म्लैंम्लैंमोहय २ ॐ खाँखाँशोधय २ ॐ घाँघाँउन्मादय २ ॐ ह्रीह्रींआवेशय२ॐ स्त्रींस्त्रींउच्छादय२ॐ स्त्रींस्त्रींआकर्षय २ ॐ हुंहुंआस्फोटय २ ॐ त्रूंत्रूंत्रोटय२ ॐ छाँछाँछेदय२ ॐ कूँकूँउच्चाटय २ ॐ हूँहूँहन २ ॐ ह्राँह्राँमारय २ ॐ घ्रींघ्रींघर्षय २ ॐ स्वींस्वींविध्वंसय २ ॐ प्लूँप्लूँप्लावय २ ॐ भ्रांभ्रांभ्रामय २ ॐ भ्रांभ्रांदर्शय २ ॐ दांदांदिशांबंधय २ ॐ दींदींवर्तिनामेकाग्रचित्ताविशिकुरुतेंगये ॐ ह्राँह्रींहूँह्रैंह्रौंह्रः ॐ फ्राँ फ्रीं फ्रूँ फ्रैं फ्रौं फ्रः ॐ चामुंडायै विच्चे स्वाहा मम सकलमनोरथं देहि सर्वोपद्रवं निवारय २ अमुकं वशे कुरु २ भूतप्रेतपिशाचब्रह्मपिशाचब्रह्मराक्षसयक्षयमदूतशाकिनीडाकिनीसर्ववश्यापदतस्करादिकं नाशय २ मारय २ भंजय २ ॐ ह्रींश्रींक्लींस्वाहा" । इति मालामंत्रः

अस्य विधानम् । ॐ अस्य श्रीचंडिकामालामंत्रस्य मार्कंडेय ऋषिः । अनुष्टुप् छंदः । श्रीचंडिका देवता । ॐ ह्रः बीजम् । ॐ सौं शक्तिः । ॐ कीलकम् । मम श्रीचंडिकाप्रसादसिद्ध्यर्थं सकलजनवश्यार्थं श्रीचंडिकामालामंत्रजपे विनियोगः ॥ ॐ मार्कंडेयऋषये नमः शिरसि ॥ १ ॥ ॐ अनुष्टुप्छंदसे नमः मुखे ॥ २ ॥ ॐ श्रीचंडिकादेवतायै नमः हृदि ॥ ३ ॥ ॐ ह्रः बीजाय नमः गुह्ये ॥ ४ ॥ ॐ सौं शक्तये नमः पादयोः ॥ ५ ॥ ॐ ह्रौं कीलकाय नमः नाभौ ॥ ६ ॥ ॐ विनियोगाय नमः सर्वाङ्गे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्राँ फां अंगुष्ठाभ्यां नमः ॥ १ ॥ ॐ ह्रीं फीं तर्जनीभ्यां नमः ॥ २ ॥ ॐ ह्रूँ फूँ मध्यमाभ्यां नमः ॥ ३ ॥ ॐ ह्रैं फैं

अनामिकाभ्यां नमः ॥ ४ ॥ ॐ ह्रौं फौं कनिष्ठिकाभ्यां नमः ॥ ५ ॥ ॐ ह्रः फः करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ ॐ ह्रांफां हृदयाय नमः ॥ १ ॥ ॐ ह्रींफीं शिरसे स्वाहा ॥ २ ॥ ॐ ह्रूंफूं शिखायै वषट् ॥ ३ ॥ ॐ ह्रैं फैं कवचाय हुं ॥ ४ ॥ ॐ ह्रौंफौं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ह्रः फः अस्त्राय फट् ॥ ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् । ॐ कल्याणीं कमलासनस्थशुभदां गौरीं घनश्यामलामाविर्भावितभूषणामभयदामार्द्रैंकरक्षैः शुभैः ॥ श्रींह्रींक्लींवरमंत्रराजसहितामानंदपूर्णात्मिकां श्रीशैले भ्रमरांबिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥१॥ इति ध्यात्वा मानसोपचारैः संपूज्य सुवासिन्याः कुमार्याः पूजां कृत्वा पश्चाज्जपं कुर्य्यात् । अस्य पुरश्चरणं नित्यमेकविंशत्यधिकशतम् ॥१२१॥ जपेन स्त्री पुरुषो वा वश्यो भवति । तथा च–एकविंशत्यधिकशतजाप्येन वशमानयेत् ॥ स्त्री वापि पुरुषो वापि सत्यं सत्यं न संशयः ॥ १ ॥ राजद्वारे श्मशाने च विवादे शत्रुसंकटे ॥ शत्रोरुच्चाटने चैव सर्वकार्याणि साधयेत् ॥ इत्यथर्वणागमसंहितोक्तश्रीचंडिकामालामंत्रविधानम् ॥ अथ नवार्णमंत्रप्रयोगः ॥ ऋषिरुवाच ॥ परिपृच्छसि राजेन्द्र चंडिकापूजनादि यत् ॥ तदहं ते प्रवक्ष्यामि यथावदनुपूर्वशः ॥१॥ त्रैलोक्यडामरं मंत्रं शृणु भूप नवाक्षरम् ॥ येन विज्ञानमात्रेण परमैश्वर्यवान् भवेत् ॥ २ ॥ अनेनास्य सिद्धादिविचारो नास्तीति सूचितम् ॥ मंत्रो यथा—"ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे" इति नवाक्षरो मंत्रः ॥ अस्य विधानम् ॥ ॐ अस्य श्रीनवार्णमंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । गायत्र्युष्णिगनुष्टुभश्छंदांसि । महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । नंदजाशाकंभरीभीमाः शक्तयः । रक्तदंतिकादुर्गाभ्रामर्यो बीजानि । ह्रीं कीलकम् । अग्निवायुसूर्यास्तत्त्वानि । कार्यनिर्देशे जपे विनियोगः ॥ ॐ ब्रह्मविष्णुमहेश्वरऋषिभ्यो नमः शिरसि ॥ १ ॥ गायत्र्युष्णिगनुष्टुप्छंदोभ्यो नमः मुखे ॥ २ ॥ महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः हृदि ॥ ३ ॥ नंदजा

१—ऐं बीजमादीन्दुखमानदीप्तिं ह्रीं सूर्यतेजोद्युतिमद्द्वितीयम् ॥ क्लीं मूर्तिवैश्वानरतुल्यरूपं तृतीयमानंत्यसुखाय चिंत्यम् ॥ विशुद्धजांबूनदकांति तुर्यं मुंपञ्चमं रक्ततरं प्रकल्प्य ॥ डाषष्ठमुग्रार्तिहरं सुनीलं यै सप्तमं कृष्णतरं रिपुघ्नम् ॥ वि पांडुरं चाष्टममादिसिद्धिं च्चे धूम्रवर्णं नवमं विशालम् ॥ एतानि बीजानि नवात्मकस्य जप्तुः प्रदद्युः सकलार्थसिद्धिम् ॥ इति मंत्रोद्धारः ॥


शाकंभरीभीमाशक्तिभ्यो नमः दक्षिणस्तने ॥ ४ ॥ रक्तदंतिकादुर्गाभ्रामरीबीजेभ्यो नमः वामस्तने ॥५॥ ह्रीं कीलकाय नमः नाभौ ॥६॥ अग्निवायुसूर्यतत्त्वेभ्यो नमः हृदि ॥ ७ ॥ विनियोगाय नमः सर्वाङ्गे ॥८॥ इति ऋष्यादिन्यासः ॥ एवमृष्यादिकं विन्यस्यैकादश न्यासान् कुर्यात् ॥ तद्यथा—ॐ ऐंअंआंकंखंगंघंङंइंईं हृदयाय नमः ॥ १ ॥ ॐ ह्रीं उंऊंचंछंजंझंञंऋंॠं शिरसे स्वाहा ॥ २ ॥ ॐ क्लीं ऌंटंठंडंढंणंॡं शिखायै वषट् ॥ ३ ॥ ॐ चामुण्डा एंतंथंदंधंनंऐंकवचाय हुं ॥ ४ ॥ ॐ यैंओंपंफंबंभंमंऔं नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ विच्चे अंयंरंलंवंशंषंसंहंळंक्षंअः अस्त्राय फट् ॥ इति मातृकान्यासः प्रथमः ॥ १ ॥ ॐ ऐंह्रीं क्लीं नमः कनिष्ठयोः ॥ १ ॥ ॐ ह्रीं क्लीं नमः अनामिकयोः ॥ २ ॥ ॐ ऐं ह्रीं क्लीं नमः मध्यमयोः ॥ ३ ॥ ॐ ऐं ह्रीं क्लीं नमः तर्जन्योः ॥ ४ ॥ ॐ ऐंह्रींक्लीं नमः अंगुष्ठयोः ॥ ५ ॥ ॐ ऐंह्रींक्लीं नमः करतलकरपृष्ठयोः ॥ ६ ॥ ॐ ऐंह्रींक्लीं नमः पृष्ठे ॥ ७ ॥ ॐ ऐंह्रींक्लींनमः मणिबंधे ॥ ८ ॥ ॐ ऐंह्रींक्लीं नमः कूर्परे ॥ ९ ॥ ॐ ऐंह्रींक्लीं नमः हृदये ॥ १० ॥ ॐऐंह्रींक्लीं नमः शिरसि ॥ ११ ॥ ॐ ऐंह्रींक्लीं नमः शिखायाम् ॥ १२ ॥ ॐ ऐंह्रींक्लीं नमः कवचे ॥ १३ ॥ ॐ ऐं ह्रींक्लीं नमः नेत्रत्रये ॥ १४ ॥ ॐऐंह्रींक्लीं नमः अस्त्रे ॥ १५ ॥ इति सारस्वतन्यासो द्वितीयः ॥ २ ॥ ॐ ह्रीं ब्राह्मी पूर्वतो मां पातु ॥ १ ॥ ॐ ह्रीं माहेश्वरी आग्नेये मां पातु ॥ २ ॥ ॐ ह्रीं कौमारी दक्षिणे मां पातु ॥ ३ ॥ ॐ ह्रीं वैष्णवी नैर्ऋत्ये मां पातु ॥ ४ ॥ ॐ ह्रीं वाराही पश्चिमे मां पातुः ॥ ५ ॥ ॐ ह्रीं इंद्राणी वायव्ये मां पातु ॥ ६ ॥ ॐ ह्रीं चामुंडा उत्तरे मां पातु ॥ ७ ॥ ॐ ह्रीं महालक्ष्मीः ऐशान्ये मां पातु ॥ ८ ॥ ॐ ह्रीं व्योमेश्वरी ऊर्ध्वं मां पातु ॥ ९ ॥ ॐ ह्रीं सप्तद्वीपेश्वरी भूमौ मां पातु ॥ १० ॥ ॐ ह्रीं कामेश्वरी पाताले मां पातु ॥ ११ ॥ इति मातृगणन्यासस्तृतीयः ॥ ३ ॥ ॐ नंदजायै कमलांकुशमंडितायै नमः पूर्वांगे मां पातु ॥ १ ॥ ॐ रक्तदंतिकायै खड्गपात्रहस्तायै नमः दक्षिणांगे मां पातु ॥ २ ॥ ॐ शाकंभर्य्यै पुष्पपल्लवसंयुतायै नमः पृष्ठे मां पातु ॥ ३ ॥ ॐ


१—प्रथमं मातृकान्यासः कार्यः पूर्वोक्तमार्गतः । कृतेन येन देवस्य सारूप्यं याति मानवः ॥ २—अस्मिन्सारस्वते न्यासे कृते जाड्यं विनश्यति ॥ ३—तृतीयेऽस्मिन्कृते न्यासे त्रैलोक्यविजयी भवेत् ॥

दुर्गायै धनुर्बाणहस्तायै नमः वामांगे मां पातु ॥ ४ ॥ ॐ भीमायै शिरःपात्रकरायै नमः मस्तकादिचरणांतं मां पातु ॥ ५ ॥ ॐ भ्रामर्यै चित्रकांत्यै नमः पादादिमस्तकांतं मां पातु ॥ ६ ॥ इति नंदजादिन्यासश्चतुर्थः ॥ ४ ॥ ॐ ब्रह्मणे नमः पादादिनाभिपर्यंतं सदा मां पातु ॥ १ ॥ ॐ जनार्दनाय नमः नाभेः विशुद्धिपर्यंतं मां पातु नित्यम् ॥ २ ॥ ॐ रुद्राय त्रिलोचनाय नमः विशुद्धेर्ब्रह्मरंध्रांतं सदा मां पातु ॥ ३ ॥ ॐ हंसाय नमः पादयोः मां पातु ॥ ४ ॥ ॐ गरुडाय नमः करयोः मां पातु ॥ ५ ॥ ॐ वृषभाय नमः नेत्रयोः मां पातु ॥ ६ ॥ ॐ गजाननाय नमः सर्वांगे मां पातु ॥ ७ ॥ ॐ आनंदमयपरमात्मने नमः परापरदेहभागे मां पातु ॥ ८ ॥ इति ब्रह्माख्यन्यासः पंचमः ॥ ५ ॥ ॐ महालक्ष्म्यै अष्टादशभुजायै नमः मध्ये मां पातु ॥ १ ॥ ॐ सरस्वत्यै अष्टादशभुजायै नमः ऊर्ध्वं मां पातु ॥ २ ॥ ॐ महाकाल्यै दशभुजायै नमः अधः मां पातु ॥ ३ ॥ ॐ सिंहाय नमः हस्तयोः मां पातु ॥ ४ ॥ ॐ हंसाय नमः नेत्रयोः मां पातु ॥ ५ ॥ ॐ यमाय महिषवाहनाय नमः पादयोः मां पातु ॥ ६ ॥ ॐ महेशचंडिकाभ्यां नमः सर्वाङ्गे मां पातु ॥ ७ ॥ ॐ महेशचंडिकाभ्यां नमः पृष्ठे मां पातु ॥ ८ ॥ इति महालक्ष्म्यादिन्यासः षष्ठः ॥ ६ ॥ ॐ ऐं नमः ब्रह्मरंध्रे ॥ १ ॥ ॐ ह्रीं नमः दक्षिणनेत्रे ॥ २ ॥ ॐ क्लीं नमः वामनेत्रे ॥ ३ ॥ ॐ चां नमः दक्षिणकर्णे ॥ ४ ॥ ॐ मुं नमः वामकर्णे ॥ ५ ॥ ॐ डां नमः दक्षिणनासापुटे ॥ ६ ॥ ॐ यैं नमः वामनासापुटे ॥ ७ ॥ ॐ विं नमः मुखे ॥ ८ ॥ ॐ च्चें नमः पायौ ॥ ९ ॥ इति मंत्रवर्णन्यासः सप्तमः ॥ ७ ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे पादादि ब्रह्मरंध्रांतम् । इत्यष्टवारं न्यसेत् ॥ इति देवीन्यासोऽष्टमः ॥ ८ ॥ ॐ ऐंह्रींक्लींचामुंडायै विच्चे नमः मस्तकादिपादांतम् । इत्यष्टवारं न्यसेत् ॥ १ ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे नमः पादादिमस्तकांतम् । इत्यष्टवारं न्यसेत् ॥ २ ॥ ॐ ऐंह्रीक्लीं चामुंडायै विच्चे नमः पूर्वे । इत्यष्टवारं

१–तुर्यन्यासं नरः कुर्याज्जरामृत्यू व्यपोहति ॥ २–कृतेऽस्मिन्पञ्चमे न्यासे सर्वान्कामानवाप्नुयात् ॥ ३–षष्ठे च विहिते न्यासे सद्गतिं प्राप्नुयान्नरः ॥–४ विन्यस्ते सप्तमे न्यासे द्रुतं रोगक्षयो भवेत् ॥ ५–कृतेऽस्मिन्नष्टमे न्यासे सर्वं दुःखं विनश्यति ॥

दुर्गानवार्णमन्त्रयन्त्रम् ।





न्यसेत् ॥ ३ ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे नमः दक्षभागे ॥ इत्यष्टवारं न्यसेत् ॥४॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे नमः पृष्ठे ॥ इत्यष्टवारं न्यसेत् ॥ ५॥ इति मंत्रव्यापको न्यासो नवमः ॥ ९ ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे हृदयाय नमः ॥ १० ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे शिरसे स्वाहा ॥ २ ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे शिखायै वषट् ॥ ३ ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे कवचाय हुं ॥ ४ ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ऐंह्रींक्लीं चामुंडायै विच्चे अस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासो दशमः ॥ १० ॥ ॐ ऐं खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥ १ ॥ सौम्यासौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ परा पराणां परमा त्वमेव परमेश्वरी ॥ २ ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे मया ॥ ३ ॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ ४ ॥ विष्णुः शरीरग्रहणमहमीशान एव च ॥ कारितास्ते यतोऽतस्त्वां कस्तोतुं शक्तिमान्भवेत् ॥५॥ इति सर्वांगे न्यसेत् ॥ ॥ १ ॥ ॐ ह्रीं शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घंटास्वनेन नः पाहि चापज्यानिस्वनेन च ॥ १ ॥ प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे ॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भुवम् ॥ ३ ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेंऽबिके ॥ करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः ॥४॥ इति सर्वतो न्यसेत् ॥ २ ॥ ॐ क्लीं सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ॥ भयेभ्यस्त्राहि नो देवि नारायणि नमोऽस्तु ते ॥ १ ॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ॥ पातु नः सर्वभूतेभ्यः कात्यायनि नमोऽस्तु ते॥२॥ज्वालाकरालमत्युग्रमशेषासुरसूदनम्॥त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥३॥ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्योऽनः सुतानिव॥४॥ असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयम्॥५॥ इति स्तनयोः॥३॥ इत्येकादशो न्यासः॥११॥

१-मृत्युमन्त्रकृतो न्यासो नवमो देवतामिश्रकृत ॥ २-कृतेस्मिन्दशमे न्यासे त्रैलोक्यं वशगं भवेत ॥

एवमेकादशन्यासान्कृत्वा षडंगन्यासं कुर्यात् ॥ तद्यथा—ॐ ऐं हृदयाय नमः ॥ १ ॥ ॐ ह्रीं शिरसे स्वाहा ॥ २ ॥ ॐ क्लीं शिखायै वषट् ॥ ३ ॥ ॐ चामुंडायै कवचाय हुं ॥ ४ ॥ ॐ विच्चे नेत्रत्रयाय वौषट् ॥ ५ ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे अस्त्राय फट् ॥ ६ ॥ इति षडंगन्यासः ॥ ॐ ऐं नमः शिखायाम् ॥ १ ॥ ॐ ह्रीं नमः दक्षिणनेत्रे ॥ २ ॥ ॐ क्लीं नमः वामनेत्रे ॥ ३ ॥ ॐ चां नमः दक्षिणकर्णे ॥ ४ ॥ ॐ मुं नमः वामकर्णे ॥ ५ ॥ ॐ डां नमः दक्षिणनासापुटे ॥ ६ ॥ ॐ यैं नमः वामनासापुटे ॥ ७ ॥ ॐ विं नमः वक्त्रे ॥ ८ ॥ ॐ च्चें नमः गुदे ॥ ९ ॥ इति मंत्रवर्णन्यासः ॥ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे पादादिमूर्धांतम् इति व्यापकम् अष्टवारं न्यसेत् ॥ एवं न्यासं कृत्वा महाकालीमहालक्ष्मीमहासरस्वतीति त्रिरूपां ध्यायेत् ॥ अथ ध्यानम् ॥ " खड्गं चक्रगदेषुचापपरिघाञ्शूलं भुशुंडीं शिरः शंखं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥ यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभं नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ॥ १ ॥ अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुष्कुंडिकां दंडं शक्तिमसिं च चर्मजलजं घंटां सुराभाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥ घंटाशूलहलानि शंखमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्वामत्र सरस्वतीमनु भजे शुंभादिदैत्यार्दिनीम् ॥३॥ इति ध्यात्वा मानसोपचारैः पूजयेत्। ततः पीठादौ रचिते सर्वतोभद्रमंडले पीठपूजां कृत्वा मंडूकादिपीठदेवताः पद्धतिमार्गेण संस्थाप्य नवपीठशक्तीः पूजयेत् ॥ तद्यथा—पूर्वादिक्रमेण ॥ ॐ जयायै नमः ॥१॥ ॐ विजयायै नमः ॥२॥ ॐ अजितायै नमः ॥ ३ ॥ ॐ अपराजितायै नमः ॥ ४ ॥ ॐ नित्यायै नमः ॥ ५ ॥ ॐ विलासिन्यै नमः ॥ ६ ॥ ॐ दोग्ध्र्यै नमः ॥ ७ ॥ ॐ अघोरायै नमः ॥ ८ ॥ ॐ मंगलायै नमः ॥ ९ ॥ इति नव पीठशक्तीः पूजयेत्। ततः स्वर्णादियंत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य तस्योपरि त्रिकोणषट्कोणाष्टदलचतुर्विंशतिदलं तस्योपरि चतुः

१ देवी भागवते-शालग्रामे घटे वापि यंत्रे वा प्रतिमासु वा। बाणे लिंगेऽथवा सूर्ये यजेद्देवीमनन्यधीः ॥

षष्टिदलं च देव्यष्टगंधेन लिखित्वा तस्योपरि चतुर्द्वारात्मकं भूपुरं विलिख्य "ॐ ह्रीं वज्रनखदंष्ट्रायुधाय महासिंहाय फट्" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा पद्धतिमार्गेण पुष्पांतैरुपचारैः संपूज्य पुष्पांजलिं गृहीत्वा "संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि मे दुर्गे परिवारार्चनाय ते ॥१॥ इति पठित्वा पुष्पांजलिं च दत्त्वा देव्याज्ञया आवरणपूजां कुर्यात् ॥ तत्रः त्रिकोणे पूर्वकोणे ॐ ब्रह्मसरस्वतीभ्यां नमः । ब्रह्मसरस्वतीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति सर्वत्र ॥ १ ॥ नैर्ऋत्यकोणे । ॐ विष्णुलक्ष्मीभ्यां नमः । विष्णुलक्ष्मीश्रीपा० ॥ २ ॥ वायुकोणे । ॐ पार्वतीशंकराभ्यां नमः । पार्वतीशंकरश्रीपा० ॥ ३ ॥ इति पूजयेत् ॥ ततः पुष्पांजलिमादाय " अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् " ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संत इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततो देव्युत्तरे । ॐ सिंहाय नमः ॥ ॥ १ देवीदक्षिणतः । ॐ महिषाय नमः ॥ २ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् । इति द्वितीयावरणम् ॥ २ ॥ ततः पूज्यपूजकयोरंतराले प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण वामावर्तेन च षट्कोणकेसरेषु । ॐ नंदजायै नमः । नंदजाश्रीपा० ॥ १ ॥ ॐ रक्तदंतायै नमः । रक्तदंताश्रीपा० ॥ २ ॥ ॐ शाकंभर्यै नमः । शाकंभरीश्रीपा० ॥ ३ ॥ ॐ दुर्गायै नमः । दुर्गाश्रीपा० ॥ ४ ॥ ॐ भीमायै नमः । भीमाश्रीपा० ॥ ५ ॥ ॐ भ्रामर्यै नमः । भ्रामरीश्रीपा० ॥ ६ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततोऽष्टदले प्राचीक्रमेण । ॐ ब्राह्म्यै नमः । ब्राह्मीश्रीपा० ॥ १ ॥ ॐ माहेश्वर्यै नमः । माहेश्वरीश्रीपा० ॥ २ ॥ ॐ कौमार्यै नमः । कौमारीश्रीपा० ॥ ३ ॥ ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ॥ ४ ॥ ॐ वाराह्यै नमः । वाराहीश्रीपा० ॥ ५ ॥ ॐ नारसिंह्यै नमः । नारसिंहीश्रीपा० ॥ ६ ॥ ॐ ऐंद्र्यै नमः । ऐंद्रीश्रीपा० ॥ ७ ॥ ॐ चामुंडायै नमः । चामुंडाश्रीपा० ॥ ८ ॥ इति संपूज्य पुष्पांजलिं च दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः चतुर्विंशतिपत्रेषु प्राची

१ विष्णुमाया चेतना च बुद्धिर्निद्रा क्षुधा तथा । छाया शक्तिः परातृष्णा क्षांतिर्जातिश्च लज्जया ॥ शांतिः श्रद्धा कीर्तिलक्ष्म्यौ धृतिर्वृत्तिः श्रुतिः स्मृतिः । दयातुष्टिस्ततः पुष्टिस्तथभ्रांतिरिति क्रमात् ॥

क्रमेण ॥ ॐ विष्णुमायायै नमः । विष्णुमायाश्रीपा० ॥ १ ॥ ॐ चेतनायै नमः । चेतनाश्रीपा० ॥ २ ॥ ॐ बुद्ध्यै नमः । बुद्धिश्रीपा० ॥ ३ ॥ ॐ निद्रायै नमः । निद्राश्रीपा० ॥ ४ ॥ ॐ क्षुधायै नमः । क्षुधाश्रीपा० ॥ ५ ॥ ॐ छायायै नमः । छायाश्रीपा० ॥ ६ ॥ ॐ शक्त्यै नमः । शक्तिश्रीपा० ॥ ७ ॥ ॐ परायै नमः । पराश्रीपा० ॥ ८ ॥ ॐ तृष्णायै नमः । तृष्णाश्रीपा० ॥ ९ ॥ ॐ क्षांत्यै नमः । क्षांतिश्रीपा० ॥ १० ॥ ॐ जात्यै नमः । जातिश्रीपा० ॥ ११ ॥ ॐ लज्जायै नमः । लज्जाश्रीपा० ॥ १२ ॥ ॐ शांत्यै नमः । शांतिश्रीपा० ॥ १३ ॥ ॐ श्रद्धायै नमः । श्रद्धाश्रीपा० ॥ १४ ॥ ॐ कीर्त्यै नमः । कीर्तिश्रीपा० ॥ १५ ॥ ॐ लक्ष्म्यै नमः । लक्ष्मीश्रीपा० ॥ १६ ॥ ॐ धृत्यै नमः । धृतिश्रीपा० ॥ १७ ॥ ॐ वृत्त्यै नमः । वृत्तिश्रीपा० ॥ १८ ॥ ॐ श्रुत्यै नमः । श्रुतिश्रीपा० ॥ १९ ॥ ॐ स्मृत्यै नमः । स्मृतिश्रीपा० ॥ २० ॥ ॐ दयायै नमः। दयाश्रीपा० ॥ २१ ॥ ॐ तुष्ट्यै नमः । तुष्टिश्रीपा० ॥ २२ ॥ ॐ पुष्ट्यै नमः । पुष्टिश्रीपा० ॥२३॥ ॐ भ्रांत्यै नमः । भ्रांतिश्रीपा० ॥ २४ ॥ इति पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ ततः चतुष्षष्टिदले प्राचीक्रमेण वामावर्त्तेन च ॥ ॐ जयायै नमः ॥ १ ॥ ॐ विजयायै नमः ॥ २ ॥ ॐ जयंत्यै नमः ॥ ३ ॥ ॐ अपराजितायै नमः ॥४॥ ॐ दिव्ययोग्यै नमः ॥ ५ ॥ ॐ महायोग्यै नमः ॥ ६ ॥ ॐ सिद्धयोग्यै नमः ॥ ७ ॥ ॐ माहेश्वर्य्यै नमः ॥ ८ ॥ ॐ प्रेताश्यै नमः ॥ ९ ॥ ॐ डाकिन्यै नमः ॥ १० ॥ काल्यै नमः ॥ ११ ॥ ॐ कालरात्र्यै नमः ॥ १२ ॥ ॐ टंकाक्ष्यै नमः ॥ १३ ॥ ॐ रौद्र्यै नमः ॥ १४ ॥ ॐ वेताल्यै नमः ॥ १५ ॥ ॐ हुंकार्यै नमः ॥ १६ ॥ ॐ ऊर्ध्वकेशिन्यै नमः ॥ १७ ॥ ॐ विरूपाक्ष्यै नमः ॥ १८ ॥ ॐ शुष्कांग्यै नमः ॥ १९ ॥ ॐ नरभोजिकायै नमः ॥ २० ॥ ॐ फट्कार्यै नमः ॥ २१ ॥

१–जया च विजया चैव जयन्ती चापराजिता । दिव्ययोगी महायोगी सिद्धयोगी महेश्वरी ॥ प्रेताशी डाकिनी काली कालरात्रिस्तथैव च । टंकाक्षी रौद्री वेताली हुंकारी चोर्ध्वकेशिनी ॥ विरूपाक्षी च शुष्कांगी नरभोजनिका तथा । फट्कारी वीरभद्रा च धूम्रांगो कलहप्रिया ॥ राक्षसी घोररक्ताक्षी विश्वरूपा भयंकरी । चण्डमारी च चंडी च वाराही मुण्डधारिणी ॥ भैरवी च तथोष्ट्राक्षी दुर्मुखी प्रेतवाहिनी । खट्वांगी चैव लम्बोष्ठी मालिनी मत्तयोगिनी ॥ काली रक्ता च कंकाली तथा च भुवनेश्वरी । त्रोटकी च महामारी यमदूती करालिनी ॥ केशिनी दमिनी चैव रोमगंगा प्रवाहिनी । विडाली कामुकालाक्षी जया चाधोमुखी तथा ॥ मुंडाग्रधारिणी व्याघ्री कांक्षिणी प्रेतभक्षिणी । धूर्जटी निकटी घोरी कपाली विषलंबिनी ॥ चतुःषष्टिस्तु योगिन्यः पूजनीयाः प्रयत्नतः ॥

ॐ वीरभद्रायै नमः ॥ २२ ॥ ॐ धूम्रांग्यै नमः ॥ २३ ॥ ॐ कलहप्रियायै नमः ॥ २४ ॥ ॐ राक्षस्यै नमः ॥२५॥ ॐ घोररक्ताक्ष्यै नमः ॥ २६ ॥ ॐ विश्वरूपायै नमः ॥ २७ ॥ ॐ भयंकर्यै नमः ॥ २८ ॥ ॐ चण्डमार्यै नमः ॥ २९ ॥ चंडयै नमः ॥३०॥ ॐ वाराह्यै नमः॥३१॥ ॐ मुंडधारिण्यै नमः ॥३२॥ ॐ भैरव्यै नमः ॥३३॥ ॐ ऊर्ध्वाक्ष्यै नमः ॥ ३४ ॥ ॐ दुर्मुख्यै नमः ॥ ३५ ॥ ॐ प्रेतवाहिन्यै नमः॥ ३६ ॥ ॐ खट्वांग्यै नमः ॥ ३७ ॥ ॐ लंबोष्ठयै नमः ॥ ३८ ॥ ॐ मालिन्यै नमः ॥ ३९ ॥ ॐ मत्तयोगिन्यै नमः ॥ ४० ॥ ॐ काल्यै नमः ॥४१॥ ॐ रक्तायै नमः ॥४२॥ ॐ कंकाल्यै नमः ॥४३॥ ॐ भुवनेश्वर्यै नमः ॥४४॥ ॐ त्रोटिक्यै नमः ॥ ४५ ॥ महामार्यै नमः ॥४६॥ ॐ यमदूत्यै नमः ॥ ४७ ॥ ॐ करालिन्यै नमः ॥४८॥ ॐ केशिन्यै नमः ॥४९॥ ॐ दमन्यै नमः ॥ ५० ॥ ॐ रोमगंगाप्रवाहिन्यै नमः ॥ ५१ ॥ ॐ विडाल्यै नमः ॥ ५२ ॥ ॐ कामुकालाक्ष्यै नमः ॥ ५३ ॥ ॐ जयायै नमः ॥ ५४ ॥ ॐ अधोमुख्यै नमः ॥ ५५ ॥ ॐ मुंडाग्रधारिण्यै नमः ॥ ५६ ॥ ॐ व्याघ्र्यै नमः ॥ ५७ ॥ ॐ कांक्षिण्यै नमः ॥ ५८ ॥ ॐ प्रेतभक्षिण्यै नमः ॥ ५९ ॥ ॐ धूर्जटयै नमः ॥ ६० ॥ ॐ विकटयै नमः ॥ ६१ ॥ ॐ घोर्यै नमः ॥ ६२ ॥ ॐ कपाल्यै नमः ॥६३ ॥ ॐ विषलंबिन्यै नमः ॥ ६४ ॥ इति चतुःषष्टियोगिनीः संपूज्य पुष्पांजलिं च दद्यात् ॥ इति षष्ठावरणम् ॥ ॥ ६ ॥ ततो भूपुराभ्यंतरे आग्नेय्यादिचतुर्दिक्षु ॐ गं गणेशाय नमः । गणेशश्रीपा० ॥ १ ॥ ॐ क्षं क्षेत्रपालाय नमः । क्षेत्रपालश्रीपा० ॥ २ ॥ ॐ वं वटुकाय नमः । वटुकश्रीपा० ॥ ३ ॥ ॐ यों योगिन्यै नमः । योगिनीश्रीपा० ॥ ४ ॥ इति द्वारपालान् पूजयित्वा पुष्पांजलिं च दद्यात् । इति सप्तमावरणम् ॥७॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं च दद्यात्।इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य मंत्रार्थं स्मरन् जपं कुर्यात् ॥ अस्य पुरश्चरणं चतुर्लक्षजपः पायसान्नेन दशां

१—मन्त्रे बीजत्रयं क्रमेण महासरस्वतीमहालक्ष्मीमहाकालीनां वाचकम् विच्चे इत्यत्रापि वित-च-इति पदत्रयं क्रमेण चित्-सत्-आनन्दानां वाचकं तच्च संबोधनांतं बीजत्रयस्य क्रमेण विशेषणम् चामुण्डापदं ब्रह्मविद्यावाचकम् तादर्थ्ये चतुर्थी ।अनुसन्दध्महे इति शेषः ॥ तथा चायमर्थः । हे चिद्रूपिणी महासरस्वति ! हे सद्रूपिणि महालक्ष्मि ! हे आनन्दरूपिणि महाकालि ! त्वां चामुंडायै ब्रह्मविद्याप्राप्त्यर्थमनुसन्दध्महे ध्यायाम इत्यर्थः ॥

शतो होमः तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनं च कुर्यात्। एवं कृते मंत्रः सिद्धो भवति। सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत्। तथा च–"एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः॥पायसान्नेन जुहुयात्पूजिते हेमरेतसि॥१॥एवं सिद्धे मनौ मंत्री भवेत्सौभाग्यभाजनम्॥नवबीजविशुद्धोऽयं मंत्रस्त्रैलोक्यपावनः ॥ २ ॥ एवं जपति यो मंत्री फलं तस्य वदाम्यहम् ॥ वश्या भवंति कामिन्यो राजानोऽनुचरा इव ॥ ॥३॥न हस्तिसर्पदावाग्निचोरशत्रुभयं भवेत् ॥ सर्वाः समृद्धयस्तस्य जायंते चंडिकाज्ञया॥४॥नश्यंति दारुणा रोगाः सत्यं सत्यं न संशयः॥ अनेन विधिना नित्यं यः कुर्याचंडिकार्चनम्॥५॥तस्य तुष्टा महालक्ष्मीर्यच्च दद्याच्छृणुष्व तत् ॥ महदैश्वर्यमतुलं त्रैलोक्ये तस्य जायते ॥ ६ ॥ धर्मराजसमायुक्तं पुत्रपौत्रसमाकुलम् ॥ तं करोति महालक्ष्मीर्ब्रह्मविष्णुशिवोपमम् ॥ ७ ॥ रिपवः संक्षयं यांति तत्स्थानाच्छतयोजनम्॥तेनैकेन वसंतोऽपि न तं पश्यंति दस्यवः॥८॥तस्य स्मरणमात्रेण विघ्नानां जायते क्षयः॥ त्रिषु लोकेषु यत्किंचित्ससुरासुरदुर्लभम् ॥ ९ ॥ तत्तत्सर्वं समायाति महालक्ष्मीप्रसादतः ॥ यो जपेत्परया भक्त्या महालक्ष्मीं तु पूजयन् ॥ १० ॥ स नरो लभते नित्यं पूजाफलमनुत्तमम् ॥ सहस्रमस्य मंत्रस्य नवबीजस्य यो जले ॥ ११ ॥ नाभिमात्रे जपेत्सम्यक् कवित्वं लभते ध्रुवम् ॥ १२ ॥ अयुतं नवतत्त्वस्य राजबंधनसंकटैः ॥ जपेत्तदाशु मुच्येत यो मंत्री चंडिकाज्ञया ॥ १३ ॥ अस्मिन्नवाक्षरे मंत्रे महालक्ष्मीर्व्यवस्थिता ॥ तस्मात्सुसिद्धः सर्वेषां सर्वदिक्षु प्रदीपकः ॥ १४ ॥" अन्यत्रापि नवार्णस्य बिल्वमूले मासं जपः ॥ बिल्वदलैर्मधुरत्रययुतैर्मासहोमः ॥ दशांशेन क्षीरसंयुतैः कमलैर्होमो वा। लक्ष्मीप्राप्तिः ॥ १५ ॥ अन्यत्राऽपि " मार्कण्डेयपुराणोक्तं नित्यं चंडीस्तवं पठन् ॥ पुटितं मूलमंत्रेण जपन्नाप्नोति वांछितम् ॥ १६ ॥ आश्विनस्य सिते पक्षे आरभ्याग्नितिथिं सुधीः ॥ अष्टम्यंतं जपेल्लक्षं दशांशं होममाचरेत् ॥ ॥ १७ ॥ प्रत्यहं पूजयेद्देवीं पठेत्सप्तशतीमपि ॥ विप्रानाराध्य मंत्री स्वमिष्टार्थं लभतेऽचिरात् ॥ १८ ॥ सार्थस्मृतिं पठेचंडीस्तवं स्पष्टपदाक्षरम् ॥ समाप्तौ तु महालक्ष्मीं ध्यात्वा कृत्वा षडंगकम् ॥ १९ ॥ अष्टोत्तरशतं मूलं देवतायै निवेदयेत् ॥ एवं यः कुरुते स्तोत्रं नावसीदति जातुचित् ॥ २० ॥ चंडिकां प्रभजन्मर्त्यो धनैर्धान्यैर्यशश्रयैः ॥ पुत्रैः पौत्रै रुचारोग्यैर्युक्तो जीवेच्छतं समाः ॥

१–हेमरेतसि वह्नौ ॥

॥ २१ ॥ (कार्यपरत्वेन नवार्णे दुर्गापाठे वा पल्लवनिर्णयः हरगौरीतंत्रे) ततः सप्तशतीं चैव रहस्यं पल्लवं तथा ॥ चंडीपाठे तथा होमे क्रम उक्तो मनीषिभिः ॥ २२ ॥ मंत्राणां पल्लवो वासो मंत्राणां प्रणवः शिरः ॥ शिरःपल्लवसंयुक्तो मंत्रः कामदुघो भवेत् ॥ २३ ॥ वश्याकर्षणहोमेषु स्वाहांतः सिद्धिदायकः ॥ वौषट्पल्लवसंयुक्तो मंत्रः पुष्ट्यादिसाधकः ॥ २४ ॥ हुंकारपल्लवोपेतो मारणे ब्राह्मणं विना ॥ यंत्रभंजनकार्येषु सद्यो र भयनाशने ॥ २५ ॥ वषडंतः प्रकल्प्यस्तु ग्रहबाधाविनाशकः ॥ उच्चाटने तु संप्रोक्तो मंत्रः फट्पल्लवान्वितः ॥ नमोंऽतः शांतिके पुष्टौ प्रणिपाते च कीर्तितः ॥ २६ ॥ (मनुमते) वषड् वश्ये फडुच्चाटे हुं स्तंभे खे च मारणे ॥ स्वाहा तुष्ट्यै ठः ठः पुष्ट्यै नमः सर्वार्थसाधने ॥ २७ ॥ (तंत्रांतरे) वषड् वश्ये फडुच्चाटे हुं द्वेषे खे च मारणे ॥ ठः स्तंभे वौषडाकर्षे नमः संपत्तिहेतवे ॥ २८ ॥ स्वाहा पुष्टिस्तथा तुष्टिरित्येते मंत्रपल्लवाः ॥ २९ ॥ (कार्यपरत्वेन नवार्णस्वरूपम्) वौषडाकर्षणे चादौ मंत्रांते साध्यनामकः ॥ तदंते वौषडंते च जपेद्विज्ञाय मंत्रवित् ॥ ३० ॥ मंत्रादौ स्तंभनं बीजं मंत्रांते साध्यनाम च ॥ नामांते च पुनर्बीजमिति ज्ञात्वा मनुं जपेत् ॥ ३१ ॥ वषड् द्वंद्वं तु वश्यादौ न्यसेन्मंत्रांत एव हि ॥ साध्यनाम तदंते च वषडंते जपेत्सुधीः ॥ ३२ ॥ मारणे बीजमादौ च साध्यनाम ततः परम् ॥ तदंते च मनुं जप्त्वा नामबीजं क्रमात्पठेत् ॥ ॥ ३३ ॥ मंत्रांते बीजमुच्चार्य तदंते साध्यनाम च ॥ नामांते च पुनर्बीजं द्वंद्वमुच्चाटने स्मृतम् ॥ ३४ ॥ मन्वंतरं तथा बीजं मंत्रान्नामानि निर्दिशेत् ॥ स्वाहा नमः स्वधा चेति मंत्रांते च पठेत्सुधीः ॥ एवं ज्ञात्वा प्रयोगांश्च सर्वकर्माणि साधयेत् ॥ ३५ ॥ (कार्यपरत्वेन जपसंख्या) मारणे दशलक्षं च मोहने द्वादशं तथा ॥ उच्चाटने चतुर्विंशद्वश्ये कोटिं जपेद् बुधः ॥ ३६ ॥ स्तंभने

१ मंत्रस्वरूपो यथा–"वषट् ऐं ह्रीं क्लीं चामुण्डायै विच्चे अमुकनामानं वषट् मे वश्यं कुरुकुरु स्वाहा" इति वश्यम् ॥ "ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे देवदत्तं फट् उच्चाटनं कुरु कुरु स्वाहा" इत्युच्चाटनम् ॥ " इति क्लीं क्लीं ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे देवदत्तं क्लींक्लीं मोहनं कुरुकुरु क्लींक्लीं स्वाहा" इति मोहनम् ॥ "ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे देवदत्तं रंरं खे खे मारयमारय रंरं शीघ्रं भस्मीकुरुकुरु स्वाहा" इति मारणम् ॥ " ॐ ठंठं ऐं ह्रीं क्लीं चामुंडायै विच्चे देवदत्तं ह्लीं वाचं मुखं पदं स्तंभयस्तंभय ह्लीं जिह्वां कीलयकीलय ह्लीं बुद्धिं विनाशयविनाशय ह्लीं ॐ ठंठं स्वाहा" इति स्तंभनम् ॥ "ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे देवदत्तं यंयं शीघ्रमाकर्षयाकर्षय स्वाहा" इत्याकर्षणम् ॥

षोडश प्रोक्तं विद्वेषे च त्रयोदशम् ॥ एतद्राज्ञां प्रकर्तव्यं वैश्येष्वर्द्धं निगद्यते ॥ ३७ ॥ ब्राह्मणे द्विगुणं देवि शूद्राणामर्द्धकार्द्धकम् ॥ स्त्रीणां हि द्विगुणं प्रोक्तं यतः सा शक्तिरूपिणी ॥ ३८ ॥ मारणं वर्जितं स्त्रीषु यतश्चान्यानि कारयेत् ॥ स्त्रीषु वै मारणं मोहात्कर्तुर्मृत्युर्न संशयः ॥ ३९ ॥ (कार्यपरत्वेन दिङ्निर्णयः) मारणे स्तंभने वश्ये उच्चाटनविधौ तथा ॥ दक्षिणस्यां दिशि मुखं मोहने पश्चिमे मुखम् ॥ ४० ॥ विद्वेषे चोत्तरमुखमासनं शृणु वल्लभे ॥ (कार्यपरत्वेनासननिर्णयः) मारणे कंबलं कृष्णं कृष्णांबरधरः स्वयम् ॥ ४१ ॥ मोहनं चासनं पीतं पीतवस्त्रधरो बुधः ॥ रक्तं चोच्चाटने प्रोक्तं रक्तवस्त्रविभूषितः ॥ ४२ ॥ वश्ये श्वेतं पूर्ववच्च कर्बुरं स्तंभने तथा ॥ विद्वेषे चासनं धूम्रं शृणु बद्धासनं प्रिये ॥ ४३ ॥ (कार्यपरत्वेन बद्धासननिर्णयः) मारणे वीरवत्तिष्ठेन्मोहने कटिनम्रकम् ॥ उच्चाटने त्रिकोणं वै वश्ये चैकोऽर्धपादकः ॥ ४४ ॥ कमलं स्तंभने तिष्ठेद्विद्वेषे पृष्ठपादकः ॥ एतद्बद्धासनं प्रोक्तं प्रयोगाणां विधिं शृणु ॥ ४५ ॥ (षट्प्रयोगा यथा– तत्रादौ मारणप्रयोगः ॥) कर्तव्यदिवसात्पूर्वं स्नानार्थं चिंतयेद्बुधः ॥ दिनानि विंशतिं वामे वै कार्यो विधिस्तनोः ॥ ४६ ॥ शरीरशोधनं कार्यं मदिराक्षि विनिश्चितम् ॥ द्विजपादोदकं सुभ्रु शतानां सरसां तथा ॥४७॥ कूपाष्टनवनद्या षड्वापीनां च जलं प्रिये ॥ एतज्जलं समागृह्य ताम्रकुंभेषु निःक्षिपेत् ॥४८॥ पत्रं बकुलवृक्षस्य आश्वत्थं वटनिंबयोः ॥ गोदुग्धेनव संपेष्य स्नानं कुर्याद्विचक्षणः ॥ ४९ ॥ त्रिपुंडधारणं कृत्वा ललाटे रक्तचंदनैः ॥ ःसने कंबलं कृष्णं कृष्णांबरधरः स्वयम् ॥५०॥ मारणे वीरवत्तिष्ठे दक्षिणस्यां मुखे कृते ॥ शृणुष्व चापरं कर्म भूमिशोधनमत्तमम् ॥ ५१ ॥ मारणेनाष्टकोणेन कुर्याद्भूमिस्थलं बुधः ॥ पंचकूपोद्धृतं तोयं गृह्णीयादेकपाणिना ॥ ५२ ॥ श्मशानभस्म सिंदूरमजारक्तं तिलं तथा ॥ गोमयं वृद्धधेन्वास्तु मृदं वंशादधस्तलात् ॥ ५३ ॥ एभिर्विलेपयेद्भूमिमष्टकोणसमान्विताम् ॥ स्वदक्षिणकरांगुष्ठाद्गृहीत्वा रुधिरं प्रिये ॥ ५४ ॥ भृंगराजरसं रक्तचन्दनं केसरोद्भवम् ॥ कर्पूरकदलीपत्रजलं हिंगुरसं शुभे ॥ ५५ ॥ एतत्सर्वं च संपेष्य एकस्मिन्कारयेद्बुधः ॥ श्मशानकाष्ठमानीय तेन कृत्वा च लेखनीम् ॥ ५६ ॥ नवां

गुलप्रमाणां नवार्णयंत्रं लिखेत्सुधीः ॥ पूजनं यंत्रराजस्य जगन्मातः शुभे शृणु ॥ ५७ ॥ स्ववामजानुरुधिरं रक्तचंदनमिश्रितम् ॥ पिष्ट्वा सर्षपतैलेन सिंदूरं कदलीजलम् ॥ ५८ ॥ कुशान्सप्त समान्बद्ध्वा ऊर्णसूत्रेण साधकः ॥ तेनैव स्नापयेद्यंत्रं वामहस्तेन भामिनि ॥ ५९ ॥ रक्तपुष्पं चंदनं च रक्तसूत्रं च तण्डुलम् ॥ सिंदूरं वटवृक्षस्य दुग्धं बिंबाफलं तथा ॥ ६० ॥ एतान्सर्वान्विशालाक्षि शोधयेत्साधकः सदा ॥ ऐतैः प्रपूजयेद्यंत्रं महामाया प्रसीदति ॥ ६१ ॥ विस्मृतं न मयाक व सामान्यं कथितं शुभे ॥ अतः परं शृणुष्वाद्य विधिं धपस्य निर्मलम् ॥ ६२ ॥ साधकानां ध्रुवं सिद्धिर्धूपेनैव प्रजायते ॥ मारणे कारणं देवि धपमेव निगद्यते ॥६३॥ धूपमाहात्म्यमतुलं डामरे कथितं मया ॥ धूपवार्तां न जानंति डामरे विमुखा नराः॥६४॥कथं सिद्धिर्भवेत्तेषां विपरीते शुभानने॥गोरोचनं च कर्पूरं काश्मीरवनसंभवम् ॥६५॥ एलाफलं लवंगं च मृगनाभिः सुरा तथा ॥ लंबकर्णस्य मांसं च गोघृतं सरभीपयः ॥ ६६ ॥ देवदारु सिता रक्तचंदनं श्वेतसंज्ञकम् ॥ नागरस्तगरो वालक्षरो मोहनगंधिका ॥ ६७ ॥ एतान्सर्वांस्तु संपेष्य कारयेदेकमिश्रितम् ॥ धूपयेद्धूपमंत्रेण कार्यसिद्धिर्भवेद्ध्रुवम् ॥६८॥ सप्त मन्त्रान्पठित्वा तु साधको गद्गदाकृतिः ॥ एकचित्तं समाधाय धूपं कुर्याद्विचक्षणः ॥ ६९ ॥ मारणे कारणं देवि दीप एव निगद्यते ॥ लोहदीपः प्रकर्तव्यस्तिलस्य तैलमेव च ॥ ७० ॥ पीततलं गरुं शुक्लं तैलनिंबश्च निश्चितम् ॥ श्मशानसूत्रमानीय वामहस्तेन भामिनी ॥ ॥ ७१ ॥ वर्तिका तेन कार्या तु अंगुलित्रयसंमिता ॥ त्रिकोणां पृथिवीं लिप्त्वा अंगुलित्रयसंमिताम् ॥ ७२ ॥ तस्या मध्ये लिखेद्यंत्रं नवाक्षरयुतं प्रिये ॥ लेखनी कैचकी कार्या नवांगुलयुता शुभा ॥ ७३ ॥ लिखेद्यंत्रं चंदनेन रक्तेन मधुना सह ॥ स्थापयेद्यंत्रराजस्य अधोभागे च सन्निधौ ॥ ७४ ॥ अस्मिन्दीपे महामायां कालिकां रुधिरप्रियाम् ॥ ज्वलज्जिह्वां सदा ध्यायेच्छत्रुसंहारकारिणीम् ॥ ॥ ७५ ॥ इति ध्यात्वा महामायां पूजयेद्रक्तचंदनः ॥ एभिः स्तवैश्च मां नित्यमेष मंत्रे निवेदयेत् ॥ ७६ ॥ एवं दीपो मया प्रोक्तो मालायाश्च विधिं शृणु ॥ सर्पास्थिसंभवा माला कदलीतंतुग्रंथिता ॥ ७७ ॥ मारणे कथिता देवि साधकानां हिताय च ॥ चंडिकायै

१ ॐ जयन्ती मंगळा काळी भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ इति मंत्रेण सर्वं दद्यात् । २ "ॐ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥ एवमेतत्त्वया कार्यमस्मद्वैरिविनाशनम् ॥" इति मन्त्रेण धूपं दद्यात् ॥

यंत्रराजे अर्चयित्वा च वीटकम् ॥ ७८ ॥ पश्चादेकैकमुद्धृत्य चर्वयेच्छनकैः सुधीः ॥ यावज्जपसमाप्तिः स्यात्तावत्तांबूलचर्वणम् ॥ ७९ ॥ दशलक्षं जपेन्मंत्रं वैश्यस्य वर्द्धं निगद्यते ॥ ब्राह्मणे द्विगुणं देवि शूद्राणामर्द्धकार्द्धकम् ॥ ८० ॥ स्त्रीणां च द्विगुणं प्रोक्तं यतः सा शक्तिरूपिणी ॥ मारणं वर्जितं स्त्रीषु यतश्चान्यानि कारयेत् ॥ ८१ ॥ स्त्रीषु च मारणं मोहात्कर्तुर्मृत्युर्न संशयः ॥ जपसंख्यादशांशेन नित्यहोमं च कारयेत् ॥ ८२ ॥ गोमहिष्योर्घृतं वाम अजादुग्धं च तंडुलम् ॥ लवंगं चैव कर्पूरं सर्षपं हिंगुमेव च ॥ ८३ ॥ शंष्कुली[2] तु गोधूमस्य गुडेन मिश्रिते शुभे ॥ चिंचिणीकाष्ठमानीय खनेत्कुंडं त्रिकोणकम् ॥ ८४ ॥ काष्ठांश्चतुरंगुलान्कृत्वा जुहुयाच्चंडिकाप्रियः ॥ मंत्रो[1] नवाक्षरः प्रोक्तो मारणे कथितो मया ॥ ८५ ॥ मारणे मोहने वश्ये भोजनं त्वेकमुच्यते ॥ तृतीयप्रहरे देवि भोज्यं लवणवर्जितम् ॥ ८६ ॥ माषस्य द्विदलं सुभ्रु तंडुलं मिलितद्वयम् ॥ गोघृतं मधुसंयुक्तं मिश्रितं पयसा प्रिये ॥ ८७ ॥ प्रभावे भोजनं देव्या यत्प्रास तत्तदेव हि ॥ भोजने क्लेशसंकर्तुः प्रयोगोऽफलदो भवेत् ॥ ८८ ॥ विधिर्वै मंत्रराजस्य कथितः प्राणवल्लभे ॥ शैवेन शाक्तविप्रेण कर्तव्यं निश्चितं प्रिये ॥ ८९ ॥ मयोक्तं देवि मंत्रस्य चंडिकायाः प्रियस्य च ॥ कार्यं विचक्षणेनैव चंडिकाकिंकरेण वै ॥ ९० ॥ इति मारणम् ॥ (मोहनप्रयोगो यथा–) " कर्तव्यदिवसात्पूर्वं स्नानार्थं चिंतयेद्बुधः ॥ दिनानि विंशतिं वामे पूर्वं कार्यो विधिस्तनोः ॥ ९१ ॥ शरीरशोधनं कार्यं मदिराक्षि विनिश्चितम् ॥ गजपादजलं सुभ्रु वापीसप्त सरस्त्रयः ॥ ९२ ॥ सरितौ द्वे समाख्याते तोयग्रहणकर्मणि ॥ एषां जलं समानीय संक्षिपेन्मृन्मये घटे ॥ ९३ ॥ आम्रं पत्रं फलं सुज्ञे पत्रं चामलकपीतयोः ॥ मेषीदुग्धेन संपेष्य स्नानं कुर्याच्च साधकः ॥ ९४ ॥ त्रिपुंड्रधारणं कृत्वा ललाटे पीतचंदनैः ॥ मोहने चासनं पीतं पीतवस्त्रधरो बुधः ॥ ९५ ॥ कटिनम्रासने[3] तिष्ठेन्मोहने पश्चिमे मुखम् ॥ शृणुष्व चापरं कर्म भूमिशोधनमुत्तमम् ॥ ९६ ॥ हरिद्राकेतकीपत्रं वंशपत्रं गुडं तथा ॥ धूपत्रयात्समानीय तोयं पादोद्भूतं शुभम् ॥ ९७ ॥ गोमयं बालवत्सस्य मृदं सरितसंगमात् ॥ एभिर्भूमिं विलेप्यार्द्रामार्द्रां कुर्याद्दलेपनाम् ॥ ९८ ॥

---

१ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे देवदत्त रंरं खेखे मारयमारय रंरं शीघ्र भस्मीकुरुकुरु स्वाहा" इति मंत्रं जपेत् ॥ २ शष्कुली पूरिका ॥ ३ खट्यानाशी चर्मोऽयं वा ॥

संयुक्तां या त्रिकोणेन मोहनषु मयोदितः ॥ स्ववामपादरुधिरं गृहीयाद्यत्र साधकः ॥ ९९ ॥ कर्पूरशुंठीविजया अर्कवृक्षपयस्तथा ॥
तंडुलं चंदनं श्वेतमेकस्मिन्पेषयेद्बुधः ॥ १०० ॥ निंबकाष्ठस्य कर्तव्या लेखनी चतुरंगुला ॥ तया लिखेन्महामायायंत्रं मोक्षप्रदायकम् ॥
॥ १०१ ॥ पूजनं यंत्रराजस्य जगन्मातः शुभे शृणु ॥ कर्पूरमिक्षुदंडस्य रसं तंडुलचूर्णकम् ॥ १०२ ॥ कृष्णतिलोद्भवं तैलं कुशानि
त्रीणि बंधिता ॥ दर्वया बंधिता दर्भास्तैः स्नानं कारयेद्बुधः ॥ १०३ ॥ कृष्णपुष्पं तथा कृष्णकज्जलं कृष्णतंडुलम् ॥ कृष्णसूत्रं च
सिंदूरं गवां दुग्धं यवं तथा ॥ १०४ ॥ एभिः पूजा प्रकर्तव्या यंत्रराजस्य मोहने ॥ विस्तृतं न मयोक्तं वै सामान्यं कथितं शुभे ॥
॥ १०५ ॥ अतः परं शृणुष्वाद्य विधिं धूपस्य निर्मलम् ॥ साधकानां ध्रुवं सिद्धिर्धूपेनैव प्रजायते ॥ १०६ ॥ मोहने कारणं देवि
धूपमेव निगद्यते ॥ धूप[1]माहात्म्यमतुलं डामरे कथितं मया ॥ १०७ ॥ धूपवार्ता न जानंति डामरे विमुखा नराः ॥ कथं सिद्धिर्भवेत्तेषां
विपरीते शुभानने ॥ १०८ ॥ कर्पूरं विजयापत्रमर्कपुष्पमजाघृतम् ॥ गोघृतं महिषीदुग्धमष्टगंधं सिता मधु ॥ १०९ ॥ गुग्गुलुं लौह
बाणं च ऐरंडं बीजकं तथा ॥ एतान्सर्वाननेकत्र संपेष्य मिश्रयेद्बुधः ॥ ११० ॥ प्रमाणं माषधान्यस्य मत्स्यमांसं क्षिपेद् बुधः ॥ धूपं
दद्याद्यंत्रराजे धूपमंत्रेण साधकः ॥ १११ ॥ दशवारं पठेन्मंत्रं साधको गद्गदाकृतिः ॥ एकचित्तं समाधाय धूपं कुर्याद्विचक्षणः ॥
॥ ११२ ॥ कांस्यदीपः प्रकर्तव्यस्तैलं श्वेत तिलस्य च ॥ कृष्णतैलं श्रीफलस्य तैलं श्वेता सिता मधु ॥ ११३ ॥ रक्तवस्त्रं पथि
भ्रष्टं समानीय च साधकः ॥ तेनैव वर्तिका कार्या सप्तांगलसमन्विता ॥ ११४ ॥ लेपयेत्पृथिवीं विद्वान् चतुष्कोणां च द्व्यंगुलाम् ॥
यंत्रराजं लिखेत्तस्मिन्मध्ये प्रीत्या च साधकः ॥ ११५ ॥ दूर्वाया लेखनी कार्या सप्तांगुलयुता प्रिये ॥ कर्पूरेण हरिद्राभ्यां लिख
यंत्रं शुभानने ॥ ११६ ॥ स्थापयेद्यंत्रराजस्य ऊर्द्ध्वभागेऽगुलत्रये ॥ पूजयेत्केसरं पीततंडुलाभ्यां विचक्षणः ॥ ११७ ॥ अस्मिन्दीपे
महामायां देवीं कात्यायनीं शुभाम् ॥ प्रसन्नवदनां ध्यायेत्सदा संक्लेशनाशिनीम् ॥ ११८ ॥ इति कात्यायनीं ध्यात्वा पूजयेत्पीत

[1] "ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ बलादाकृष्य मोहाय महामाया प्रयच्छति" ॥ इति मंत्रेण पूजयेत् ॥ [2] "शक्रादयस्सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः फट्" इति मन्त्रेण धूपयेत् ॥

चंदनैः ॥ इत्येतत्कथितं वीर इति मंत्रे निवेदयेत् ॥ ११९ ॥ एवं दीपो मया प्रोक्तो मालायाश्च विधिं शृणु ॥ ग्रंथिता वाजिकेशेन कथिता निंबबीजिका ॥१२०॥ मोहनेषु विधिश्चायं मालायाः प्राणवल्लभे ॥ चंडिकाया यंत्रराजे अर्पयित्वा च वीटकम् ॥ १२१ ॥ पश्चादेकैकमुद्धृत्य चर्वयेच्छनकैः सुधीः ॥ यावज्जपसमाप्तिः स्यात्तावत्तांबूलचर्वणम् ॥ १२२ ॥ कार्यं विचक्षणेनैव चंडिकाकिंकरेण वै ॥ जपेत्तु द्वादशं लक्षं वैश्येष्वर्धं निगद्यते ॥ १२३ ॥ ब्राह्मणे द्विगुणं देवि शूद्राणामर्द्धार्द्धकम् ॥ स्त्रीणां च द्विगुणं प्रोक्तं यतः सा शक्तिरूपिणी ॥ १२४ ॥ नित्यमेवं जपांते च दशांशे होममाचरेत् ॥ अजामेष्योर्घृतं देवि गोदुग्धं तंडुलं यवम् ॥ १२५ ॥ कर्पूरं च तजं यावमेलाशर्करयान्वितम् ॥ आम्रकाष्ठं समानीय पंचकोणं च कुंडलम् ॥ १२६ ॥ सप्तांगुलमितान्काष्ठाञ्जुहुयात्साधकः सदा ॥ मंत्रो नवाक्षरः प्रोक्तो मोहने कथितो मया ॥ १२७ ॥ मारणे मोहने वश्ये भोजनं त्वेकमुच्यते ॥ तृतीयप्रहरे देवि भोजनं क्षारवर्जितम् ॥ १२८ ॥ माषस्य द्विदलं सुभ्रु तंडुलं मिलितद्वयम् ॥ गोघृतं मधुसंयुक्तं मिश्रितं पयसा प्रिये ॥ १२९ ॥ अभावे भोजनं देव्या तत्तत्प्रातं नवैव हि ॥ भोजने क्लेशसंकतुः प्रयोगोऽफलदो भवेत् ॥ १३० ॥ विधिर्वै मंत्रराजस्य कथितः प्राणवल्लभे ॥ शैवेन शाक्ताविप्रेण कर्तव्यं निश्चित प्रिये ॥ १३१ ॥ इति मोहनम् ॥ उच्चाटनप्रयोगो यथा—कर्तव्यदिवसात्पूर्वं स्नानार्थं चिंतयेद्बुधः ॥ दिनानि विंशतिं वामे पत्रं कार्यो विधिस्तनोः ॥ १३२ ॥ शरीरशोधनं कार्यं मादिराक्षि विनिश्चितम् ॥ नंदिपादजलं वामे कूपत्रयजलं तथा ॥ १३३ ॥ तडागादेवमानीय निःक्षिपेत्काष्ठजे घटे ॥ बदरीबर्बुरयोः पत्रं चिंचिणीकाफलातसम् ॥ १३४ ॥ उरूथदुग्धे संपेष्य स्नात्वा तूच्चाटने द्विजः ॥ शृणुष्व चापरं कर्म भूमिशोधनमुत्तमम् ॥ १३५ ॥ नीलपत्रं च विजया अर्कपत्रं यवं तथा ॥ एककूपोद्धृतं तोयं पद्मयां चैव समुद्धृतम् ॥ १३६ ॥ गोमयं बालवत्साया वल्मीकाच्च मृदं तथा ॥ एभिर्विशोधयेद्भूमिं वर्तुलाकारनिर्मिताम् ॥ १३७ ॥ त्रिपुंड्रधारणं कृत्वा ललाटे रक्तचंदनैः ॥ रक्तवस्त्रासनं प्रोक्तं रक्तवस्त्रविभूषितः ॥ १३८ ॥ तिष्ठेत्तत्र त्रिकोणां वै दक्षिणस्यां मुखे कृते ॥ स्ववामपार्श्वज रक्तं संगृह्य यंत्रसाधकः ॥ १३९ ॥ निंबकाष्ठं बिल्वकाष्ठं बदरीकाष्ठमेव च ॥ शृंगवेररसं[2] हिंगु

१ इत्येतत्कथितं वीर इति सर्वं निवेदयेत् इति पाठान्तरम् ॥ २ आर्द्रक ॥

वाटिकारसमेव च ॥ १४० ॥ एतान्सर्वान्समानीय मिश्रितं कारयेद् बुधः ॥ लेखनी दाडिमी कार्या प्रमाणे द्वादशांगुलम् ॥ १४१ ॥ तया लिखेत्स्वयं नग्नो वामहस्तेन निश्चितम् ॥ पूजनं यंत्रराजस्य जगन्मातः शुभे श्रृणु ॥ १४२ ॥ हरिद्रा चंदनं श्वेतं हरितालं जलं वचाम् ॥ कुशानि पंच संबध्य कदलीतंतुना प्रिये ॥ १४३ ॥ स्नापयेत्प्रीतियुक्तेन यंत्रं शक्तेस्तनुं शुभाम् ॥ पीतपुष्पं तथा पीतचंदनं पीत तंडुलम् ॥ १४४ ॥ सूत्रं पीतं च सिंदूरमजादुग्धं तथैव च ॥ एभिः प्रीत्या प्रपूज्येमं यंत्रराजं विचक्षणः ॥ १४५ ॥ विस्तृतं न मयोक्तं वै सामान्यं कथितं शुभे ॥ अतः परं श्रृणुष्वाद्य विधिं धूपस्य निर्मलम् ॥ १४६ ॥ साधकानां ध्रुवं सिद्धिर्धूपेनैव प्रजायते ॥ प्रयोगे कारणं देवि धूप एव निगद्यते ॥ १४७ ॥ धूपमाहात्म्यमतुलं डामरे कथितं मया ॥ धूपवार्तां न जानंति डामरे विमुखा नराः ॥ १४८ ॥ कथं सिद्धिर्भवेत्तेषां विपरीते शुभानने ॥ मधूकफलपुष्पैश्च गुग्गुलुं चंदनद्वयम् ॥ १४९ ॥ हरिद्रा हरितालं च देवदारु च नागरम् ॥ सिता लवंग कर्पूरं सुरा वालक्षरं मधु ॥ १५० ॥ मेषीघृतं गोघृतं च महिषीघृतमेव च ॥ एतान्सर्वांश्च संपेष्य कारये द्धूपमुत्तमम् ॥ १५१ ॥ धूपयेद्धूपमंत्रेणं कार्यं सिद्धिर्भवेद्ध्रुवम् ॥ चतुर्वारं पठेन्मंत्रं साधको गद्गदाकृतिः ॥ एकचित्तं समाधाय धूपं कुर्या द्विचक्षणः ॥ १५२ ॥ मृन्मयो दीपकः कार्यस्तैलं चामलकोद्भवम् ॥ एरंडतैलं तैलं च मधूकस्थ वरानने ॥ १५३ ॥ वर्तिका पीतवस्त्रस्य अगुंलित्रयसंमिता ॥ लेपयेत्पृथिवीं वामे गोमयेन मृदायुताम् ॥ १५४ ॥ त्रितयांगुलसंयुक्तां लिखेद्यंत्रं सुधीः प्रिये ॥ वामपार्श्वे दाडिमस्य करणीया च लेखनी ॥ १५५ ॥ गोधूमचूर्णमध्वाक्तसर्पिषां गैरिकं जतु ॥ एभिर्यंत्रं लिखेद्वामे स्थापयेत्पूर्वदक्षिणे ॥ १५६ ॥ पंचांगुलसमायुक्ते पजयेद्रक्तचंदनैः ॥ दीपमध्ये सदा ध्यायेद्दुर्गां दुर्गतिनाशिनीम् ॥१५७॥ एवं स्तवाभियुक्तानां देवानां तत्र पार्वती ॥ एवं दीपो मया प्रोक्तो मालायाश्च विधिं श्रृणु॥ १५८ ॥ उच्चाटने प्रवालस्य ऊर्णसूत्रेण ग्रंथिता ॥ चंडिकाया यंत्रराजे अर्चयित्वा च

१ "ॐ करोतुसानश्शुभहेतुरीश्वरीशुभानिभद्राण्यभिहन्तुचापदः" इत्यर्द्धेन स्वर्घं दद्यात् ॥ २ "ॐ मयूरकुक्कुटवृतेमहाशक्तिधरेऽनघेक्लीं" इति मन्त्रेण धूपयेत् ॥ १ इति मंत्रेण दीपं दद्यात् ॥

वीटकम् ॥ १५९ ॥ पश्चादेकैकमुद्धृत्य चर्वयेच्छनकैः सुधीः ॥ यावज्जपसमाप्तिः स्यात्तावत्तांबूलचर्वणम् ॥ १६० ॥ कार्य्यं विच
क्षणेनैव चंडिकार्किरेण वै ॥ चतुर्विंशतिलक्षं तु वैश्ये द्वादशलक्षकम् ॥ १६१ ॥ ब्राह्मणे द्विगुणं देवि शूद्राणामर्द्धकार्द्धकम् ॥
स्त्रीणां च द्विगुणं प्रोक्तं यतः सा शक्तिरूपिणी ॥ १६२ ॥ जपांते तद्दशांशेन नित्यहोमं च कारयेत् ॥ गोघृतं महिषीदुग्धं तंडलं
पीतसर्षपम् ॥ १६३ ॥ देवदारु लवंगं च श्रीफलस्य रसस्तथा ॥ कुंडं कृत्वा पंचकोणं काष्ठबर्बुरमेव च ॥ १६४ ॥ सप्तांगुल
मितान् कृत्वा जुहुयात्प्रेमतत्परः ॥ मंत्रं नवार्णवं प्रोक्तं षट्प्रयोगेषु चाहुतौ ॥ १६५ ॥ उच्चाटने यवस्यैव चूर्णं कृत्वा तिलस्य च ॥
गुडामिश्रितसंस्कार्य्या एतैश्च करपट्टिका ॥ १६६ ॥ राजमाषस्य द्विदलं हरिद्रादिविवर्जितम् ॥ भोक्तव्यं वामहस्तेन तृतीयप्रहरे शुभे
॥ १६७ ॥ अभावे भोजनं देव्या यत्तत्प्रासं तदेव हि ॥ भोजने क्लेशसंकर्तुः प्रयोगोऽफलदो भवेत् ॥ १६८ ॥ विधिर्वै मंत्रराजस्य
कथितः प्राणवल्लभे ॥ शैवेन शाक्तविप्रेण कर्तव्यं निश्चितं प्रिये ॥ १६९ ॥ इत्युच्चाटनम् ॥ ३ ॥ वशीकरणप्रयोगो यथा—
कर्तव्यदिवसात्पूर्वं स्नानार्थं चिंतयेद् बुधः ॥ दिनानि विंशतिं वामे पूर्वं कार्यो विधिस्तनोः ॥ १७० ॥ शरीरशोधनं कार्यं मदिराक्षि विनि
श्चितम् ॥ मृगपादोद्धृतं तोयं कूपैकं प्राणरंजने ॥ १७१ ॥ एकादशतडागस्य जलं सरितसंगमात् ॥ क्षिप्त्वा कांते घटे तोयं वश्य
कर्मणि साधकः ॥ १७२ ॥ एतज्जलं च महिषीदुग्धेन पेषयेत्सुधीः ॥ स्नानं कृत्वा द्विजो वामे वश्ये वश्येन्द्रियः प्रिये ॥ १७३ ॥
त्रिपुंड्रधारणं कृत्वा ललाटे रक्तचंदनैः ॥ श्वेतासने समाविश्य श्वेतांबरधरः स्वयम् ॥ एकोर्ध्वपादे यस्तिष्ठेद्दक्षिणस्यां मुखे कृते ॥
॥ १७४ ॥ शृणुष्व चापरं कर्म भूमिशोधनमुत्तमम् ॥ निंबपत्रं च हिंगुं च जंबीरस्य रसं मधु ॥ १७५ ॥ सप्तकूपोद्धृतं तोयं करेण
दक्षिणेन वै ॥ गोमयं नंदिनो ग्राह्यं वश्येषु भूमिलेपने ॥ १७६ ॥ चतुष्कोणयुता कार्या वश्यकर्माणि निश्चितम् ॥ स्वमूर्ध्नो रुधिरं
देवि गृह्णीयाद्वामपाणिना ॥ १७७ ॥ भृंगराजरसं सुभ्रु गोदुग्धं प्रथमं तथा ॥ मधुसिंदूरकपूरदेवदारुत्वचारसम् ॥ १७८ ॥ एक
स्मिन्सर्वमुद्धृत्य लेखनी दूर्वया तथा ॥ सप्तांगुलप्रमाणेन पृष्ठभागेन संलिखेत् ॥ १७९ ॥ पूजनं यंत्रराजस्य जगन्मातः शुभे शृणु ॥

१ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे देवदत्त फट् उच्चाटनं कुरु कुरु स्वाहेति मन्त्रं जपेत् ॥

गोदुग्धं महिषीदुग्धमजामेष्योः पयस्तथा ॥ १८० ॥ एलाफलोद्गतं तोयं कर्पूरं श्वेतचंदनैः ॥ चंदनेनोद्भृतं तैलं सूत्रं पंचकुशास्तथा ॥ १८१ ॥ कुशा एकादश प्रोक्तास्तैः स्नानं कारयेत्प्रिये ॥ श्वेतपुष्पं श्वेतगंधं श्वेतौ तंडुलसूत्रकौ ॥ १८२ ॥ सिंदरं महिषीदुग्धं तिलतैलं गुडं प्रिये ॥ पूजयेद्यंत्रराजं च महामायाप्रियं शुभे ॥ १८३ ॥ विस्तृतं न मयोक्तं वै सामान्यं कथितं शुभे ॥ अतः परं शृणुष्वाद्य विधिं धूपस्य निर्मलम् ॥ १८४ ॥ साधकानां ध्रुवं सिद्धिर्धूपेनैव प्रजायते ॥ वश्यकर्मणि वै देवि धूप एव निगद्यते ॥ १८५ ॥ धूपमाहात्म्यमतुलं डामरे कथितं मया ॥ धूपवार्तां न जानंति डामरे विमुखा नराः ॥ १८६ ॥ अर्थसिद्धिर्भवेत्तेषां विपरीते शुभानने ॥ चंदनद्वयशुंठयश्च आम्रबीजं च दाडिमम् ॥ १८७ ॥ निंबबीजत्वचा सुभ्रु देवदारु च गौरिकम् ॥ हरिद्रा गुग्गुलुः श्वेतं सर्षपं जीरकद्वयम् ॥ १८८ ॥ लवंगं मृगनाभिश्च जंबीररसमुत्तमम् ॥ पिप्पली शर्करा पित्ताघृतं मेष्याः पयश्च गोः ॥ १८९ ॥ एतान्संपेष्य कुशलो धूपं दद्यात् विचक्षणः ॥ धूपयेद् धूपमंत्रेण[2] साधको गद्गदाकृतिः ॥ १९० ॥ एकचित्तं समाधाय धूपं कुर्याद्विचक्षणः ॥ वश्यकामनया देवि दीप एव निगद्यते ॥ १९१ ॥ दीपः पैत्तलिकः कार्य्यस्तैलं निंबस्य सार्षपम् ॥ अर्कतूलिकया देवि कार्या वर्तिस्त्रयांगुला ॥ ॥ १९२ ॥ लेपयेत्पृथिवीं सुभ्रु पंचांगुलमितां शुभाम् ॥ तस्यां लिखेद्यंत्रराजं दक्षिणे पार्श्वके प्रिये ॥ १९३ ॥ लेखनी विष्णुवृक्षस्य पंचांगुलसमन्विता ॥ पूजयेद्यंत्रराजं च सिंदूरैः पीतसर्षपैः ॥ १९४ ॥ अर्कदुग्धं च गोदुग्धमजादुग्धं हारिद्रिका ॥ एभिर्यंत्रे लिखेद्देवि साधकश्चंडिकाप्रियः ॥ १९५ ॥ अस्मिन्दीपे सदा ध्यायेत्कालिकां कमलासनाम् ॥ भक्तिमुक्तिप्रदां देवि चारुहाससमन्विताम् ॥ १९६ ॥ इति ध्यात्वा महामायां पूजयेद्गंधचंदनैः ॥ शक्रादयः सुरगणा एष मंत्रे निवेदयेत् ॥ १९७ ॥ एवं दीपो मया प्रोक्तो मालायाश्च विधिं शृणु ॥ ग्रंथिता वाजिकेशेन कथिता निंबबीजिका ॥ १९८ ॥ वश्यार्थेषु विधिश्चायं मालायाः प्राणवल्लभे ॥

१–उपसर्गानशेषांस्तु महामारीसमुद्भवान् । तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ इति मंत्रेण सर्वं दद्यात् ॥ २ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ पंचोद्धारण स्वाहा ॥ इति मंत्रेण धूपयेत् ॥

चंडिकाया यंत्रराजे अर्चयित्वा च वीटकम् ॥ १९९॥ पश्चादेकैकमुत्कृत्य चर्वयेच्छनकैः सुधीः ॥ यावज्जपसमाप्तिः स्यात्तावत्तांबूल चर्वणम् ॥ २०० ॥ कोटिमंत्रं जपित्वा तु वैश्वेष्वर्धं निगद्यते ॥ ब्राह्मणे द्विगुणं देवि शूद्राणामर्द्धकार्द्धकम् ॥ २०१ ॥ स्त्रीणां च द्विगुणं प्रोक्तं यतः सा शक्तिरूपिणी ॥ जपसंख्यादशांशेन नित्यहोमं च कारयेत् ॥ २०२॥ घृतत्रयं समानीय गोदुग्धं तंडुलं तिलम् ॥ शांकुलीं यवचूर्णस्य कर्पूरं च हरिद्रिकाम् ॥ २०३ ॥ निंबकाष्ठं समानीय कृत्वा च चतुरंगुलम् ॥ शर्करामिश्रितं कृत्वा जहुयाद्भाव भक्तितः ॥ २०४॥ पंचकोणयुतं कुंडं संपूज्य विधिना ततः ॥ मंत्रो नवाक्षरः प्रोक्तो वश्ये स कथितो मया ॥ २०५ ॥ मारणे मोहने वश्ये भोजनं त्वेकमुच्यते ॥ तृतीयप्रहरे देवि भोजनं लवणं विना ॥ २०६ ॥ माषस्य द्विदलं सुभ्रु तंडुलं मिलितद्वयम्॥ गोघृतं मधुसंयुक्तं मिश्रित पयसा प्रिये ॥ २०७ ॥ अभावे भोजनं देव्या यद्यत्प्राप्तं तदेव हि ॥ भोजने क्लेशसंकर्तुः प्रयोगोऽफलदो भवेत् ॥ २०८ ॥ विधिर्वै मंत्रराजस्य कथितः प्राणवल्लभे ॥ शैवेन शाक्तविप्रेण कर्तव्यो निश्चितं प्रिये ॥ २०९ ॥ इति वश्यम् ॥ ४ ॥ स्तंभनप्रयोगो यथा—कर्तव्यदिवसात्पूर्वं स्नानार्थं चिंतयेद् बुधः ॥ दिनानि विंशतिं वामे पूर्वं कार्यो विधिस्तनोः ॥ २१० ॥ शरीर शोधनं कार्यं मदिराक्षि विनिश्चितम् ॥ योषित्[1]पादजलं कांते विवाहात्स्पर्शवर्जितम् ॥ २११ ॥ कूपत्रयं सरश्चैकं सरित्त्रितयसंगतम् ॥ एषां जलं समानीय संक्षिपेल्लोहके घटे ॥ २१२ ॥ जंबीरपत्रमेरंडहारिद्रापत्रजं जलम् ॥ पिष्ट्वा च तंडुले तोये कारयेत्स्नान मद्भुतम् ॥ २१३ ॥ प्रथमो वदरीवृक्षस्तज्जलेन स्वयं प्रिये ॥ त्रिपुंड्रधारणं कृत्वा ललाटे रक्तचंदनैः ॥ २१४ ॥ आसनं कर्बुरं कृत्वा कर्बुरांबरधृक् स्वयम् ॥ कमलासने तत्र तिष्ठेद्दक्षिणस्यां मुखे कृते ॥ २१५ ॥ शृणुष्व चापरं कर्म भूमिशोधनमुत्तमम् ॥ कदलीतोयमाम्रस्य पत्रं गुंजाफलं त्वचम् ॥ २१६ ॥ गोमूत्रं कृष्णसरसः सप्त द्विश्च यथाक्रमम् ॥ जलं द्वाभ्यां कराभ्यां च ग्राह्यं हरिणजं मलम् ॥ २१७ ॥ स्तंभने लेपयेद्भूमिं चक्राकारसमन्विताम् ॥ मृगरक्तं च कर्णोत्थं वामकर्णत्वचां प्रिये ॥ २१८ ॥ आम्र

---

१ पुरी ॥ २ विवाहदिनात् अन्यदिने पुरुषहस्तस्पर्शवर्जितायाः पतिसंगमरहितायाः स्त्रियाः पादजलमानीय ॥ ३ मृगस्य दक्षिणकर्णरक्तम् ॥ ४ मृगस्य वामकर्णत्वचाम् ॥

बर्बूरकाष्ठं च चंदनौ रक्तश्वेतकौ ॥ विजया कुटकी शुंठी सिता च सैंधवं शुभे ॥ २१९ ॥ गंगोदकेन संपेष्य लेखनी वंशसंभवा ॥ पंचांगुलप्रमाणेन कठिनग्रात्स्वयं लिखेत् ॥ २२० ॥ पूजनं यंत्रराजस्य जगन्मातः शुभे शृणु ॥ कूपोदकं समानीय मिश्रयेत्कदली जलैः ॥ २२१ ॥ कुशानि नव संबध्य मेषकेशेन निश्चितम् ॥ तेनैव स्नापयेद्यंत्रं प्रीतिपूर्वं शुभानने ॥ २२२ ॥ धूम्रपुष्पं गैरिकं च हरितालं मसूरिका ॥ गंगायः सिकताशुद्धं शुद्धं गंगोदकं प्रिये ॥ २२३ ॥ चंदनौ द्वौ मया प्रोक्तौ मेषीदुग्धं तथा प्रिये ॥ एभिः पूजा प्रकर्तव्या यंत्रराजस्य निश्चितम् ॥ २२४ ॥ विस्तृतं न मयोक्तं वै सामान्यं कथितं शुभे ॥ अतः परं शृणुष्वाद्य विधिं धूपस्य निर्मलम् ॥ २२५ ॥ साधकानां ध्रुवं सिद्धिर्धूपेनैव प्रजायते ॥ स्तंभने कारणं देवि धप एव निगद्यते ॥ २२६ ॥ धूपमाहात्म्यमतुलं डामरे कथितं मया ॥ धूपवार्तां न जानंति डामरे विमुखा नराः ॥ २२७ ॥ कथं सिद्धिर्भवेत्तेषां विपरीते शुभानने ॥ २२८ ॥ अर्कबीजं तथा पुष्पं पत्रं मूलं च काष्ठकम् ॥ लवंगं हरितालं च हिंगुगैरिकतंडुलम् ॥ २२९ ॥ बिल्वसारं गुडं तैलं सगंधीयं वचं तथा ॥ नागरं देवदारुं च पीतसर्षपजं मलम् ॥२३०॥ गोघृतं नवनीतं च सिता पूगीफलं तथा ॥ एतैर्धूपो विशेषेण कर्तव्यः प्राणवल्लभे ॥२३१॥ स्तंभने कारणं देवि दीप एव निगद्यते ॥ काष्ठदीपः प्रकर्तव्यस्तैलं कृष्णतिलस्य च ॥ २३२ ॥ निंबतैलं च श्रेष्ठोरु कर्पूरस्य रसस्तथा ॥ शणस्य वर्तिका कार्या सप्तांगुलप्रमाणिका ॥ २३३ ॥ विलेप्य पृथिवीं वामे पंचकोणयुतां शुभाम् ॥ पैप्पली लेखनी कार्या त्र्यंगुलयुता प्रिये ॥ २३४ ॥ लिखेद्यंत्रं विशालाक्षि साधकः प्रेमतत्परः ॥ शंखतोयं हरिद्रा च जंबीरस्य रसस्तथा ॥ २३५ ॥ एभिर्लिखेत्सदा यंत्रं दीपः स्थाप्यश्च दक्षिणे ॥ अंगुलत्रयसंयुक्ते पूजयेच्छ्वेतचंदनैः ॥ २३६ ॥ ध्यायेद्दीपे सदानंदकारिणीं सिंधुजां शुभाम् ॥ सावर्णिः सूर्यतनय इति मंत्रे निवेदयेत् ॥ २३७ ॥ एवं दीपो मया प्रोक्तो मालायाश्च विधिं शृणु ॥ स्तंभने स्फाटिका माला तूलिकासूत्र

१—शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते । इति मन्त्रेण सर्वं दद्यात् ॥ २ अतसीपुष्पम् ॥ ३—कल्कम् । ४ ज्ञानतोऽज्ञानतो वापि बलिपूजां तथाकृताम् । प्रीणि ह्रीं--इति धूपयेत् ॥ ५—सावर्णिः सूर्यतनयो योमनुः कथ्यतेऽष्टमः ॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥ इति मन्त्रेण निवेदयेत् ॥

ग्रंथिता ॥ २३८ ॥ चंडिकायै यंत्रराजे अर्चयित्वा च वीटकम् ॥ पश्चादेकैकमुद्धृत्य चर्वयेच्छनकैः सुधीः ॥ २३९ ॥ यावज्जप समाप्तिः स्यात्तावत्तांबूलचर्वणम् ॥ स्तंभने षोडश लक्षं वैश्येष्वर्धं निगद्यते ॥ २४० ॥ ब्राह्मणे द्विगुणं देवि शूद्राणामर्द्धकार्द्धकम् ॥ स्त्रीणां च द्विगुणं प्रोक्तं यतः सा शक्तिरूपिणी ॥ २४१ ॥ जपमेव दशांशेन नित्यहोमं च कारयेत् ॥ अजाघृतं गोघृतं तु मेषी दुग्धं च तंदुलम् ॥ २४२ ॥ तिलमैरंडबीजं च शणबीजं लवंगकम् ॥ शष्कुली चणकान्नस्य सितया मिश्रितस्य च ॥ २४३ ॥ काष्ठं चंदनवृक्षस्य नवांगुलसमन्वितम् ॥ कुंडं षट्कोणकं कृत्वा जुहुयादेकमानसः ॥ २४४ ॥ स्तंभने तु मसूरस्य द्विदलं चणकस्य च ॥ तंडुले मेलयित्वा च भोक्तव्यं साधकेन वै ॥ २४५ ॥ तृतीयप्रहरे देवि साधकेनैव निश्चितम् ॥ वर्जितं रसैराजेन कार्यसिद्धि र्भवेद् ध्रुवम् ॥ २४६ ॥ अभावे भोजनं देव्या यत्तत्प्रासं तदेव हि ॥ भोजने क्लेशसंकर्तुः प्रयोगोऽफलदो भवेत् ॥ २४७ ॥ विधिर्वै मंत्रराजस्य कथितः प्राणवल्लभे ॥ शैवेन शाक्तविप्रेण कर्तव्यो निश्चितं प्रिये ॥ २४८ ॥ इति स्तंभनम् ॥ ५ ॥ विद्वे षणप्रयोगो यथा—कर्तव्यदिवसात्पूर्वं स्नानार्थं चिंतयेद् बुधः ॥ दिनानि विंशतिं वामे पूर्वं कार्यो विधिस्तनोः ॥ २४९ ॥ शरीरशोधनं कार्यं मदिराक्षि विनिश्चितम् ॥ शिशुपादोद्भवं तोयं कूपद्वादशकं शुभे ॥ २५० ॥ तडागानांसप्तदश नदीनां च जलं तथा ॥ एतज्जलं समानीय संक्षिपेद्राजते घटे ॥२५१॥ संपेष्य तिलतैलेन स्नानं कृत्वा विशेषतः ॥ त्रिपुंड्रधारणं कृत्वा ललाटे रक्तचंदनैः ॥ २५२ ॥ विद्वेषे चासनं धूम्रं धूम्रांबरधरः स्वयम् ॥ पृष्ठपातासने तिष्ठेदुत्तरस्यां मुखे कृते ॥ २५३ ॥ शृणुष्व चापरं कर्म भूमिशोधनमुत्त मम् ॥ गैरिकं हरितालं च लवणं सैंधवं तथा ॥ २५४ ॥ कूपैकाज्जलमानीय कन्याहस्ताद्विचक्षणः ॥ पुरीषं वाजिनश्चैव मृद मारण्यसंभवाम् ॥ २५५ ॥ एभिर्विशोध्य पृथिवीं विद्वेषार्थे जपेद् बुधः ॥ उष्ट्रग्रीवोद्भवं रक्तं गृह्णीयाद्दक्षपाणिना ॥ २५६ ॥

---

१ ॐ ठंठ ऐं ह्रीं क्लीं चामुण्डायै विच्चे देवदत्त ह्रीं वाचं मुखं पदं स्तंभय स्तंभय ह्रीं जिह्वां कीलय कीलय ह्रीं बुद्धिं विनाशय विनाशय ह्रीं ॐ ठंठ स्वाहा ” इति मन्त्रं जपेत् ॥
२ पूरिका ॥ ३ लवणेन ॥

एलाफलं तेजपत्रं तत्फलं तत्त्वचा मधु ॥ अजादुग्धेन संपेष्य करोति मिश्रितं बुधः ॥ २५७ ॥ लेखनी कंटकी कार्या आम्नाये च शुभेक्षणे ॥ त्र्यंगुलस्य प्रमाणेन हस्तं कृत्वा गृहे तथा ॥ २५८ ॥ वामेनैव लिखेद्यंत्रमिष्टकार्यार्थसिद्धये ॥ एषा लेखनकौशल्या मदि राक्षि मयोदिता ॥ २५९ ॥ पूजनं यंत्रराजस्य जगन्मातः शुभे शृणु ॥ लवंगं मरिचं शुंठी कटुका त्रिफला मधु ॥ २६० ॥ एता न्पिष्ट्वा शुभे तोये पंचकूपोद्धृते तथा ॥ मिश्रितं मधुना कुर्यात्कुशा द्वादशसंमिताः ॥ २६१ ॥ बांधिता शणसूत्रेण स्नापयेच्चंडिकां प्रिये ॥ भृंगराजरसं सुभ्रु चंदनं श्वेतरक्तकम् ॥ २६२ ॥ सिंदूरं विजयापत्रमर्कमूलं पयस्तथा ॥ एभिः प्रपूजयेद्देवि यंत्रराजं विच क्षणः ॥ २६३ ॥ विस्तृतं न मयोक्तं ते सामान्यं कथितं शुभे ॥ अतः परं शृणुष्वाद्य विधिं धूपस्य निर्मलम् ॥ २६४ ॥ साध कानां ध्रुवं सिद्धिर्धूपेनैव प्रजायते ॥ विद्वेषे कारणं देवि धूप एव निगद्यते ॥ २६५ ॥ धूपमाहात्म्यमतुलं डामरे कथितं मया ॥ धूपवार्तां न जानंति डामरे विमुखा नराः ॥ कथं सिद्धिर्भवेत्तेषां विपरीते शुभानने ॥ २६६ ॥ गुग्गुलुं लोहबाणं च हरिद्रां तजमेव च ॥ हिंगुगौरिककर्पूरमांसुरीं दालकं मधु ॥ २६७ ॥ लवंगं मृगनाभिं च चंदनद्वयचूर्णकम् ॥ कटुकां पिप्पलीं देवदारुं नागरतागरौ ॥ ॥ २६८ ॥ महिषीघृतदुग्धे च सिताद्वयं गुडं प्रिये ॥ एकत्र चूर्णयेत्सर्वान् धूपं कृत्वा विधानवित् ॥ २६९ ॥ पंच मंत्रान्पठित्वा तु साधको गद्गदाकृतिः ॥ एकचित्तं समाधाय धूपं कुर्याद्विचक्षणः ॥ २७० ॥ विद्वेषे कारणं देवि दीप एव निगद्यते ॥ ताम्रदीपश्च गोमूत्रं तैलं श्वेततिलस्य च ॥ २७१ ॥ एरंडस्य तथा तैलं वर्तिः कार्या च तौलिका ॥ दशांगुलप्रमाणेन पृथ्वी लेप्या नवांगुला ॥ ॥ २७२ ॥ बर्बुरी लेखनी कार्या द्व्यंगुलत्रयनिर्मिता ॥ यवचूर्णेन वामोरु कन्यायाश्च रसेन वै ॥ २७३ ॥ लिखेद्यंत्रं प्रिये प्रेम्णा दीपः स्थाप्यश्च दक्षिणे ॥ अंगुलैकप्रमाणेन पूजयेद्रक्तचंदनैः ॥ २७४ ॥ दीपमध्ये सदा ध्यायेच्चंडिकां चण्डनाशिनीम् ॥ इति ध्यात्वा

१ जायफळ। २ दालचीनी। ३ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि। एवमेतत्त्वया कार्यमस्मद्वैरिविनाशनम् ॥ इति मन्त्रेण सर्वं दद्यात् ॥ ४ राई ॥ ५ॐ इत्थं यदा यदा बाधा दानवोत्था भविष्यति। तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयं नमः ॥ इति मन्त्रं पंचधा पठित्वा धूपयेत् ॥ ६ घृतकुमारिका।

महामायां पूजयेद्रक्तचंदनैः ॥ २७५ ॥ शूलेनं पाहि नो देवि इति मंत्रे निवेदयेत् ॥ एवं दीपो मया प्रोक्तो मालायाश्च विधिं शृणु ॥ ॥ २७६ ॥ विद्वेषे बदरीबीजग्रंथिता कीटरोमकैः ॥ माला या च मया प्रोक्ता साधकानां हिताय च ॥ २७७ ॥ चंडिकायै यंत्रराजे अर्चयित्वा च वीटिकम् ॥ पश्चादेकैकमुद्धृत्य चर्वयेच्छनकैः सुधीः ॥ २७८ ॥ यावज्जपसमाप्तिः स्यात्तावत्तांबूलचर्वणम् ॥ जपे त्रयोदशं लक्षं वैश्येष्वर्धं निगद्यते ॥ २७९ ॥ ब्राह्मणे द्विगुणं देवि शूद्राणामर्द्धकार्द्धकम् ॥ स्त्रीणां च द्विगुणं प्रोक्तं यतः सा शक्तिरूपिणी ॥ २८० ॥ जपांते तद्दशांशेन नित्यहोमं च कारयेत् ॥ गोघृतं तिलतैलं च यवं कृष्णतिलाः प्रिये ॥ २८१ ॥ द्विदलं चणकस्यैव कर्पूरं चंदनं जतु ॥ देवदारु वचा दालमर्ककाष्ठं शुभानने ॥ २८२ ॥ दुग्धमुरूथवृक्षस्य हिंगु गैरिकमेव च ॥ काष्टं पंचांगुलमितं कुर्यात्कुंडं त्रिकोणतः ॥ २८३ ॥ जुहुयाद्वारुणीं पश्चात्साधको विमलाशयः ॥ मंत्रो नवाक्षरः प्रोक्तो विद्वेषे कथितो मया ॥ ॥ २८४ ॥ विद्वेषे भोजनं कार्यं दवि गोधूमतंडुलौ ॥ मुनिवृक्षस्य द्विदलं सैंधवेन युतं प्रिये ॥ २८५ ॥ अभावे भोजनं देवि यत्तत्प्रासं तदेव हि ॥ भोजने क्लेशसंकर्तुः प्रयोगोऽफलदो भवेत् ॥ २८६ ॥ विधिर्वै मंत्रराजस्य कथितः प्राणवल्लभे ॥ शैवेन शाक्तविप्रेण कर्तव्योनिश्चितं प्रिये ॥ २८७ ॥ कार्यं विचक्षणेनैव चंडिकाकिंकरेण वै ॥ मयोक्तं देवि मंत्रस्य चंडिकायाः प्रियस्य च ॥ २८८ ॥ इति डामरे रावणकृते शतसहस्रप्रतिबद्धे चतुःषष्टितमोल्लासे नवार्णमंत्रराजषट्प्रयोगाः ॥ नवार्णमहामंत्रस्वरूपं यथा—"ॐ ऐं ह्रीं क्लीं महादुर्गे नवाक्षरीनवदुर्गे नवात्मिके नवचंडीमहामाये महामोहे महायोगनिद्रे जये मधुकैटभ विद्राविणि महिषासुरमर्दिनि धूम्रलोचनसंहंत्रि चंडमुंडविनाशिनि रक्तबीजांतके निशुंभध्वंसिनि शुंभदर्पघ्नि देवि अष्टादशबाहुके कपालखट्वांगशूलखड्गखेटकधारिणि छिन्नमस्तकधारिणि रुधिरमांसभोजिनि समस्तभूतप्रेतादियोगध्वंसिनि ब्रह्मेन्द्रादिस्तुते देवि मां रक्षरक्ष मम


१ शूलेन पाहिनो देवि पाहि खड्गेन चांबिके । घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥ इति मन्त्रेण दीपं दद्यात् ॥ २ ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे हुँ अमुकामुकेन सह विद्वेषण कुरु कुरु स्वाहा ॥ इति मंत्रं जपेत ॥ ३ दालचीनी । ४ तूर ॥

शत्रून् नाशयनाशय ह्रीं फट् हूं फट् ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे" महामंत्रः ॥ अस्य विधानम् । ऋष्यादिकं न्यासादिकं च पूर्ववत् कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ अरुणकमलसंस्था तद्रजःपुंजवर्णा करकमलधृतेष्टाभीतियुग्मांबुजा च ॥ मणिमुकुटविचित्रालंकृता कल्पजातैर्भवतु भुवनमाता संततं श्रीः श्रिये नः ॥ १ ॥ इन्दुप्रख्यामिंदुखंडार्धमौलिं शंकाभीष्टाभीतिहस्तां त्रिनेत्राम् ॥ हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ॥ २ ॥ पंचाशद्वर्णभेदैर्विहितवदनयोः पादहृत्कुक्षिवक्षोदेशां भास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदाताम् ॥ अक्षस्रक्कुंभचिंतालिखितवरकरां तीक्ष्णपद्मासनस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥३॥ इति ध्यात्वा नवार्णवत् पीठपूजामावरणपूजां च कृत्वा जपं कुर्यात् ॥ अस्य संपुटितपाठहोमेऽपि आहुतिसंख्या सप्तशत्यैव ॥ इति नवार्णमहामंत्रः ॥ इति नवार्णमंत्रप्रयोगः ॥ अथ दुर्गे स्मृतामंत्रप्रयोगः॥मंत्रो यथा–"ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ॐ ह्रीं श्रीं कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीं पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम्॥ॐ ह्रीं श्रीं क्लींॐह्रींश्रींक्लीं दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥ यदंति यच्च दूरके भयं विंदति मामिह॥पवमानवितज्जहि॥दारिद्र्यदुःखभयहारिणिका त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॐ ह्रींश्रींक्लीं ॐह्रींश्रींक्लीं कांसोस्मितांहिरण्यप्राकारामार्द्रांज्वलतींतृप्तांतर्पयंती पद्मेस्थितांपद्मवर्णां तामिहोपह्वये श्रियम् ॥ ॐह्रींश्रींक्लीं चामुंडायैविच्चे" इति मंत्रः॥अस्य विधानम्॥दुर्गे स्मृता इति मंत्रस्य हिरण्यगर्भऋषिः।उष्णिक् छंदः । श्रीमहामाया देवता । शाकंभरी शक्तिः । दुर्गा बीजम् । श्रीं वायुस्तत्त्वम् । मम चतुर्विधपुरुषार्थसिद्ध्यये जपे विनियोगः ॥ ॐ हिरण्यगर्भऋषये नमः शिरसि ॥ १ ॥ उष्णिक्छंदसे नमः मुखे ॥ २ ॥ श्रीमहामायादेवतायै नमः हृदि ॥ ३ ॥ शाकंभरीशक्तये नमः दक्षिणस्तने ॥ ४ ॥ दुर्गाबीजाय नमः वामस्तने ॥ ५ ॥ श्रीं वायुतत्त्वाय नमः हृदि ॥ ६ ॥ विनियोगाय नमः सर्वांगे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ दुर्गे स्मृता हरसि भीतिमशेषजंतोः अंगुष्ठाभ्यां नमः ॥ १ ॥ स्वस्थैः स्मृता मतिमतीव शुभां ददासि तर्जनीभ्यां नमः ॥ २ ॥ यदंति यच्च दूरके भयं विंदति मामिह मध्यमाभ्यां नमः ॥ ३ ॥ पवमानवितज्जहि अनामिकाभ्यां नमः ॥ ४ ॥

दारिद्र्यदुःखभयहारिणि का त्वदन्या कनिष्ठिकाभ्यां नमः ॥ ५ ॥ सर्वोपकारकरणाय सदार्द्रचित्ता करतलकरपृष्ठाभ्यां नमः ॥ ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्यतिहारि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ ११ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य योनिमुद्रया नत्वा जपं कुर्य्यात् । महत्कार्ये लक्षमयुतं सहस्रमष्टोत्तरशतं जप्त्वा सकलकार्य्यसिद्धिर्भवति दशांशक्षीराज्य हवनं दशांशतर्पणमार्जनसुवासिनीब्राह्मणभोजनं च कुर्य्यात् ॥ इति दुर्गेस्मृतामंत्रप्रयोगः ॥ अथ शूलिनीदुर्गामंत्रविधानम् । उक्तं च शारदातिलके । मंत्रो यथा–"ॐज्वलज्वल शूलिनि दुष्टग्रहान् हुँफट्स्वाहा" इति पंचदशाक्षरो मंत्रः ॥ अस्य विधानम् ॥ ॐ अस्य श्रीशूलिनीदुर्गामंत्रस्य दीर्घतमा ऋषिः । ककुप् छंदः । शूलिनीदुर्गा देवता । सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ दीर्घतमऋषये नमः शिरसि ॥ १ ॥ ककुप्छंदसे नमः मखे ॥ २ ॥ शूलिनीदुर्गादेवतायै नमः हृदि ॥ ३ ॥ विनियोगाय नमः सर्वांङ्गे ॥ ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ शूलिनि दुर्गे हुंफट् अंगष्ठाभ्यां नमः ॥ १ ॥ ॐ शूलिनि वरदे हुंफट् तर्जनीभ्यां स्वाहा ॥ २ ॥ ॐ शूलिनि विंध्यवासिनि हुंफट् मध्यमाभ्यां वषट् ॥ ३ ॥ ॐ शूलिन्यसुरमर्दिनि युद्धप्रिये त्रासय हुंफट् अनामिकाभ्यां हुम् ॥ ४ ॥ ॐ शूलिनि देवसिद्धिसुपूजिते नंदिनि रक्षरक्ष महायोगेश्वरि हुँफट् कनिष्ठिकाभ्यां फट् ॥ ५ ॥ इति करन्यासः ॥ ॐ शूलिनि दुर्गे हुँफट् हृदयाय नमः ॥ १ ॥ ॐ शूलिनि वरदे हुं फट् शिरसे स्वाहा ॥ २ ॥ ॐ शूलिनि विंध्यवासिनि हुँफट् शिखायै वषट् ॥ ३ ॥ ॐ शूलिन्यसुरमर्दिनि युद्धप्रिये त्रासय हुं फट् कवचाय हुम् ॥ ४ ॥ ॐ शूलिनि देवसिद्धिसुपूजिते नंदिनि रक्ष रक्ष महायोगेश्वरि हुं फट् अस्त्राय फट् ॥ ५ ॥ इति हृदयादिपंचांगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ अध्यारूढां मृगेन्द्रं सजलजलधरश्यामलां पद्महस्तैः शूलं बाणंकृपाणंत्वरिजलजगदाचापपाशान्वहंतीम् ॥ चंद्रोत्तंसां त्रिनेत्रां चतसृभिरसिमत्खेटकं बिभ्रतीभिः कन्याभिः सेव्यमानां प्रतिभटभयदां शूलिनीं भावयामि ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादि

पीठदेवताः दुर्गाः पद्धतिमार्गेण संस्थाप्य नवपीठशक्तीः पूजयेत् ॥ पूर्वादिक्रमेण ॐ प्रभायै नमः ॥ १ ॥ ॐ मायायै नमः ॥ २ ॥ ॐ जयायै नमः ॥ ३ ॥ ॐ सूक्ष्मायै नमः ॥ ४ ॥ ॐ विशुद्धायै नमः ॥ ५ ॥ ॐ नंदिन्यै नमः ॥ ६ ॥ ॐ सुप्रभायै नमः ॥ ७ ॥ ॐ विजयायै नमः ॥ ८ ॥ मध्ये ॐ सर्वसिद्धिदायै नमः ॥ ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य "ॐवज्रनखदंष्ट्रायुधाय महासिंहासनाय हुं फट् नमः" इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतै रुपचारैः संपूज्य देव्या आज्ञां गृहीत्वा आवरणपूजां कुयात् ॥ तद्यथा—पुष्पांजलिमादाय मूलमुच्चार्य" ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि मे दुर्गे परिवारार्चनाय ते ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दद्यात् ॥ इत्याज्ञां गहीत्वा आवरणपूजां कुर्यात् ॥ तथा च षट्कोणकेसरेषु आग्नेयादिचतुष्कोणेषु मध्ये दिक्षु च ॥ ॐ शूलिनि दुर्गे हुं फट् हृदयाय नमः हृदयश्रीपादुकां पूजयामि तर्पयामि नमः इति सर्वत्र ॥ १ ॥ ॐ शूलिनि वरदे हुं फट् शिरसे स्वाहा शिरःश्रीपा० ॥ २ ॥ ॐ शूलिनि विंध्यवासिनि हुंफट् शिखायै वषट् शिखाश्रीपा० ॥ ३ ॥ ॐ शूलिन्यसुरमर्दिनि युद्धप्रिये त्रासय हुं फट् कवचायै हुं कवचश्रीपा० ॥ ४ ॥ ॐ शूलिनि देवसिद्धसुपूजिते नंदिनि रक्ष रक्ष महायोगेश्वरि हुं फट् अस्त्राय फट् ॥ ५ ॥ इति पंचांगानि पूजयेत् ॥ ततः

शूलिनीदुर्गापूजनयन्त्रम् ।



पुष्पांजलिमादाय 'मूलमुच्चार्य्य अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्' ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घोद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् इति प्रथमावरणम् ॥ १ ॥ ततः पूज्यपूजकयो रंतराल प्राचीं तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण । ॐ दुर्गायै नमः । दुर्गाश्रीपा० ॥१॥ ॐ वरदायै नमः । वरदाश्रीपा० ॥२॥ विंध्यवासिन्यै नमः । विंध्यवसिनी श्रीपा० ॥ ३ ॥ ॥ ॐ असुरमर्दिन्यै नमः । असुरमर्दिनीश्रीपा० ॥ ४ ॥ ॐ युद्धप्रियायै नमः । युद्धप्रिया श्रीपा० ॥५॥ ॐ देवसिद्धपजितायै नमः । देवसिद्धपूजिताश्रीपा० ॥६॥ ॐ नंदिन्यै नमः । नंदिनीश्रीपा० ॥७॥ ॐ महायोगेश्वर्य्यै नमः महायोगेश्वरीश्रीपा० ॥८॥ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति द्वितीयावरणम् ॥२॥ ततः पत्राग्रेषु तदस्त्राणि पूजयेत् ॥ तद्यथा—चक्राय नमः ॥ १ ॥ ॐ शंखाय नमः ॥२॥ ॐ खड्गाय नमः ॥ ३ ॥ ॐ गदायै नमः ॥ ४ ॥ ॐ चापाय नमः ॥ ५ ॥ ॐ त्रिशूलाय नमः ॥ ६ ॥ ॐ बाणेभ्यो नमः ॥ ७ ॥ ॐ पाशाय नमः ॥ ८ ॥ इत्यष्टास्त्राणि पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं च दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं पंचदशलक्षजपः ॥ सर्पिषान्नेन दशांशतो होमः ॥ तत्तद्दशांशेन तर्पणं मार्जनं ब्राह्मणभोजनं च कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो भवति ॥ सिद्धे च मंत्रे मंत्री प्रयोगान् साधयेत् । तथा च—"मनुमेनं जपेन्मंत्री वर्णलक्षं विचक्षणः ॥ सर्पिषान्नेन वा होमस्तद्दशांशमितो भवेत् ॥ १ ॥ इत्थं जपादिभिः सिद्धं कुर्य्यात्कर्म निजेप्सितम् ॥ अष्टोत्तर सहस्रं यस्तिलैस्त्रिमधुरप्लुतैः ॥ नित्यं प्रजुहुयात्तस्य शक्तिः स्यादतिमानुषी ॥ २ ॥ अष्टोत्तरशतं नित्यं सर्पिषा जुहुयान्नरः ॥ वांछितं वत्सरादर्वाक् प्राप्नोति महतीं श्रियम् ॥ ३ ॥ पूर्वं होमो भवेन्नणां सर्ववांछितसिद्धिदः ॥ छुरिकाद्यानि शस्त्राणि जप्तानि मनुना मुना ॥ ४ ॥ संसिक्ताज्यविलिप्तानि वितरंति जयश्रियम् ॥ अश्वत्थार्कसमिद्भिर्वा तिलैर्वा मधुरोक्षितैः ॥ ५ ॥ होमो वै दिशति क्षिप्र मीप्सितान्मांत्रिणो वरान् ॥ उद्यदायुधहस्तां तां देवीं कालघनप्रभाम् ॥ ६ ॥ ध्यात्वात्मानं जपेन्मंत्रं स्पृष्ट्वा तं मुंचति ग्रहः ॥ सर्पा

खवृश्चिकादीनां विषमाशु विनाशयेत् ॥ ७ ॥ मनुनानेन विधिवन्मंत्रविद्देवताधिया ॥ मंत्रेणानेन संजप्ताम्बाणानादाय योधकः ॥
॥ ८ ॥ विमुंचेत्प्रतिसेनायां सा द्रुतं विद्रुता भवेत् ॥ शूलपाशधरां देवीं ध्यात्वात्मानमनाकुलः ॥९॥ प्रविशेद्युद्धदेशं यो जित्वायाति स
निर्व्रणः ॥ जुहुयात्तिलसिद्धार्थैर्लक्षमेकं यथाविधि ॥ १० ॥ नामयुक्तं जपेन्मंत्रं वश्यासौ मतिमेष्यति ॥ गुटिकां गोमयोत्पन्नां हुत्वा
ष्टशतसंख्यया ॥ ११ ॥ सप्ताहात्कुरुते मंत्री विद्वेषं त्विधयोर्मिथः ॥ गृहीत्वा गोमयं व्योम्नि त्रिसहस्रं जपेत्पुनः ॥ १२ ॥ गमि
ष्यति द्वारदेशे निखातं स्तंभकृद्भवेत् ॥ बहुनोक्तेन किं सर्वं साधयेन्मनुनाऽमुना ॥ १३ ॥ इति शूलिनीदुर्गामंत्रप्रयोगः ॥ अथ
दुर्गासप्तशतीप्रयोगः ॥ तत्रादौ चरित्रत्रयरहस्यत्रयानिर्णयो रुद्रयामले ॥ “प्रथमं चरितं प्रोक्तं मधुकैटभघातनम् ॥ द्वितीयं विद्धि चरितं
महिषासुरघातनम् ॥ १ ॥ उत्तरं चरितं ज्ञेयं शुंभदैत्यवधान्वितम् ॥ चरितानि जपेत्त्रीणि सरहस्यान्यतंद्रितः ॥ २ ॥ (रहस्यं मंत्रां
त्याध्यायद्वयं त्रयं वा) चरितं मध्यमं वापि जपेद्वा चंडिकामयम् ॥ नमो देव्या इमं मंत्रं जपेद्वा कालिकाप्रियम् ॥” इति मार्कण्डेय
लिखितत्वेन प्रसिद्धे ग्रंथे तूक्तम् ॥ अथ दुर्गापाठक्रमः ॥ आधारे स्थापयित्वा तु पुस्तकं वाचयेत्ततः ॥ हस्ते संस्थापनाद्देवी हस्यर्धं हि
फलं यतः ॥ ३ ॥ पुस्तके वाचनं हस्तं सहस्रादधिकं यदि ॥ ततो न्यूनस्य तु भवेद्वाचनं पुस्तकं विना ॥ ४ ॥ न स्वयं लिखितं
स्तोत्रं न ब्राह्मणलिपिं पठेत् ॥ न च स्वयंकृतं स्तोत्रं तथाऽन्येन च यत्कृतम् ॥ ५ ॥ यतः करभौ प्रशंसंति ऋषिभिर्भाषितं तु
यत् ॥ अनुक्रमात्पठेदेवं शिरःकंपादिकं त्यजेत् ॥ पठ्यमानाध्यायमध्ये विरामो यदि वा भवेत् ॥ पुनरध्यायमारभ्य पठेत्सर्व
मुदारधीः ॥ ७ ॥ प्रणवं पूर्वमुच्चार्य स्तोत्रं वा संहितां पठेत् ॥ अंते च प्रणवं दद्यादित्युवाचादिपरुषः ॥ ८ ॥ न मानसं पठेत्स्तोत्रं
वाचिकं तु प्रशस्यते ॥ नानेन सदृशं स्तोत्रं विद्यते भुवनत्रये ॥ ९ ॥ ततश्चानेन देवेशी स्तूयते प्रत्यहं नरैः ॥ धर्मार्थकाममोक्षाणा
मालयो जायते नरः ॥१०॥ सप्तशतीपाठेऽगषट्कस्य मुख्यतामपठने दोषं चाह—“अंगहीनो यथा देही सर्वकर्मसु न क्षमः ॥ अंगषट्क
विहीना तु तथा सप्तशती स्तुतिः ॥ ११ ॥ तस्मादेतत्पठित्वैवं जपेत्सप्तशतीं पराम् ॥ अन्यथा शापमाप्नोति हानिं चैव पदे पदे ॥ १२ ॥

रावणाद्याः स्तोत्रमेतदंगहीनं निषेविरे ॥ हता रामेण ते यस्मान्नांगहीनं पठेत्ततः ॥ १३ ॥ अंगषट्कं विजानीयात्कवचार्गलकीलकैः ॥
रहस्यत्रितयेनैव सहितैर्मनुजेश्वर ॥ १४ ॥ सप्तशतीपाठे कवचार्गलाकीलकानामावश्यकतामाह ॥ उक्तं च देवीमाहात्म्ये—पुरा दश
मुखो ब्रह्मन्दिव्यमानो विहायसि ॥ गच्छन्नत्यूर्ध्वमार्गः सन्सर्वदिक्षु विचारयन् ॥ १५ ॥ भुवि सप्तशतीमालापरायणपरं द्विजम् ॥
अवतीर्य समालोक्य किमिदं पठ्यते द्विज ॥ १६ ॥ इत्युक्त्वा प्रददौ छत्रं संतुष्टस्तु द्विजोत्तमः ॥ स्वपुस्तकं दशास्याय प्रददौ भक्ति
दायकः ॥ १७ ॥ आदाय रावणो दृष्ट्वा शाकंभर्या मनुस्तवम् ॥ भीमास्तद्दृष्टिः सन् स्तोत्रमयाकृष्याविशेषितम् ॥ १८ ॥ देवब्रह्म
स्तुतियुतं चरित्रत्रितयान्वितम् ॥ संपूज्य पुस्तकं पाठाद्देवास्तु निधनं गताः ॥ १९ ॥ आरुण्याख्यस्ततो दैत्यस्त्रैलोक्यं चातिपीडयत् ॥
ततो देवा ऋषिस्तोत्रं विना सप्तशतीमनुम् ॥ २० ॥ जपंतस्तु महाकालं महादेवीमुपासत ॥ अप्रसन्ना महादेवी देवा ब्रह्माणमाययुः ॥ २१ ॥
शनैर्विष्णुं शनैः शंभुं दृष्ट्वा सर्वं व्यबोधयन्॥ईश्वरस्तान् समालोक्य कवचार्गलकीलकैः॥२२॥सहसप्तशतीमालामहातंत्रमुपादिशत्॥ ततः
प्रसन्ना श्रीदेवी भ्रामरं रूपमाश्रिता ॥ २३ ॥ अनेकभ्रमरैः सार्धमरुणाख्यं महासुरम् ॥ हत्वा ब्रह्मादिदेवानां भीतानामभयं ददौ ॥२४॥
ब्रह्मा मृकंडुपुत्राय सुरथाय समाधये ॥ मार्कंडेयाय ताभ्यां च प्रसन्ना जगदंबिका ॥ २५ ॥ जय त्वं च जयंती च श्लोकद्वितयमर्गलम् ॥
मधुकैटभविद्राविविधात्रीति नवार्णकम् ॥ २६ ॥ कीलकं शंकरप्रोक्तं कवचं ब्रह्मणा कृतम् ॥ अर्गलं विष्णुना प्रोक्तमेतत्त्रितयमुत्तमम्
॥ २७ ॥ अर्गलाकीलके चादौ पठित्वा कवचं पठेत् ॥ जपेत्सप्तशतीं चंडीं क्रम एष शिवोदितः ॥ २८ ॥ अर्गला दुरितं हंति कीलकं
फलदं भवेत् ॥ कवचं रक्षयेन्नित्यं तस्मादेतत्त्रयं पठेत् ॥२९॥ अर्गला हृदये यस्य तस्मादर्गलवानसौ ॥ भविष्यति न संदेहो नान्यथा
शिवभाषितम् ॥ ३० ॥ कीलकं हृदये यस्य स कीलितमनोरथः ॥कवचं हृदये यस्य स वज्रकवचः प्रभुः॥३१॥ (कामनापरत्वेन चंडीपाठ
संख्या वाराहीतंत्रे) ॥ शिव उवाच ॥ चंडीपाठफलं देवि शृणु त्वं गदतो मम ॥ एकावृत्त्यादिपाठानां यथावत्कथयाम्यहम् ॥३२॥ संकल्प

१ ईश्वरः शिवः तान् देवान् दुःखितान् समालोक्य प्रथमं कवचं ततः अर्गलां ततः कीलकं ततः सप्तशतीपठनमिति क्रमेण महातंत्ररूपं दुर्गापाठमुपादिशत ॥

पूर्वं संपूज्य न्यस्यांगेषु मनून्सकृत् ॥ पश्चाद्बलिप्रदानेन फलमाप्नोति मानवः ॥३३॥ उपसर्गोपशांत्यर्थं त्रिरावृत्तिं पठेन्नरः ॥ गृहोपशांतौ कर्तव्या पंचावृत्तिर्वरानने ॥ ३४ ॥ महाभये समुत्पन्ने सप्तावृत्तिमुदीरयेत् ॥ नवावृत्तौ भवेच्छांतिर्वाजपेयफलं व्रजेत् ॥ ३५ ॥ राजवश्याय भूत्यै च रुद्रावृत्तिमुदीरयेत् ॥ अर्कावृत्त्या काम्यसिद्धिर्वैरिहानिश्च जायते ॥ ३६ ॥ मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्री वशतामियात् ॥ सौख्यं पंचदशावृत्त्या श्रियमाप्नोति मानवः ॥ ३७ ॥ कल्पावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः ॥ राजभीतिविनाशाय विपक्षोच्चाटनाय च ॥ ३८ ॥ कुर्यात्सप्तदशावृत्तिं तथाष्टदशकं प्रिये ॥ महाऋणविमोक्षाय विंशावृत्तिं पठेन्नरः ॥ ३९ ॥ पंचविंशावर्तनाद्धि भवेद्बंधविमोक्षणम् ॥ संकटे समनुप्राप्ते वृश्चिकस्यामये सदा ॥ ४० ॥ जातिध्वंसे कुलोच्छेदे ह्यायुषो नाशमागते ॥ वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ॥ ४१ ॥ तथैव त्रिविधोत्पाते तथा चैवातिपातके ॥ कुर्याद्यत्नाच्छतावृत्तिं ततः संपद्यते शुभम् ॥ ४२ ॥ विपदस्तस्य नश्यंति अंते याति परां गतिम् ॥ जयवृद्धौ शतावृत्त्या राजवृद्धौ सदा पठेत् ॥ ४३ ॥ मनसा चिंतिता देवि सिद्धिरष्टोत्तराच्छतात् ॥ शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ॥ ४४ ॥ सहस्रावर्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ॥ भुक्त्वा कामान्यथाकामं नरो मोक्षमवाप्नुयात् ॥ ४५ ॥ यथाश्वमेधः क्रतुषु देवानां च यथा हरिः ॥ स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ॥ ४६ ॥ नातः परतरं स्तोत्रं किंचिदस्ति वरानने ॥ भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ॥ ४७ ॥ अथवा बहुनोक्तेन किमन्येन वरानने ॥ पंचाशदावृत्तिपाठात्सर्वाः सिध्यंति सिद्धयः ॥ ४८ ॥ (अथ सप्तशत्याः शापोद्धारोत्कीलने कात्यायनीतंत्रे) त्रयोदशाध्यायं पठित्वा प्रथमं पठेत् । ततो द्वादशद्वितीयौ तत एकादशतृतीयौ चतुर्थदशमौ पंचमनवमौ षडष्टमौ सप्तमं द्विवारमिति पाठेन शापोद्धारः ॥ ४९ ॥ अन्यच्च—ॐ ह्रीं क्लीं श्रीं क्रां क्रीं चंडिकादेव्यै शापानुग्रहं कुरु कुरु स्वाहा इति पाठादौ सप्तवारं जपेदिति शापोद्धारः ॥ ५० ॥ अथोत्कीलनम् ॥ इत्थं रूपेण कीलेन महादेवेन कीलितमिति सप्तशतीस्तोत्रे शिवशापतदुद्धारः । प्रथमं मध्यमचरित्रं पठित्वा ततः प्रथमतृतीयौ पठेदित्युत्कीलनमिति क्वचित् दृश्यते ॥ ५१ ॥ अन्यच्च—कीलकं मध्यमादौ च पश्चात्कवचमेव च ॥

प्रथमं चरितं जप्त्वा ततश्चरितमुत्तमम् ॥ ५२ ॥ ततः परं चार्गलां च कीलकं च ततः परम् ॥ एवमुत्कीलनं प्रोक्तं पुरातनमहार्षिभिः ॥ ५३ ॥ अन्यच्च–ॐ श्रीं क्लीं ह्रीं सप्तशतिचंडिके उत्कीलनं कुरु स्वाहा ॥ पाठादौ एकविंशतिर्जपे तदोत्कीलनम् ॥ ५४ ॥ अथ जाग्रत्करणम् ॥ 'ॐ रं सं मूलं रं क्षं ॐ' इति सप्तवारजपेन जाग्रद्विया भवति । (इति सप्तशती स्तोत्रांतर्गतमंत्राणां कामनापरत्वेन संपुटनिर्णयः ॥) रात्रिसूक्तं जपेदादौ मध्ये सप्तशतीस्तवम् ॥ अंते च देवीसूक्तानि रहस्यं तदनंतरम् ॥ ५५ ॥ चरिते चरिते राजञ्जपेन्मंत्रं नवाक्षरम् ॥ शतमादौ शतं चांते विधानेन तु सुव्रत ॥ ५६ ॥ अन्यच्च—जपेन्नवाक्षरं मंत्रमथवाष्टोत्तरं शतम् ॥ शतमादौ शतं चांते मध्ये सप्तशतीं जपेत् ॥५७॥ अन्यच्च–महामायामनोरादौ चरितस्यादितोऽपि वा ॥ प्रत्यध्यायसमारंभे तत्समाप्तौ जपेत्तथा ॥ ५८ ॥ प्रतिश्लोकादितो यद्वा तदंते वा पठेन्नरः ॥ नवार्णमनुना सार्धं संपुटोऽयमुदाहृतः॥ सकामः संपुटो जाप्यो निष्कामः संपुटं विना ॥ ५९ ॥ कात्यायनीतंत्रे प्रतिश्लोकमाद्यंतयोः प्रणवेन जपेन्मंत्रसिद्धिः ॥६०॥ अन्यच्च–सप्तव्याहृतिपूर्वकं श्लोकं कृत्वा महास्तोत्रं जपेन्मंत्रसिद्धिः ॥ ६१ ॥ अन्यच्च—सव्याहृतिकां गायत्रीमादावंते वा कृत्वा श्लोकं जपेत् तदा महाफलम् ॥ ६२ ॥ अन्यच्च–प्रतिश्लोकं व्याहृतित्रययुतां गायत्रीं जपेत् तदा महाफलम् ॥ ६३ ॥ अन्यच्च—प्रतिश्लोकमादावंते "जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः॥ स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः" इति ऋचं जपेत् सर्वकामसिद्धिः ॥६४॥ अन्यच्च–ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ॥ स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधु दुरितात्यग्निः ॥ ॐ त्र्यंबकं यजामहे सुगंधिम्पुष्टिवर्धनम् ॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥ इति शताक्षरत्र्यंबकमंत्रेण संपुटीकृत्य मंत्रं पठेत् ॥ रोगारिक्षयमृत्यून्मूलनं सर्वापद्विनिवारणमभीप्सितप्राप्तिः ॥ ६५ ॥ अन्यच्चप्रतिश्लोकम्–शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्त्तिहरे देवि नारायणि नमोऽस्तु ते ॥ इति श्लोकं पठेत् सर्वकार्यसिद्धिः ॥ ६६ ॥ अन्यच्च प्रतिश्लोकम्–करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः ॥

इत्यर्धं पठेत् सर्वकामाप्तिः ॥ ६७ ॥ अन्यच्च प्रतिश्लोकम्—एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ इत्याद्यंतं पठेत् स्वाभीष्टवरप्राप्तिः ॥ ६८ ॥ अन्यच्च—दुर्गे स्मृता हरासि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥ दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् । सर्वापत्तिनिवारणं स्यात् ॥ ६९ ॥ अन्यच्च—ॐ कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलंती तृप्तां, तर्पयंतीम् ॥ पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ इति ऋचं प्रतिश्लोकाद्यंतं पठेत् । लक्ष्मीप्राप्तिः ॥ ७० ॥ अन्यच्च—ॐ अनृणा इत्यादि ऋचं प्रतिश्लोकाद्यंतं पठेत् । ऋणपरिहारः ॥ ७१ ॥ अन्यच्च—ॐ शब्दात्मिका सविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम् ॥ देवि त्रयी भगवती भवभावनाय वार्तासि सर्वजगतां परमार्तिहंत्री ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥ सुखप्राप्तौ दारिद्र्यदुःखभयमोचने च ॥ ॥ ७२ ॥ अन्यच्च—सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ॥ मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥ धनधान्यसुखप्राप्तिः ॥ ७३ ॥ अन्यच्च-या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् । मनउत्सवप्राप्तिः ॥ ७४ ॥ अन्यच्च—ॐ धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥ स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् । सकलकर्मसुकृतप्राप्तिः ॥ ७५ ॥ अन्यच्च—ॐ त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् । सर्वकार्यसिद्धिः ॥ ७६ ॥ अन्यच्च—ॐ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥ प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् । सर्वापन्निवृत्तिः—सर्वकामाप्तिश्च । एषु प्रयोगेषु प्रतिश्लोकं दीपाग्रे नमस्कारकरणे अतिशीघ्रं सिद्धिः॥७७॥ अन्यच्च—ॐ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान्॥त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् । सकलरोगनाशः स्यात्॥७८॥ अन्यच्च—सर्व

नाशने—उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥ तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् । सर्वबाधानाशः स्यात् ॥७९॥ अन्यच्च-मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसंगा ॥ श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् वाक्सिद्धिः ॥ ८० ॥ अन्यच्च स्तवने—ॐ सर्वमंगल मांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥ ८१ ॥ अन्यच्च-भय मोचने—ॐ ज्वालाकरालमत्युग्रमशेषासुरसूदनम्॥त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते॥इति श्लोकं प्रतिश्लोकाद्यंतं पठेत्॥८२॥ अन्यच्च—दुःखस्वप्नपीडापरिहारे—शांतिकर्माणि सर्वत्र तथा दुःस्वप्नदर्शने॥ ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥८३॥अन्यच्च परप्रयोगशमने—ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः ॥ आजघान शरैर्देवि कालीं केसरिणं तथा ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥८४ ॥ अन्यच्च अपद्वेषनाशने—तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥ भवतां नाशयिष्यामि तत्क्षणात्परमापदः ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥८५॥ अन्यच्च मारणार्थे—ॐ एवमुक्त्वा समुत्पत्य सारूढा तं महासुरम् ॥ पादेनाक्रम्य कंठे च शूलेनैनमताडयत्॥ इति श्लोकं प्रति श्लोकाद्यंतं पठेत्॥८६॥अन्यच्च शत्रुपरिहारे--त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समर मूर्धनि तेऽपि हत्वा॥नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते॥इति श्लोकं प्रतिश्लोकाद्यंतं पठेत्॥८७॥ अन्यच्च-शत्रुपराभवार्थे । ॐ या देवीसर्वभूतेषु क्षांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥८८॥ अन्यच्च-शत्रुमुखस्तंभनं पुत्रप्राप्तिश्च ॥ स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ॥ मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥ ८९ ॥ अन्यच्च विषमचित्तशमने—पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥ ९० ॥ अन्यच्च—ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत्त्ववश्यं मोहनं च इत्यनुभवसिद्धम् ॥ ९१ ॥

अन्यच्च-ॐरक्तचामुंडे तुरुतरु अमुकं मे वशमानय स्वाहा। अनेन प्रत्यध्यायमाद्यंतयोः पूजा सर्वांते अयुतं जपाः अयुतमंत्रैश्च होमयेत्। कटुतैलेन रक्तचंदनराजिकासहस्राहुतिमंत्रेण राजानं वशमानयेत्। मधुनाशोकपुष्पैश्च रात्रौ हुत्वा तु पूर्ववत् ॥ चक्रवर्ती भवेद्वश्यश्चंडीमंत्रप्रभावतः॥अंते शतं ब्राह्मणाः कुमार्यश्च भोजनीयाः ॥ ९२ ॥ अन्यच्चराजवश्ये—तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ममास्य च भवत्येषा विवेकांधस्य मूढता ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत् ॥ ९३ ॥ अन्यच्च दुर्जनमोहने–ॐ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ इति श्लोकं प्रतिश्लोकाद्यंतं पठेत ॥ ९४ ॥ अन्यच्च—वैरिमोहने–ॐ सैषा प्रसन्ना वरदा नृणां भवति मक्तये ॥ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥९५॥ इति श्लोक प्रति श्लोकाद्यंतं पठेत् अन्यच्च-ॐ मम वैरिवशं यतः कान्भोगानुपलप्स्यते ॥ ये ममानुगता नित्यं प्रसादधनभोजनैः॥इति श्लोके प्रतिश्लोकं संपुटिते श्लोकोक्तं फलम् ॥ ९६ ॥ अन्यच्च-ॐ इत्युक्ता सा तदा देवी गंभीरांतः स्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥ इति प्रतिश्लोकपाठे विद्याप्राप्तिः वाग्वैकृतनाशश्च ॥ ९७ ॥ अन्यच्च मनईप्सिताप्राप्त्यै गतप्रयोगप्राप्त्यै च—परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥इत्यर्धं पठेत् ॥ ९८ ॥ अन्यच्च देवीसंतोषप्राप्त्यै–स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ इति पठेत् ॥ ९९ ॥ अन्यच्च-प्रतिमंत्रं प्रणव (ॐ) पुटितं जपेत् शीघ्रतरकार्यसिद्धिः। अत्र त्रिमध्वाक्तकमलैर्होमः अत्र विप्रतीर्थतोयैर्वा ब्राह्मणभोजनांते मार्जनं कुर्यात् ॥ १०० ॥ अन्यच्च-माया (ह्रीं) श्री (श्रीं) कामेन (क्लीं) पुटिते सर्वेष्टसिद्धिः ॥ १०१ ॥ अन्यच्च-प्रतिश्लोकं कामबीज (क्लीं) संपुटितस्यैकचत्वारिंशद्दिनानि त्रिरावृत्तौ पुत्रप्राप्तिः एकविंशतिदिनपर्यंतमुक्तरीत्या प्रत्यहं पंचावृत्त्या वशीकरणम् ॥ आकर्षणार्थे द्विचत्वारिंशद्दिनपर्यंतं कामपुटितस्य दशावृत्तिः ॥ १०२ ॥ अन्यच्च-मायाबीज (ह्रीं) पुटितस्य फट्पल्लवसहितस्य त्रिसप्तदिनपर्यंतं त्रयोदशावृत्तौ उच्चाटनसिद्धिः। तादृशस्यैव चतुश्चत्वारिंशद्दिनपर्यंतं सर्वोपद्रवनाशः स्यात्॥१०३॥ अन्यदेकोनपंचाशद्दिनपर्यंतं प्रतिश्लोकम् (श्रीं) इति श्रीबीजसंपुटितस्य पंचदशावृत्तौ लक्ष्मीप्राप्तिः सद्यो मोहन

सिद्धिश्च ॥१०४॥ अन्यत् प्रतिश्लोकम्–(मैं) बीजसंपुटितस्य शतावृत्त्या विद्याप्राप्तिः ॥१०५॥ अन्यच्च-मायादौ कूर्चबीजेन संपुटितस्य एकादशवृत्तौ सर्वोपद्रवनाशः स्यात् ॥१०६॥ (कार्यपरत्वेन सप्तशतीस्तोत्रांतर्गतप्रतिश्लोकप्रयोगेणाह) ॐ दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि॥दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता॥अस्य केवलस्यापि श्लोकस्य कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपात् सर्वापत्तिनिवारणं स्यात्॥१॥अन्यच्च-ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि॥ अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ इति मंत्रस्य लक्षजपे पुनः स्वराज्यप्राप्तिः ॥२॥ अन्यच्च–ॐ दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि।यदंति यच्च दूरके भयं विंदति मामिह। पवमानवितज्जहि। दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता ॥ इति कार्यानुसारेण लक्षमयुतं सहस्रं शतं वा जपात् सर्वापत्तिनिवारणं स्यात् ॥ ३ ॥ अन्यच्च— ॐ भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥ यदयं निहतः शत्रुरस्माकं महिषासुरः ॥ यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥ संस्मृतासंस्मृता त्वं नो हिंसेथाः परमापदः ॥ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ तस्य वित्तर्धिविभवैर्धनदारादिसंपदाम् ॥ वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदांबिके ॥ इति द्वादशोत्तरशताक्षरो मंत्रः सर्वकामदः सर्वापन्निवारणश्च ॥ ४ ॥ अन्यच्च–ॐ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥ प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ इति श्लोकस्य यथाकार्यं लक्षायुतसहस्रशतान्यतमे जपे सर्वापन्निवृत्तिः सर्वकामाप्तिश्च। इति श्लोकेन दीपाग्रे केवलमेव नमस्कारकरणे अतिशीघ्रं सिद्धिः ॥५॥ अन्यच्च–ॐ इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥ चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ ॥ इति श्लोकं त्रिंशत्सहस्रं जपेत्। संपत्समृद्धिर्भवति ॥ ६ ॥ अन्यच्च–ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः प्रणता स्म ताम् ॥ इति मंत्रेण मासं जपः दशांशेन क्षीरसंयुतैः कमलैर्होमो वा लक्ष्मीप्राप्तिः ॥ ७ ॥ अन्यच्च–ॐ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान् ॥ त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति ॥ इति लक्षं जपेत् रोगनाशः स्यात् ॥८॥ अन्यच्च–

इत्युक्ता सा तदा देवी गंभीरांतः स्मिता जगौ॥दुर्गा भगवती भद्रा ययेदं धार्यते जगत्॥ इति लक्षं जपेत् विद्याप्राप्तिः वाग्वैकृतनाशश्च ॥ ९ ॥ अन्यच्च–ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्योऽनः सुतानिव ॥ इत्यनेन सदीपबलिदानं घंटाबंधनेन बालग्रहशांतिः ॥ १० ॥ अन्यच्च–ॐ इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥ इति श्लोकस्य लक्षजपे महामारीशांतिः ॥ ११ ॥ अन्यच्च–ॐ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥ एवमेव त्वया कार्यमस्मद्वैरिविनाशनम्॥ इत्यस्य लक्षजपे श्लोकोक्तं फलं सर्वबाधाशमनं च ॥ १२ ॥ अन्यच्च–ॐ एवमुक्त्वा समुत्पात्य सा रूढा तं महासुरम् ॥ पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ॥ इति लक्षं जपेत् मारणोक्तावृत्तिभिः फलसिद्धिः ॥ १३ ॥ अन्यच्च–ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ बलादाकृष्य मोहाय महामाया प्रयच्छति ॥ इति श्लोकजपमात्रेण सद्यो मोहनमित्यनुभवसिद्धम् ॥ १४ ॥ इति ॥ (दुर्गापाठस्य नव नामानि तल्लक्षणानि च) रहस्योक्तानि नामानि ब्रह्मोक्तानि वदामि ते ॥ महाविद्या महातंत्री चंडी सप्तशतीति च ॥ मृतसंजीवनी नाम पंचमं परिकीर्तितम् ॥ १ ॥ षष्ठं चैव महाचंडी सप्तमं रूपदीपिका ॥ २ ॥ अष्टमं तु चतुःषष्टियोगिनी नवमी परा ॥ एतानि योऽभिजानाति नामानि नृपनंदन ॥ ३ ॥ जपं विना भवेत्तस्य चंडिका वरदा सदा ॥ पूर्वोक्तं नवविद्यानां स्वरूपं तत्र चोदितम् ॥ ४ ॥ आद्याद्वितीयतृतीयचरितानुक्रमेण च ॥ महाविद्या सप्तशती सर्वतंत्रेषु गोपिता ॥ ५ ॥ आद्यंतमध्यचरितं महातंत्रमितीरितम् ॥ आदिमध्यांतचारित्रक्रमाच्चंडीमहामनुः ॥ ६ ॥ मध्यमाद्यंतचारित्रक्रमात्सप्तशतीति च॥ इत्यादिमध्यचारित्रान्मृतसंजीवनी स्मृता ॥ ७ ॥ अंत्यमध्यादिचारित्रान्महाचंडीति कथ्यते ॥ रूपं देहीति संयोज्य नवार्णमनुना सह ॥ ८ ॥ संपुटत्वेन संयोज्य प्रतिश्लोकं जपेत्तथा ॥ रूपचंडीति सा प्रोक्ता सर्वाभीष्टफलप्रदा ॥ ९ ॥ योगिनीनां चतुःषष्टियोगात्सप्तशतीमनोः ॥ चतुःषष्टीति सा प्रोक्ता योगसिद्धिप्रदायिनी ॥१०॥ पराबीजसमायोगात्पराचंडीति कथ्यते ॥ एवं नवानां भेदानां नामानि च पृथक् पृथक् ॥११॥ (इति नवदुर्गाविधानम्) नवदुर्गालक्षणं यथा–प्रत्येकं तैस्त्रिभिर्बीजै

जयादिनवनामभिः ॥ जयां च विजयां भद्रां भद्रकालीमनंतरम् ॥ १ ॥ सुमुखीं दुर्मुखीं प्रज्ञां पश्चाद् व्याघ्रमुखीं तथा ॥ अथ सिंहमुखीं दुर्गां नवदुर्गां विदुर्बुधाः ॥ २ ॥ एवं ज्ञात्वा सप्तशतीं यो जपेत्सुसमाहितः ॥ तस्य देवी सुप्रसन्ना सर्वाभीष्टप्रदा भवेत् ॥ ३ ॥ अस्य विधानम्। कृतनित्यक्रियः स्वयं चंदनागुरुकुंकुमादिलिप्तांगः सुवस्त्रमाल्याद्यलंकृतः पूजास्थानं गत्वा प्राङ्मुखः स्वासने उपविश्य आचम्य प्राणानायम्य स्वेष्टदेवीं ध्यात्वा हस्ते कुशजलमादाय देशकालौ संकीर्त्य शुक्लपक्षे प्रतिपदमारभ्य नवमीपर्यंतं नवदुर्गाविधानमहं करिष्ये । इति संकल्प्य देवीं संपूज्य देव्यग्रे शालिपुंजोपरि स्वर्णादिरचितं कुंभं नवतंतुना वेष्टितं चंदनादिचर्चितं सुधूपितं सहिरण्यं वज्र मुक्ता फलपद्मरागनीलमरकतैः पंचरत्नैः समायुक्तं मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः समिति मंत्रेण धान्यराशिं स्पृष्ट्वा आजिघ्र कलश मिति कलशं संस्थाप्य इमं मे गंगे इति जलेनापूर्य तत्र कुंकुमागरुकर्पूरचंदनपंकं कुसुमानि च निःक्षिप्य तस्य मुखे आम्रदलानि निधाय तदुपरि नारिकेलफलाढ्यं सतंडुलं–कलशजातीयं पात्रं निधाय पूर्णा दर्वीति[१] मंत्रेण मंत्रयेत् । युवा सुवासा इति रक्तवस्त्रेणावेष्ट्य कुंभस्य दशादिक्षु पूर्वादिक्रमेणेंद्रादिदशदिक्पालान् संपूज्य ततः स्वर्णादिनिर्मितां देवीप्रतिमां ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य आसनमंत्रेण पुष्पाद्यासनं दत्त्वा कलशोपरि संस्थाप्य प्रतिष्ठां च कृत्वा पद्धतिमार्गेण षोडशोप चारैः संपूज्य न्यासादिकं कृत्वा सप्तशतीपाठं नवार्णमंत्रजपं च कुर्यात् । प्रत्यहमेकैकामावृत्तिं पठित्वा दशमे दिवसे वक्ष्यमाणविधिना कुंडादावग्निं संस्थाप्य प्राग्वद्धोमं कृत्वा ब्राह्मणान् कुमारिकाः सुवासिनीश्च पूजाभोजनतांबूलदक्षिणादिभिः परितोष्य प्रणम्य विसृ जेत् । अत्रापि स्वयमशक्तश्चेद्ब्राह्मणद्वारा यथोक्तविधिना जपादि कारयित्वा दक्षिणादिभिः परितोषयेदिति । अस्यैव विधानस्य कृष्ण पक्षे षष्ठ्यादिचतुर्दश्यंतं क्रियमाणस्य कालरात्रिरिति नाम उक्तम् । तथा च–कृष्णषष्ठीं समारभ्य नवदुर्गाविधानवत् ॥ यो यथा कुरुते जाप्यं कालरात्रिरुदाहृता ॥ ४ ॥ महाकालोद्भवं दुःखं कालरात्रिर्व्यपोहति ॥ नवदुर्गाविधानेऽपि यत्फलं परिकीर्तितम् ॥ काल

---

१ पूर्णादर्वी ।

रात्रिविधानेऽपि तत्फलं लभते ध्रुवम् ॥ २ ॥ इति नवदुर्गाकालरात्रिसंज्ञकनवचंडीविधानं समाप्तम् ॥ (नित्यचंडीविधानम्) ॥ नित्य चंड्यादिजाप्यस्य विधानं ते वदाम्यहम् ॥ शुक्लभूतामवष्टभ्य मासं प्रतिदिनं जपेत् ॥ १ ॥ सकृद्रहस्यसंयुक्तं चंडिकाचरितत्रयम् ॥ दशांशहोमसहितं सोच्यते नित्यचंडिका ॥ २ ॥ धनपुत्रयशोदात्री महाव्याधिविनाशिनी ॥ महाभयमहादुःखहंत्री सौख्यप्रदायिनी ॥३॥ अस्य विधानम् । कृतनित्यक्रियः पूजास्थानं गत्वा पूर्वाभिमुखः स्वासने समुपाविश्य आचम्य प्राणानायम्य स्वेष्टदेवतां स्मरन् हस्ते कुशजलमादाय देशकालौ संकीर्त्य अमुकराशिगते सवितरि शुक्लपक्षे चतुर्दश्याममुकक्षेत्रे अमुकगोत्रोऽमुकशर्माहममुकफलाप्तये अद्यारभ्य मासमात्रं नित्यचंडीजपं करिष्ये इति संकल्प्य प्राग्वत्पूजादिकं कृत्वा मूलं जपित्वा देव्या यच्चरितत्रयं नवार्णादिन्यासपूर्वकं रहस्यं सकृज्जपेत् । कवचार्गलाकीलकपूर्वकमपि पठेत् । एवमेकमासं जपित्वा मासानंतरं वक्ष्यमाणविधिना कुंडे स्थंडिले वाग्निं संस्थाप्य सघृत पायसैस्तिलभिश्चैर्मूलमंत्रस्य जपदशांशहोमपुरः सरं वक्ष्यमाणविधिना हुत्वा पूर्णाहुतिं च दद्यात् । ब्राह्मणान् कुमारिकाः सुवासिनीश्च संपूज्य भोजयित्वा तांबूलदक्षिणादिभिः परितोष्य प्रणम्य विसृजेत् । एवं स्वयं कर्तुमशक्तश्चेद्ब्राह्मणद्वारा कारयित्वा तं वस्त्रालंकारादिभिर्दक्षिणाभिर्भूयसीभिः परितोषयेत् । एतत्त्रिगुणितं सर्वं नवदुर्गाजपे फलम् ॥ कथितं तदवाप्नोति नित्यचंडिजपे कृते ॥ १ ॥ इति नित्यमासचंडिविधानम् ॥ (शीघ्रकार्यसिद्धये प्रत्यहं नवचंडिविधानम्) ॥ आदौ अनुलोमं त्रयोदशाध्यायान् पठित्वा पश्चाद्विलोमेन पठित्वा पुनः शापोद्धारवत्पठित्वा एवं क्रमेण प्रत्यहं नवचंडीं कुर्यात् । अल्पकार्ये नवदिनपर्यंतं मध्यमकार्ये एकविंशतिदिनपर्यंतं महाकार्ये त्रयस्त्रिंशद्दिनपर्यंतं मंत्रं सिद्ध्यनंतरं जपेत् । जपांते पायसतिलाज्यमधुपुष्परसजातीपत्रफलयवव्रीहिसितशर्करायुतै र्दशांशेन नवार्णपीठयुतेऽग्नौ जुहुयात् । तद्दशांशेन हरिद्राकुंकुमजलेन संतर्पयेत् । तद्दशांशेन पायसलड्डुकपंचखाद्यै[1]र्भोजयेत् । अत्र मार्जनमेवं कृते शीघ्रकार्यसिद्धिः । इति प्रत्यहं नवचंडिविधानम् ॥ (नवरात्रे वार्षिकनवचंडीविधानम्) ॥ आश्विने शुक्लपक्षे तु कर्तव्यं

१ प्रियालखंडखर्जूरैर्नारिकेलैः सगोस्तनैरिति पंचखाद्यानि ॥

नवरात्रकम् ॥ प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ॥ १ ॥ (अमावास्याद्वितीयावेधे नवरात्रं शुभाशुभम्) ॥ यो मां पूजयते नित्यं द्वितीयादिगुणान्विताम् ॥ प्रतिपच्छारदे ज्ञात्वा सोऽश्नुते सुखमव्ययम् ॥ २ ॥ यदि कुर्यादमायुक्तप्रतिपत्स्थापनं मम ॥ तस्य शापायुतं दत्त्वा भस्मशेषं करोम्यहम् ॥ ३ ॥ तत्र सा पूर्वाह्णव्यापिनी ग्राह्या (अस्य विधानम्)॥ तत्राश्विनशुक्लप्रतिपदि पूर्वाह्णे तिळतैलेन कृताभ्यंगेन यजमानः साधकः कृतनित्यक्रियः सुसंस्कृते शुभे स्थाने सुरम्ये गृहे तोरणाद्यलंकृते कदलीस्तंभमंडिते सुधूपद्रव्यधपिते सुदीपप्रकाशाढ्ये स्वासने प्राङ्मुखः समुपविश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थं सकलमनोरथफलावाप्त्यर्थं चतुर्विधपुरुषार्थसिध्यर्थं नवचंडीविधानमहं करिष्ये इति संकल्प्य गणेशपूजनादिकं कृत्वा तस्मिन्गृहे पूर्वस्यां दिशि ॐ गजारूढे कादंबरि देवि इहागच्छ इह तिष्ठ इत्यावाह्य काचित्पीठे संस्थाप्य श्रीकादंबरि एष ते गंधः ॥ १ ॥ कादंबरि इमानि ते पुष्पाणि वौषट् ॥२॥ ॐ कादंबरि एष ते धूपो नमः ॐ कादंबरि एष ते दीपो नमः ॥ ४ ॥ तदग्रे पात्रांतरे घृतशर्करासहितं पायसं नानाव्यंजनादिसहितं निधाय ॐ श्रीकादंबरि एष ते बलिर्नमः ॥ ५ ॥ इति बलिमुत्सृज्य क्षमस्वेति प्रणमेत् । तत आग्नेय्याम् ॐ अजवाहने उल्के देवि इहागच्छ इह तिष्ठ इत्युल्कामावाह्य संपूज्य बलिं दद्यात् । दक्षिणे ॐ महिषारूढे करालि देवि इहागच्छ इह तिष्ठ इत्यावाह्य संपूज्य बलिं च दद्यात् । नैर्ऋत्ये ॐ प्रेतवाहने रक्ताक्षि देवि इहागच्छ इह तिष्ठ इत्यावाह्य संपूज्य बलिं च दद्यात् । पश्चिमे । ॐ श्वेतकौलीरवाहने श्वेतांबरे देवीहागच्छ इह तिष्ठ इत्यावाह्य संपूज्य बलिं च दद्यात् । वायव्ये । ॐ मृगवाहने हरितां देवि इहागच्छ इह तिष्ठ इत्यावाह्य संपूज्य बलिं दद्यात् । उत्तरे ॐ सिंहासने यक्षिणि देवि इहागच्छ इह तिष्ठ इत्यावाह्य संपूज्य बलिं च दद्यात् । ईशान्ये ॐ वृषवाहने कंकालि देवि इहागच्छ इह तिष्ठ इत्यावाह्य संपूज्य बलिं च दद्यात् । पूर्वेशानयोर्मध्ये ॐ हंसवाहने सुरश्रेष्ठे देवि इहागच्छ इह तिष्ठ इत्यावाह्य संपूज्य बलिं च दद्यात् । निर्ऋतिवरुणयोर्मध्ये ॐ अहिवाहने सर्पराज्ञि देवि इहागच्छ इह तिष्ठ इत्यावाह्य संपूज्य बलिं च दद्यात् । एवं दशदिक्षु यथाक्रमेणैंद्रादीनपि संपूज्य गृहमंडले स्वशाखोक्त

विधिना नवग्रहान् यथास्थानं संपूजयेत् । ततश्चतुरस्रचतुर्हस्तवेदिकायां सर्वतोभद्रं वाष्टदलं विधाय शालिपुंजोपरि स्वर्णादिरचित कुंभं नवतंतुवेष्टितं चंदनादिचर्चितं सुधूपितं सहिरण्यं वज्रमुक्ताफलपद्मरागनीलमरकतैः पंचरत्नैः समायुक्तं मही द्यौरिति भूमिं स्पृष्ट्वा ओषधयः सामिति मंत्रेण धान्यराशिं स्पृष्ट्वा आजिघ्र कलशम् इति कलशं संस्थाप्य इमं मे गंगे इति जलेनापूर्य तत्र कुंकुमागरुकर्पूर चंदनपंकं कुसुमानि च निक्षिप्य तस्य[1] मुखे आम्रदलानि निधाय तदुपरि नारिकेलफलाढ्यं सतंडुलं कलशजातीयं पात्रं निधाय पूर्णा दर्वीति मंत्रेण मंत्रयेत् ॥ युवा सुवासा इति रक्तवस्त्रेणावेष्ट्य ततः स्वर्णादिनिर्मितं [2]महिषघ्नीदेवीप्रतिमां ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संप्रोक्ष्य आसनमंत्रेण पुष्पाद्यासनं दत्त्वा कलशोपरि संस्थाप्य प्रतिष्ठां च कृत्वावाहयेत् । तत्र मंत्रः । एहि दुर्गे महाभागे रक्षार्थं मम सर्वदा ॥ आवाहयाम्यहं देवि सर्वकामार्थसिद्धये ॥ १ ॥ अस्यां मूर्तौ समागच्छ स्थितिं मत्कृपया कुरु ॥ रक्षां कुरु सदा भद्रे विश्वेश्वरि नमोऽस्तु ते ॥२॥ इत्यावाह्य ॐ जयंती मंगला काली भद्रकाली कपालिनी ॥ दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते ॥ इति मंत्रेण पुष्पाद्यैरुपचारैः संपूज्य नवार्णयंत्रावरणपूजां कृत्वा धूपादिपूजनानंतरं प्रार्थयेत् ॥ ॐ महिषघ्नि महामाये चामुंडे मुंडमालिनि ॥ द्रव्यमारोग्यविजयौ देहि देवि नमः सदा ॥१॥ भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरि ॥ देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥ २ ॥ सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ ३ ॥ रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान् देहि धनं देहि सर्वान्कामान् प्रदेहि मे ॥ ३ ॥ इति संप्रार्थ्य

१ आम्रदात् कुरुते यस्तु कलशस्थापन मम ॥ तस्य संपद्विनाशः स्याज्ज्येष्ठपुत्रो विनश्यति ॥ २ मत्स्यपुराणे–जटाजूटसमायुक्तामर्धेन्दुकृतलक्षणाम् ॥ लोचनत्रयसंयुक्तां पद्मेन्दुसदृशाननाम् ॥ अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ॥ नवयौवनसंपन्नां सर्वाभरणभूषिताम् ॥ सुचारुदर्शनां तद्वत्पीनोन्नतपयोधराम् ॥ त्रिभंगस्थानसंस्थानां महिषासुरमर्दिनीम् ॥ त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं तथैव च ॥ तीक्ष्णबाणं तथा शक्तिं वामतोऽपि निवेशयेत् ॥ खेटकं पूर्णचापं च पाशमंकुश मूर्धजम् ॥ घण्टां वा परशुं वापि वामतः सन्निवेशयेत् ॥ अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ॥ शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥ हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ॥ रक्तरक्तीकृतांगं च रक्तविस्फुरितेक्षणम् ॥ वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ॥ सपाशं वामहस्तेन धृतकेशं च दुर्गया ॥ वमद्रुधिरवक्त्रं च देव्याः सिंहं प्रदर्शयेत् ॥ देव्यास्तु दक्षिणं पादं समं सिंहोपरि स्थितम् ॥ किंचिदूर्ध्वं तथा वामांगुष्ठं महिषोपरि ॥ स्तूयमानं च तद्रूपममरैः सन्निवेशयेत् । इतिलक्षणां प्रतिमां कुर्यात् ॥

मूलमंत्रजपं कृत्वा आदौ नारायणादीन् नमस्कृत्य कवचार्गलाकीलकपूर्वकं चरितत्रयं रहस्यत्रययुतं पठेत् । स्वयमशक्तश्चेद्ब्राह्मणं संपूज्य चंडीपाठार्थं त्वामहं वृणे इति यज्ञसूत्रं बद्ध्वा पूगीफलं सदक्षिणं ब्राह्मणकरे दत्त्वा जापयित्वा पुष्पांजलिं च दत्त्वा नमस्कारं च कृत्वा पद्धतिमार्गेण कुमारीपूजनं कुर्यात् । ततो गुरुपूजनं यथावत्कृत्वा ब्राह्मणपूजनं विधाय ब्राह्मणान् भोजयित्वा तांबूलदक्षिणादिभिस्तोषयेत् । एवं प्रतिपत्कृत्यं विधायैवमेव द्वितीयायां द्विगुणं त्रिगुणं तृतीयायां चतुर्गुणं चतुर्थ्यामेवमेकोत्तरवृद्ध्या कुमारीपूजनं ब्राह्मणसमाराधनं नवम्यंतं नवम्यां नवगुणं यथा भवति तथा कुर्यात् ॥ ततो नवम्यां कृतजपदशांशहोमः कार्यः । तत्र प्रयोगः नवचंड्यां हस्तमात्रं समंताच्चतुर्विंशत्यंगुलं कुंडं स्थंडिलं वा विधाय तत्र पायसतिलाज्यद्रव्याणि फलपुष्पादिसंभारान् संपाद्य हस्ते कुशजलमादाय देशकालौ संकीर्त्य मया कृतस्य कारितस्य वा जपस्य सांगतासिद्ध्यर्थं दशांशेन तिलाज्यपायसादिद्रव्यैर्होमं करिष्ये । इति संकल्प्य आगमोक्तविधिना पद्धतिमार्गेणाग्निसंस्कारं कृत्वा प्रधानहोमं कुर्यात् । ततः पूर्वोक्तसर्वन्यासान् कृत्वा वह्नौ पीठपूजां कृत्वा देवीमावाह्यावाहनादिमुद्राः प्रदर्श्य षडंगं कृत्वा षोडशोपचारैः संपूज्य मलेन शतमेकादशाधिकमाज्याहुतीर्हुत्वा पायसतिलपलाशपुष्पसर्षपपूगीफललाजदूर्वांकुरयवबिल्वफलरक्तगुग्गुलद्रव्याणि तिलमिश्रपायसमेव वा कवचार्गलाकीलकरहस्यैः प्रतिश्लोकं हुत्वा जपस्य दशांशेन प्रतिश्लोकं सप्तशतीमंत्रोक्तद्रव्याणि तिलपायसं वा जुहुयात् । अध्यायसमाप्तौ उवाचस्थले च पत्रपुष्पफलैः पद्धतिमार्गेण होमः । इत्यनेन नवार्णेन च जपदशांशतो होमः । इति होमं कृत्वा नामभिः स्रुवेणाज्यं पायसं पद्धतिमार्गेण जुहुयात् । ततः पुनः प्रधानहोमं कृत्वा पद्धतिमार्गेण पूर्णाहुतिं च दद्यात् । ततः कर्मशेषं समाप्य मूलमंत्रेण होमदशांशेन दुग्धमिश्रितजलेन दुग्धेन वा तर्पणं कृत्वा तद्दशांशेन मार्जयेत् । ततः श्रेयःसंपादनं ततः आचार्यादीन् वस्त्राद्यैः संपूज्याचार्याय शतं तदर्धं तदर्धमष्टौ वा गोमिथुनानि सुवर्णचतुष्टयं दद्यात् । ब्राह्मणाय निष्कद्वयं गोद्वयं च दद्यात् । ततः द्वारपालकेभ्योऽन्येभ्यश्च दक्षिणां च दत्त्वा कलशोदकेन यज

१-वित्तशाठ्यं परित्यज्य कुर्यादाचार्यतोषणम् ॥ वस्त्रांगुलीयभूधेनुवाजिहेमप्रदानतः ॥ अशक्तो नित्यमेकं तु दद्यादस्मै प्रयत्नतः ॥

मानं सपरिवारं वेदोक्तमंत्रैः पौराणिकैश्चाभिषिंचेयुः । ततो यजमानो नवग्रहाणामुत्तरपूजां कृत्वा विसृज्य आचार्यहस्ते दत्त्वा देवीं संपूज्य पद्धतिमार्गेण छागादेर्नारिकेलस्य वा पद्धतिमार्गेण बलिं दद्यात् । ततः स्नात्वा तिलकं धृत्वा खड्गिनी शूलिनीत्येकेन शूलेन पाहिनो देवीति चतुष्टयेन नमो देव्यै इति पंचकेन सर्वस्वरूपे इति पंचभिश्च स्तुत्वा नमस्कृत्य पुष्पांजलिं च दत्त्वा प्रार्थयेत् । तत्र मंत्रः । रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि ॥ आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते॥इति संप्रार्थ्य'ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि प्रसादा त्तव सुंदरि ॥' इति देवीवामकरे जलसमर्पणं कृत्वा मूलेन पुष्पेण देवीमुद्वास्य नासया हृदि प्रतिष्ठां विभाव्य षडंगं कुर्यात् । इति नवरात्रं कृत्वा दशम्यां देवीं विसर्जयेत् । तत्र मंत्रः । ' उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च ॥ कुरुष्व मम कल्याणमष्टभिः शक्तिभिः सह ॥ ' इत्युत्थाप्य " दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ॥ संवत्सरे व्यतीते तु पुनरागमनाय वै ॥ इमां पूजां मया देवि यथाशक्त्युपपादिताम् ॥ रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ॥" इति मंत्रेण स्वर्णमयीं प्रतिमामाचार्याय दत्त्वा श्लोकं पठेत् । 'त्रैलोक्यमातर्देवि त्वं सर्वभूतदयान्विते॥दानेनानेन संतुष्टा सुप्रीता वरदा भव'इति पठित्वा मृन्मयमूर्त्यादि सर्वम् उत्तिष्ठ देवि चंडेशीति मंत्रेण उत्थाप्य ' गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके ॥ व्रज स्रोतोजलं वृद्ध्यै स्थीयतां च जले त्विह॥' इति जले प्रवाहयेत् । ततोऽग्निं संपूज्य विभूतिं धृत्वा गच्छगच्छेति विसृज्य कृतस्य कर्मणः सांगतासिद्ध्यर्थं यथाशक्ति महालक्ष्मी प्रीत्यर्थं ब्राह्मणान् भोजयिष्ये । इति संकल्प्य'यस्य स्मृत्या च नामोक्त्या–प्रमादात्कुर्वतां कर्म–इतिश्लोकौ पठित्वा विष्णुस्मरणं कृत्वा पूर्णतां ब्राह्मणैर्वाचयित्वा सर्वं कर्मेश्वरार्पणं कृत्वा सुब्राह्मणान् भोजयित्वा हीनदीनांधकृपणेभ्योऽन्नं दत्त्वा तांबूलदक्षिणादिभिः संतोष्य सुहृद्युतो भुंजीत । तत्फलम्–नवमीतिथिपर्यंतं वृद्धपूजाजपादिकम् ॥ एकाहारं व्रती कुर्यात्सत्यादिनियमैर्युतः ॥ १ ॥ क्रीडंति विविधैर्भोगैर्देवलोके सुदुर्लभे ॥ नाधयो व्याधयस्तेषां न च शत्रुभयं भवेत् ॥ २ ॥ इन्द्रब्रह्मादयो देवास्तामायांति प्रसे

वितुम् ॥ अपुत्रो लभते पुत्रं निर्धनो धनवान् भवेत् ॥ ३ ॥ अविद्यो लभते विद्यां सकामश्च मनोरथान् ॥ व्याधयः संक्षय यांति शत्रवः क्षयमाप्नुयुः ॥ न तस्यास्ति भयं किंचिद्राजचोराग्निवातजम् ॥ इति नवरात्रे वार्षिकनवचंडीविधानम् ॥ (शतचंडीसहस्रचंडयादिविधानम् ॥) तत्रादौ पूजासामग्री—अशीतिगुंजाप्रमाणा कस्तूरी १, तावन्मानं केसरम् २, तावज्जातीफलम् ३, तावान्कर्पूरः ४, एतच्चतुष्टयं पलमात्रं चंदनेन घर्षयेत् । तेन पलद्वयमनुलेपनं भवति । पलं तु विंशत्युत्तरत्रिशद्गुंजामितम् ५, वस्त्रस्य तु मानानुक्तेः स्त्रीजनपरिधानयोग्यं ग्राह्यम् ६, गद्याणत्रयहेमानिर्मितालंकाराः स्त्रीजनोचिताः, गद्याणमानं तु लौकिकतोलस्यार्धम् ७, पुष्पाणि२५०००—८,पलद्वयमितः गुग्गुलुः९,दीपा विंशतिर्घृतपूरिताः१०,कुंभप्रमाणं घृतं—कुंभस्तु विंशतिद्रोणः, द्रोणस्तु खार्याः खलु षोड शांशः११,कुडवद्वयमात्रं हविष्यान्नभोजनम्१२,नैवेद्यं पलचतुष्कं कुडवः१३,शतद्वयं नागवल्लीदलम्१४,तदनुरूपं पूगीफलादिकं कर्पूरादि च ग्राह्यम् १५, इति संगृह्य पूजामारभेत । तत्र अनावृष्ट्याद्यखिलदुरितशांत्यर्थं राज्यावाप्त्यादिसकलकामनासिद्ध्यर्थं यजमानः शिवालय समीपे सुसमे भूप्रदेशे भूमिं संशोध्य षोडशस्तंभसहितं मंडपं सवितानं चतुर्द्वारं तोरणवेष्टितं कृत्वा दिव्यवस्त्रपट्टदुकूलादिभिर्देवतागारं श्रीगिरिं कृत्वा कदलीस्तंभविराजितं सुमनोहरं पुष्पमालोपशोभितं शतचंड्यां षोडशहस्तं सहस्रचंड्यां विंशतिहस्तं मंडपं प्रसाध्य सर्वदेवो पयोगिपद्धतिमार्गेण स्तंभतोरणादिप्रतिष्ठापूजनं कृत्वा तदाग्नेयस्तंभे वडवागणेशकूर्मशेषवसुधानां पूजां कृत्वा ताम्रपात्रेऽर्घ्यमादाय जानुभ्यामवनीं 'कृत्वा आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ॥ उद्धृतासि वराहेण सशैलवनकानना॥मंडपं कारयाम्यद्य त्वदूर्ध्वं शुभलक्षणम् ॥ गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भव॥'इति भूम्यै अर्घ्यं दत्त्वा मंडपं विधाय आरंभदिने कर्ता सपत्नीकस्तिलतैलेन कृताभ्यंगो भूषितांगः संपूर्णकलशहस्तो भद्रंकर्णेभिरिति मंडपं प्रदक्षिणीकृत्य पश्चिमद्वारेण प्रविश्योपविश्य देशकालौ स्मृत्वा ममामुककामनासिद्ध्यर्थं सनवग्रहमखां शतचंडीं सहस्रचंडीं वा ब्राह्मणद्वारा कारयिष्ये । तदंगतया विहितं गणेशपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं चाहं करिष्ये । इति संकल्प्य तानि यथावत्कृत्वा अत्र शतचंडीजपे ऋत्विजो

नवं[१]आचार्यो दशमः सहस्रचंड्यां शतमृत्विजः अष्टौ लोकपालाः सर्वेषां मधुपर्कादिना पूजां कृत्वा पद्धतिमार्गेण वृत्वा वस्त्रद्वयमासनद्वय मेकैक मर्घ्यपात्रजलपात्रांगुलीयककर्णभूषणादि दद्यात्। आचार्याय तु द्विगुणम्।ततः आचार्यः भूतापसारणमंत्रं पठित्वा सर्षपान् विकीर्य पंचगव्यैः कुशैः आपो हिष्ठेति तृचेन मंडपं प्रोक्ष्य स्वस्त्ययनमिति मंत्रद्वयं पठेत्। ततो मध्यवेद्यां पीठे सुखासने उपविश्य ततः पूजावेद्यां आग्नेय्यां विष्णवे नमः ॥ १ ॥ पूर्वस्यामिन्द्राय नमः ॥ २ ॥ ऐशान्याम् ब्रह्मणे नमः ॥ ३ ॥ पश्चिमे गणेशाय नमः ॥ ॥ ४ ॥ वेदीमध्ये महाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः । इति संपूज्य आचार्य ईशाने ग्रहवेद्यां ग्रहान् संस्थाप्य संपज्य पद्धति मार्गेण आसनादिभूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकादिमूलविद्यान्यासादिकं कृत्वा कलशस्थापनं कुर्यात्। वेदीमध्ये सर्वतोभद्र मंडलं कृत्वा पीठपूजां विधाय पीठदेवताः संस्थाप्य तन्मध्ये हैमरजतताम्रमृन्मयान्यतमं वा कलशं पद्धतिमार्गेण संस्थाप्य रक्तवस्त्रे नवार्णयंत्रं लिखित्वा कलशोपरि स्थापयेत्। ततः शतचंड्यां पलेन सहस्रचंड्यां पंचपलेन तदर्धेन तदर्धार्धेन वा महिषमर्दिनीप्रतिमां कृत्वा अग्न्युत्तारणप्रतिष्ठापूर्वकमासनमंत्रेणासनं दत्त्वा तस्मिन्कलशे यंत्रमध्ये स्थापयित्वा पद्धतिमार्गेण पाद्यादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां च कृत्वा धूपादिनमस्कारांतं संपूज्य गणेशवटुकक्षेत्रपालयोगिनीभ्यो बलिं दत्त्वा भूतबलिं दद्यात्। तद्यथा—ॐ सर्वे पीठोपपीठानि द्वारोपस्तरणेऽपि च ॥ क्षेत्रक्षेत्रज्ञसंदोहाः सर्वे दिग्भागसंस्थिताः ॥ १ ॥ योगिनीयोगवीरेन्द्राः सर्वे यंत्रसमागताः ॥ नगरे त्वथ वा ग्रामे अटव्यां सरितस्तटे ॥ २ ॥ वापीकूपेषु वृक्षेषु श्मशाने च चतुष्पथे ॥ नानारूपधरा ये च वटुरूपधराश्च ये ॥ ॥ ३ ॥ सर्वे तत्रैव संतुष्टा बलिं गृह्णंतु मे सदा ॥ शरणागतोऽस्म्यहं तेषां ते सर्वे मे सुखप्रदाः ॥ ४ ॥ बलिदानेन संतुष्टाः प्रयच्छंतु ममेप्सितम् ॥सर्वकार्याणि कुर्वंतु दोषांश्च घ्नंतु मे सदा ॥ ५ ॥ इति सर्वेभ्यो बलिं दद्यात्। ततः कुमार्यः प्रत्यहं शतं नव वा पूज्याः ।

१ देवीरहस्यतन्त्रे—नवभिर्ब्राह्मणैः सार्धं कृत्वाचार्यो द्विजोत्तमः ॥ ददाति नव विप्रेभ्य आचार्यश्चंडिकामयः ॥ क्रोडतन्त्रे–अयुग्मब्राह्मणैः कार्या शतावृत्तिः सुसिद्धये ॥ देवीपठनं युग्मविप्रकृतं तु यत् ॥ निष्फलं च भवेत्सर्वं भूतिनाशः प्रजायते ॥ मन्त्रमहोदधौ—स्नात्वा नित्यकृतिं कृत्वा वृणुयाद्दशवाडवान् ॥ तेनाचार्यसमेतेन क्रम एष मनीषिणाम् ॥ माहात्म्यं रुद्रयामले–आचार्येण समं विप्रान्वरयेद्दश सुव्रतान् ॥ इति बोध्यम् ॥ २ मूर्तिं देव्याः प्रकुर्वीत सुवर्णस्य पलेन वै ॥ तदर्धेन तदर्धेन तदर्धेन महामते ॥

सुवासिनीपूजनं च विधाय द्वितीयदिने द्विगुणं तृतीयदिने त्रिगुणं चतुर्थे चतुर्गुणमिति शतचंड्यां कृत्वा सहस्रचंड्यां दशोत्तरां वृद्धिं कुर्यात् । पूजां देव्यै समर्प्य सर्वे विप्राः कृतांगन्यासाः शतं नवार्णवमंत्रं कवचार्गलाकीलकानि च सकृज्जपित्वांते रहस्यानि नवार्णं शतं जपेयुः । कवचादीनां प्रत्यावृत्तौ नावृत्तिः। एवं प्रथमे एकावृत्तिः द्वितीये द्वितीयावृत्तिः तृतीये तृतीयावृत्तिः चतुर्थे चतुर्थावृत्तिः। एवं शतसहस्रावृत्तयः सम्पद्यंते । नित्यक्षीरान्नभोजनमशक्तौ हविष्यान्नं सर्वेषां प्रत्यहं शतं सहस्रं वा ब्राह्मणान् भोजयेत् । एवं चतुर्दिनपर्यंतं कृत्वा पंचमेऽह्नि होमं कुर्य्यात् । तद्यथा—मंडपमध्ये ऐशान्यां हस्तमात्रं द्व्यंगुलवप्रां गृहवेदीं कृत्वा तत्पश्चिमे च शतचंड्यां द्विहस्तं सहस्रचंड्यां चतुर्हस्तं कुंडं स्थंडिलं वा चतुरस्रं पद्मकुंडं वा कुर्यात् । वेदीमध्ये ब्रह्माणम् १ उत्तरादिषु सोमादीन् वायुसोममध्यादिक्रमेण अपः १ वसून् २ रुद्रान् ३ द्वादशादित्यान् ४ यक्षान् ५ सर्पान् ६ अप्सरसः ७ गंधर्वान् ८ ब्रह्मसोममध्ये कुमारम् १ ऋषभम् २ अदितिम् ३ ब्रह्मेंद्रयोर्मध्ये दुर्गाम् १ विष्णुम् २ ब्रह्माग्निमध्ये सुधाम् १ ब्रह्मयममध्ये मृत्युम् १ रोगम् २ ब्रह्मनिर्ऋतिमध्ये गणपतिम् १ ब्रह्मवरुणमध्ये अपः १ ब्रह्मवायमध्ये मरुतः १ ब्रह्मपादमूले भूमिम् १ तत्रैव गंगादिनदीः धाम्नो धाम्न इति सप्तसागरान् बहिः सोमादिसन्निधौ क्रमेण गदाम् १ त्रिशूलम् २ वज्रम् ३ शक्तिम् ४ दंडम् ५ खड्गम् ६ पाशम् ७ अंकुशम् ८ पुनरुत्तरादिषु गौतमम् १ भरद्वाजम् २ विश्वामित्रम् ३ कश्यपम् ४ जमदग्निम् ५ वशिष्ठम् ६ अत्रिम् ७ अरुंधतीं च पूर्वादिषु ऐंद्रीम् १ कौमारीम् २ ब्राह्मीम् ३ वाराहीम् ४ चामुंडाम् ५ वैष्णवीम् ६ माहेश्वरीम् ७ वैनायकीम् ८ चावाह्य संपूज्य बलिं दत्वा अग्निस्थापनं कृत्वा प्रधानहोमं समाप्य कवचार्गलाकीलकरहस्यैः प्रतिश्लोकं हुत्वा जपदशांशतो मूलेन जुहुयात् । नवरात्रे तु नवम्यामेव

---

१ मन्त्रमहोदधौ—एवं चतुर्दिनं कृत्वा पञ्चमे होममाचरेत् ॥ रुद्रयामळे—एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्टयम् ॥ पञ्चमे दिवसे प्राप्ते होमं कुर्याद्विधानतः ॥ कोडतन्त्रे—त्रिपञ्चसप्तभिर्वापि नवैकादशभिस्तथा ॥ अदीर्घदिवसैः क्षिप्रं विदध्याच्चंडिकामखम् ॥ इति वचनात् ॥ २ पायसान्नैस्त्रिमध्वाक्तैर्द्राक्षारंभाफलैरपि ॥ मातुलिंगैरिक्षुदण्डैर्नारिकेलैः सुरस्तिकैः ॥ जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिः स्वशक्त्या दशावृत्त्या प्रतिश्लोकेन वै हुनेत् ॥ अयुतं नवार्णमन्त्रे होमः रुद्रयामळे । शर्करां पायसं दूर्वास्तिलाञ्छुक्लान्यवानपि ॥ चंडीपाठस्य होमे तु प्रतिश्लोके दशांतः ॥ इति होमयेत् ॥

होमः। होमस्तु पद्धतिमार्गेण विधिना कुर्यात्।पूजास्विष्टकृतादि सर्वं तद्वत्कुर्यात्।एतद्दशगुणौ विधियुतचंडयामेतद्दशगुणो विधिर्लक्षचंड्यां शतब्राह्मणैरेव वा चत्वारिंशद्दिनैरयुतचंडी कार्या। तत्र प्रथमादिने एकैवावृत्तिः द्वितीयादिने द्वे तृतीये तिस्रः चतुर्थे चतस्रः तैरेव चतुः शतदिनैर्वा लक्षचंडीत्यादि बोध्यम्। तथाच—निष्कं सुवर्णमथवा प्रत्येकं दक्षिणां दिशेत् ॥ भोजयेच्च शतं विप्रान्भक्ष्यभोज्यैः पृथग्विधैः ॥१॥ सुघोरायामनावृष्ट्यां भूकंपे च सुदारुणे ॥ परचक्रभये तीव्रे क्षयरोग उपस्थिते ॥ १ ॥ राजवश्यादिकार्येषु आयुष्मत्सुतजन्मनि ॥ महोत्पातविनाशाय पंचविंशतियोजने ॥ २ ॥ देशे सर्वत्र शांत्यर्थं शतचंडीमिमां जपेत् ॥ क्रोडतंत्रे—यदायदा सतां हानिरात्मनो ग्लानिरेव च ॥ ३ ॥ तदा कार्या शतावृत्ती रिपुघ्ना भूतिवर्धिनी ॥ दुःस्वप्नदर्शने घोरे महामारीसमुद्भवे ॥ ४ ॥ वृष्टिप्रदा शतावृत्तिः कार्या चायुःक्षये तथा ॥ महाभये च्छेदयोगे दुर्भिक्षे मरणेऽपि च ॥ ५ ॥ कुर्यात्तत्र शतावृत्तिं देवीमाहात्म्यकस्य हि ॥ अद्भुते च समुत्पन्ने वांधवानां महोत्सवे ॥ ६ ॥ कुर्याच्चंडीशतावृत्तिं सर्वसंपत्तिकारणम् ॥ शतावृत्त्या भवेदायुः शतावृत्त्या समागमः ॥ ॥ ७ ॥ वश्या भवंति राजानः श्रियमाप्नोति संपदः ॥ धनार्थी प्राप्नुयादर्थं पुत्रकामो लभेत्सुतम् ॥ ८ ॥ विद्यार्थी प्राप्नुयाद्विद्यां रोगी रोगात्प्रमुच्यते ॥ चतुर्वर्गफलावाप्तिकारणं रिपुनाशनम् ॥९॥ चंडीशतावृत्तिफलं नास्ति यज्ञे वरानने ॥ शताश्वमेधगोमेधवाजपेयफलप्रदा ॥१०॥ यतः किं बहुनोक्तेन चंडीपाठफलं प्रिये ॥ प्रत्येकावर्तनं देवि हयमेधेन संमितम् ॥११॥ त्रिरावृत्त्या व्रजेत्कामान् पंचवृत्त्या रिपूञ्जयेत् ॥ १२ ॥ मंत्रमहोदधौ—नृपोपद्रव आपन्ने दुर्भिक्षे भूमिकंपने ॥ अतिवृष्ट्यामनावृष्टौ परचक्रभये क्षये ॥ १३ ॥ सर्वे विघ्ना विनश्यंति शतचंडीविधौ कृते ॥ रोगाणां वैरिणां नाशो धनपुत्रसमृद्धयः ॥१४॥ शंकरस्य भवान्या वा प्रसादान्निकटे शुभम् ॥ एवं कृते जगद्वश्यं सर्वे नश्यंत्युपद्रवाः ॥ १५ ॥ राज्यं धनं यशः पुत्रानिष्टमन्यल्लभेत सः ॥ रुद्रयामले—सहस्रचंडीविषये । सहस्रचंडीं विधिवच्छृणु विष्णो महामते ॥ राज्यभ्रंशो ह्यकस्माच्चेज्जनमारे महाभये ॥ १६ ॥ गजमारेऽश्वमारे च परचक्रभये तथा ॥ इत्यादि विविधे

दुःखे क्षयरोगादिजे भये ॥ १७ ॥ सहस्रं चंडिकापाठं कुर्याद्वा कारयेत्तथा ॥ जापकास्तु शतं प्रोक्ता विंशद्धस्तुस्तु मंडपः ॥ १८ ॥ भोज्याः सहस्रं विप्रेन्द्रा गोशतं दक्षिणां दिशेत् ॥ गुरवे द्विगुणं देयं शय्यादानं तथैव च ॥ १९ ॥ सप्तधान्यं च भूदानं श्वेताश्वश्च मनोहरः॥पंचनिष्कमिता मूर्तिः कर्तव्या वर्धमानतः ॥२०॥अष्टादशभुजां देवीं सर्वायुधविभूषिताम् ॥ अन्नं वारि च दातव्यं सहस्रं प्रत्यहं विभो ॥२१॥ शतं वा नियताहारः पयोमानेन वर्तयेत् ॥ एवं यश्चंडिकापाठं सहस्रं तु समाचरेत् ॥२२॥ तस्य स्यात्कार्यसीद्धिस्तु नात्र कार्या विचारणा॥२३॥इत्येष पटलो दिव्यो मंत्रसर्वस्व रूपवान्॥ दुर्गारहस्यभूतोऽपि गोपनीयो मुमुक्षुभिः॥२४॥इति दुर्गापटलः समाप्तः१ श्रीगणेशाय नमः ॥ अथ दुर्गापूजापद्धतिप्रारंभः ॥ तत्रादौ दुर्गापूजामाहात्म्यमुक्तं च पाद्मे सृष्टिखंडे ॥ भीष्म उवाच ॥ चंडिकानुग्रहाद्दैत्या गताः शिष्टा रसातलम् ॥ तद्वदस्व महाप्राज्ञ चंडिकापूजने फलम् ॥ १ ॥ यथा संपूज्यते देवी तुष्टा यच्छति यत्फलम् ॥ श्रोतुं कौतूहलं मेऽद्य तद्वदस्व सविस्तरम् ॥ २ ॥ पुलस्त्य उवाच ॥ शृणुष्व नृपशार्दूल चंडिकापूजने फलम् ॥ यत्कृत्वा स्वर्गभुङ् मर्त्यः पश्चान्मोक्षं व्रजेद्ध्रुवम् ॥ ३ ॥ यत्पूजने फलं देव्या न तत्क्रतुशतैरपि ॥ लभ्यते नितरां तात तीर्थदानव्रतादिभिः ॥ ४ ॥ चंडिकां पूजयेद्भक्त्या यो नरः प्रत्यहं नृप ॥ न क्षमस्तत्फलं वक्तुं साक्षाद्देवः पितामहः ॥ ५ ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ चंडिकापूजनस्यैव लक्षांशेनापि नो समः ॥ ६ ॥ स दाता स मुनिर्यष्टा स तपस्वी स तीर्थपः ॥ यः सदा पूजयेद्दुर्गां नाना पुष्पानुलेपनैः ॥ ७ ॥ धूपैर्दीपैस्तथा भोज्यैः प्रणमेद्वापि भावनीम् ॥ स योगी स मुनिः श्रीमांस्तस्य मुक्तिः करे स्थिता ॥ ८ ॥ वर्षमेकं तु यो दुर्गां पूजयेद्विजितेंद्रियः ॥ एकाहारो महाबाहो सोऽग्निष्टोमफलं लभेत् ॥ ९ ॥ पौर्णमास्यां नवम्यां च अष्टम्यां च नराधिप ॥ स्नापयित्वा शुभां दुर्गां वाजपेयफलं लभेत् ॥ १० ॥ शुक्लपक्षे नवम्यां तु अष्टम्यां परमेश्वरीम् ॥ त्रिकालं पूजयेद्यस्तु चतुर्दश्यां नराधिप ॥ ११ ॥ स गच्छति परं स्थानं यत्र देवी व्यवस्थिता ॥ क्रीडित्वा सुचिरं कालं राजा भवति भूतले ॥ १२ ॥ नवम्यां सोपवासस्तु यः पूजयति चंडिकाम् ॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ १३ ॥ जितेन्द्रियो ब्रह्मचारी शुचिर्भूत्वा तु

यो नरः ॥ चंडिकां पूजयेद्भक्त्या स याति परमां गतिम् ॥ १४ ॥ स्नानोपवासनियमैः पूजाजागरमार्जनैः ॥ सर्वकालेषु सर्वेषु चंडिकां
यः प्रपूजयेत् ॥ १५ ॥ विमानवरमारुह्य ध्वजमालाकुलं नृप ॥ ब्रह्मलोकं नरो गत्वा मोदते शाश्वतीः समाः ॥ १६ ॥ तस्मा
त्सर्वप्रयत्नेन यथाविभवविस्तरैः ॥ पूजयेत्सततं दुर्गां महापुण्यफलेच्छया ॥ १७ ॥ अयने विषुवे चैत्र षडशीतिमुखे नृप ॥ मासै
श्चतुर्भिर्यत्पुण्यं विधिना पूज्य चंडिकाम् ॥ १८ ॥ तत्फलं लभते वीर नवम्यां कार्तिकस्य तु ॥ मासि चाश्वयुजे वीर शुक्लपक्षे त्रिशूलि
नीम् ॥ १९ ॥ नवम्यां पूजयेद्यस्तु तस्य पुण्यफलं शृणु ॥ अश्वमेधसहस्रस्य राजसूयशतस्य च ॥ २० ॥ तत्फलं लभते वीर
दिवि देवगणैर्वृतः ॥ मासिमासि नरो भक्त्या पूजयेद्यस्तु चंडिकाम् ॥ २१ ॥ व्रजेत्षाणमासिकं पुण्यं नवम्यां तु न संशयः ॥ मेरु
पर्वततुल्योऽपि राशिः पापस्य कर्मणः ॥ २२ ॥ चंडिकावैद्यमासाद्य नश्यते दुष्टरोगवत् ॥ दुर्गार्चने रतो नित्यं महापातकसंभवैः
॥ २३ ॥ दोषैर्न लिप्यते वीर पद्मपत्रमिवांभसा ॥ छित्वा भित्वा च भूतानि हत्वा सर्वमिदं जगत् ॥ २४ ॥ प्रणम्य शिरसा देवीं
न स पापैर्विलिप्यते ॥ सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ॥ २५ ॥ दुर्गां दृष्ट्वा नरः सोऽपि प्रयाति परमं पदम् ॥ स्वपंस्तिष्ठ
न्व्रजन् मार्गे प्रलपन्भोजने रतः ॥ २६ ॥ स्मरते सततं दुर्गां स च मुच्येत बंधनात् ॥ न तद्देशे तु दुर्भिक्षं न च दुःखं प्रवर्तते ॥ २७ ॥
न कश्चिन्म्रियते राजन्पूज्यते यत्र चंडिका ॥ यो दुर्गां पूजयेन्नित्यं श्वपचो वा जितेंद्रियः ॥ २८ ॥ भावेन च समायुक्तः सोऽपि
याति परां गतिम् ॥ पूजयित्वा तु तां भक्त्या श्रद्धया सर्वमंगलाम् ॥ २९ ॥ प्रयाति परमं स्थानं यत्र सा सर्वमंगला ॥ व्रताभिषेकं
यः कुर्यादहोरात्रं नराधिपः ॥ ३० ॥ सूक्ष्मधारेण ताम्रेण भगवत्या विचक्षणः ॥ मासि चाश्वयुजे वीर सर्वपापैः प्रमुच्यते ॥ ३१ ॥
कार्तिके पौर्णमास्यां यः सोपवासोऽर्चयेदुमाम् ॥ सोऽग्निष्टोमफलं विंदेत्सूर्यलोकं च गच्छति ॥ ३२ ॥ आषाढे पौर्णमास्यां तु योऽर्चये
दंबिकां नरः ॥ सोपवासो महाभागः स याति परमां गतिम् ॥ ३३ ॥ पौर्णमास्यां तु यो माघे पूजयेद्विधिवच्छिवाम् ॥ सोऽश्वमेध
मवाप्नोति विष्णुलोके महीयते ॥ ३४ ॥ अयने दक्षिणे यस्तु पूजयेदंबिकां नृप ॥ सकृद्गंधोदकैश्चैव गंधर्वसदने वसेत् ॥ ३५ ॥ पंच

गव्येन तूक्षित्वा पंचचूडाचलं व्रजेत् ॥ आपः क्षीरं कुशाग्राणि तंडुला हविरक्षताः ॥ ३६ ॥ सह सिद्धार्थका दूर्वा कुंकुमं रोचना मधु ॥ अर्घोऽयं कुरुशार्दूल द्वादशांग उदाहृतः ॥ ३७ ॥ अनेन पूजयेद्यस्तु स याति परमं पदम् ॥ दारवेणार्घपात्रेण दत्त्वाऽर्घ्यं विधिवन्नृप ॥ ३८ ॥ देव्यै तदा महाराज अग्निष्टोमफलं व्रजेत् ॥ अब्दमेकशतं दिव्यं शक्रलोके महीयते ॥ ३९ ॥ गंधानुलेपनं कृत्वा ज्योतिष्टोमफलं व्रजेत् ॥ चंदनेनावलिप्यार्यामग्निष्टोमफलं व्रजेत् ॥ ४० ॥ विलिप्य कृष्णागरुणा वाजपेयफलं भजेत् ॥ कुंकुमेन विलिप्यार्यां गोसहस्रफलं भजेत् ॥ ४१ ॥ चंदनागुरुकर्पूरैः सूक्ष्मपत्रैः सकुंकुमैः ॥ दुर्गामालिप्य विधिवत्कल्पकोटिं वसेद्दिवि ॥ ४२ ॥ अग्निहोत्रपरे विप्रे वेदवेदांगपारगे ॥ सुवर्णानां सुवर्णानां शते दत्ते यत्फलम् ॥ ४३ ॥ तत्फलं लभते राजन्पूजयित्वा तु चंडिकाम् ॥ मालया विल्वपत्राणां नवम्यां च पुरेण च ॥ ४४ ॥ मालाद्वयेन संपूज्य दुर्गां देवीं नराधिप ॥ बिल्ववृक्षस्य पुष्पैश्च राजसूयफलं भजेत् ॥ ४५ ॥ करवीरस्य स्रग्भिश्च पूजयेद्यस्तु चंडिकाम् ॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ४६ ॥ द्रोणपुष्पसुस्रग्भिस्तु पजयेद्यस्तु चंडिकाम् ॥ राजसूयफलं प्राप्य स्वर्गलोके महीयते ॥ ४७ ॥ पूजयित्वा तु राजेंद्र श्रद्धया विधिपूर्वकम् ॥ अन्यपुष्पस्य मालाभिः पितृलोके महीयते ॥ ४८ ॥ शमीपुष्पस्य मालाभिस्त्वार्यां संपूज्य भक्तितः ॥ गोसहस्रफलं लब्ध्वा विष्णुलोके महीयते ॥ ४९ ॥ सर्वेषामेव पुष्पाणां प्रवरं नीलमुत्पलम् ॥ नीलोत्पलसहस्रेण यस्तु मालां प्रयच्छति ॥ ५० ॥ दुर्गायै विधिवद्वीर तस्य पुण्यफलं शृणु ॥ वर्षकोटिसहस्राणि वर्षकोटिशतानि च ॥ ५१ ॥ दिव्यमूर्तिधरो भूत्वा रुद्रलोके महीयते ॥ सर्वासां पुष्पजातीनां यत्फलं परिकीर्तितम् ॥ ५२ ॥ तस्माच्छतगुणं प्राप्य दुर्गालोके महीयते ॥ नीलोत्पलस्रजां देवीं पूजयेद्यस्तु चंडिकाम् ॥ ५३ ॥ वाजपेयफलं प्राप्य रुद्रलोके महीयते ॥ अलाभे पुष्पजातीनां पत्राण्यपि निवेदयेत् ॥ ५४ ॥ पत्राणामप्यलाभे तु ओषधीस्तु निवेदयेत् ॥ ओषधीनामलाभे तु भक्त्या भगवती जिता ॥ ५५ ॥ प्रत्येकमुक्तपुष्पेषु कुशेष्वपि फलं नृप ॥ आंगिरसेषु तेष्वेव द्विगुणं कांचनस्य तु ॥ ५६ ॥ मल्लिकामुत्पलं पत्रं शमीपुन्नागचंपकम् ॥ कर्णिकारमशोकं च द्रोणपुष्पं विशेषतः ॥ ५७ ॥ चंदनं

च जपापुष्पं नागकेसरमेव च ॥ यः प्रयच्छति पुण्यात्मा पुष्पाण्येतानि भावतः ॥ ५८ ॥ चंडिकायै नरश्रेष्ठः स च प्रोक्तफलं भजेत् ॥ संप्राप्य कालाद्राजत्वं चंडिकानुचरो भवेत् ॥ ५९ ॥ पद्माकृतिं च यः कुर्यान्मंडलं चंडिकागृहे ॥ स ब्रह्मणः पुरं गत्वा मोदते ब्रह्मणा सह ॥ ६० ॥ शंखवर्णं तु यः कुर्यान्मंडलं विधिवन्नृप ॥ स दिव्यं यानमारुह्य चंद्रलोकमवाप्नुयात् ॥ ६१ ॥ नानावर्णेन चूर्णेन कृत्वा मंडलमुत्तमम् ॥ गत्वा माहेश्वरीलोकं मोदते शाश्वतीः समाः ॥ ६२ ॥ वज्राकृतिं वज्रचूर्णैर्यः कुर्यान्मंडलं नृप ॥ ऐरावतं समारूढ इंद्राणीलोकमाप्नुयात् ॥ ६३ ॥ यः करोति नरो भक्त्या दुर्गायाः पुरतो महत् ॥ श्वेतकृष्णैः सितैर्वर्णैः श्रीवत्सांकितमुत्तमम् ॥ ६४ ॥ मंडलं स नरो वीर विमानवरमाश्रितः ॥ सेव्यमानोऽप्सरोव्रातैर्व्रजेच्छ्रीलोकमुत्तमम् ॥ ६५ ॥ यः करोति नरो भक्त्या मंडलं चाम्बिकान्वितम् ॥ रमते किन्नरैः सार्धं यावदाभूतसंप्लवम् ॥ ६६ ॥ चक्रैर्वा शतशाखैस्तु क्षीरवृक्षसमुद्भवैः ॥ हेमजैश्चापि कलशैर्जलक्षीरघृतान्वितैः ॥ ६७ ॥ अनेकवर्णसंयुक्तैरक्षतैर्नीरतंडुलैः ॥ यः करोति नरो भक्त्या चक्राकारं तु मंडलम् ॥ ६८ ॥ चंडिकायाः पुरो राजञ्जलजैः स्थलसंभवैः ॥ पत्रैः पुष्पैर्यथालाभं सर्वर्तुषूद्भवैः शुभैः ॥ ६९ ॥ वन्यानां सर्वपत्रैश्च पुष्पैश्चैव प्रपूजयेत् ॥ शुभं वाप्यशुभं वापि फलं पुष्पं निवेदयेत् ॥ ७० ॥ भक्त्या युतो नरः सर्वं स च देवत्वमाप्नुयात् ॥ नानापुष्पस्य मालाभिर्मंडपं चंडिकोपरि ॥ ७१ ॥ यः कुर्याद्विधिवद्भक्त्या विष्णुलोके महीयते ॥ कुर्यात्पुष्पगृहं भक्त्या विधिवच्चंडिकोपरि ॥ ७२ ॥ नवम्यां पूर्वकाले वा विचित्रकुसुमोज्ज्वलम् ॥ विमानवरमारुह्य पुष्पदामोपशोभितम् ॥ ७३ ॥ अक्षयं मोदते कालं चंडिकालयमाश्रितः ॥ पूजाविभक्तविन्यासरचनादिषु सर्वतः ॥ फलमेव समासेन ज्ञेयं विज्ञानुसारतः ॥ ७४ ॥ घृतपिष्टप्रदीपाद्यैर्घृतमिश्रितपल्लवैः ॥ ओषधीभिश्च सेध्याभिः सर्वबीजैर्यवादिभिः ॥ ७५ ॥ नवम्यां सर्वकाले तु यात्राकाले विशेषतः ॥ यः कुर्याच्छ्रद्धया वीर दिव्यं नीराजनं नरः ॥ ७६ ॥ शंखभेर्यादिनिर्घोषैर्महद्भिर्देवनादितैः ॥ जयशब्दैः पुष्कलैश्च शिवलोकं स गच्छति ॥ ७७ ॥ लवणेनाक्षतैः कृत्वा देवीनीराजनं परम् ॥ तावत्कल्पसहस्राणि स्वर्गलोके महीयते ॥ ७८ ॥ सुवर्णरौप्यवर्णैश्च कृत्वा नीराजनं नरः ॥ भगवत्यै महाराज

ब्रह्मलोके महीयते ॥ ७९ ॥ त्रिकालं यो नरः कुर्याद्दुर्गायाः पुरतो नृप ॥ नृत्यं गीतं च वादित्रं तस्य पुण्यफलं श्रृणु ॥ ८० ॥
यावंत्यब्दानि कुरुते गीतं नृत्यं च वादितम् ॥ तावत्कल्पान्हि राजेंद्र देवीलोके सुखं वसेत् ॥ ८१ ॥ एकाहमपि यो भक्त्या पंचगव्येन
चंडिकाम् ॥ स्नापयेन्नृपशार्दूल स गच्छेत्सुरभीपुरम् ॥ ८२ ॥ कपिलापंचगव्येन घृतक्षीरयुतेन च ॥ स्नानं शतगुणं
प्रोक्तमितरेभ्यो नराधिपः ॥ ८३ ॥ वर्षैश्च षट्सहस्राणां पापानां समुपार्जनम् ॥ तत्सर्वं विलयं याति तोयेन लवणं
यथा ॥ ८४ ॥ घृताभ्यंगने देव्यास्तु कृतेन विधिवन्नृप ॥ तस्मादभ्यंजयेद्भक्त्या नित्यं भगवतीं नृप ॥ ८५ ॥
नवम्यां शुक्लपक्षे तु विधिवच्चंडिकां नृप ॥ घृतेन स्नापयेद्यस्तु तस्य पुण्यफलं श्रृणु ॥ ८६ ॥ दश पूर्वान्दश परानात्मानं च विशेषतः ॥
भवार्णवात्समुद्धृत्य दुर्गालोके महीयते ॥ ८७ ॥ क्षीराद्यैः स्नापयेद्यस्तु श्रद्धाभक्तिसमन्वितः ॥ चंडिकां स नरो याति गोलोकं तमसः
परम् ॥ ८८ ॥ चंडिकां स्नापयेद्यस्तु नरश्चेक्षुरसेन च ॥ सौपर्णकेन यानेन विष्णुना सह मोदते ॥ ८९ ॥ यो नरः स्नापयेद्दुर्गां
श्रद्धया हेमवारिणा ॥ सौवर्णं यानमारूढो मोदते पुरुषैर्दिवि ॥ ९० ॥ रक्तोदकेन विधिवत्स्नापयेच्छ्रद्धयान्वितः ॥ चंडिकां स नरः
पूर्वैर्विष्णुलोके महीयते ॥ ९१ ॥ स्नापयेद्य उमां देवीं नरः कर्पूरवारिणा ॥ सौवर्णयानमारूढः स गच्छेद्यत्र चंडिका ॥ ९२ ॥
चंडिकां स्नापयित्वा तु श्रद्धयाऽगुरुवारिणा ॥ इन्द्रलोकं समासाद्य क्रीडते सह किन्नरैः ॥ ९३ ॥ पितॄनुद्दिश्य यो दुर्गां मधुना पायसेन
च ॥ स्नापयेद्विधिवद्भक्त्या तस्य पुण्यफलं श्रृणु ॥ ९४ ॥ तृप्ता भवंति पितरस्तस्य वर्षशतद्वयम् ॥ य एवं स्नापयेन्नित्यं स्नानद्रव्यै
र्नराधिपः ॥ ९५ ॥ युगपद्विधिवद्वीर तस्य पुण्यफलं श्रृणु ॥ अश्वमेधसहस्रस्य राजसूयशतस्य च ॥ ९६ ॥ अग्निष्टोमस्य यज्ञस्य
स फलं विंदते नरः ॥ स्नापयित्वा नरस्ताम्रैर्वाजपेयफलं व्रजेत् ॥ ९७ ॥ सौवर्णैः स्नापयित्वा च चंडिकां कलशैर्नृप ॥ अश्वमेधफलं
प्राप्य ब्रह्मलोके महीयते ॥ ९८ ॥ घृतस्नातां तथा दुर्गां समुद्वर्तयते तु यः ॥ यवगोधूमजैश्चूर्णैर्घर्षयेच्छर्करेण च ॥ ९९ ॥ घृतेन
पयसा दध्ना स्नापयेच्चंडिकां ततः ॥ बिल्वपत्रैः सुगंधाढ्यैर्घर्षयेद्यत्नतः पुमान् ॥ १०० ॥ गोसहस्रशते दत्ते यत्फलं पुष्करे स्मृतम् ॥

तत्फलं लभते वीर देव्या उद्वर्तने कृते ॥ १०१ ॥ दत्त्वार्घ्यं विधिवद्भक्त्या दुर्गायै पद्मशारिणा ॥ संपूज्यमानो गंधर्वै रमते दिवि देव
वत् ॥ १०२ ॥ कृतोपवासो विधिवत्स भोगी पुत्रवान्भवेत् ॥ उत्तरे ह्ययने यस्तु सोपवासोऽर्चतेंऽबिकाम् ॥ १०३ ॥ बहुपुत्रो बहु
धनः स नरः कीर्तिमान्भवेत् ॥ इत्येते कथिता वीर पूजाकाला मनीषिभिः ॥ १०४ ॥ कृत्वोपवासं विधिवद्विषुवे योऽर्चयेच्छिवाम् ॥
शक्तिमान्बहुपुत्रश्च स भवेद्बलवान्नरः ॥ १०५ ॥ योऽर्चयेद्विधिवद्दुर्गां ग्रहणे चन्द्रसूर्ययोः ॥ कृत्वोपवासं विधिवत्स भवेत्पुत्रवान्नरः ॥
॥ १०६ ॥ शांतिकामो नरो यस्तु राहुग्रस्ते दिवाकरे ॥ सोपवासोऽर्चयेद्देवीं स गच्छेत्परमं पदम् ॥ १०७ ॥ इत्येते कथिता वीर
पूजाकाला मनीषिभिः ॥ दुर्गायाः कुरुशार्दूल येषु ब्रह्मदिवं व्रजेत् ॥ १०८ ॥ दुर्गाया दर्शनं पुण्यं दर्शनादभिवंदनम् ॥ वंदनात्स्प
र्शनं श्रेष्ठं स्पर्शनादपि पजनम् ॥ १०९ ॥ पूजनाल्लेपनं श्रेष्ठं लेपनात्तर्पणं स्मृतम् ॥ तर्पणान्मांसदानं तु महिषाजनिपातनम् ॥ ११०[१] ॥
अहन्यहनि यो दुर्गां पूजयेद्रुधिरादिभिः ॥ कुलानां शतमुद्धृत्य ब्रह्मलोके महीयते ॥ १११ ॥ वरं प्राणपरित्यागः शिरसः कर्तनं
वरम् ॥ ॥ न चापूज्येह भुंजीत चंडिकां चंडरूपिणीम् ॥ ११२ ॥ यश्च देव्या गृहं नित्यं संमार्जयति भक्तितः ॥ स भवेद्बलवान्देवं सर्व
संपत्तिसंयुतः ॥ ११३ ॥ देव्या गृहं तु यो देव गोमयेनोपलेपयेत् ॥ स्त्री पुमान्वा यथावच्च षण्मासाभ्यंतरे सुर ॥ ११४ ॥ स भजे
दीप्सितान्कामान्देवीलोकं च गच्छति ॥ पुलस्त्य उवाच ॥ स्नानकाले महाराज नानावादित्रमंगलैः ॥ ११५ ॥ जयशब्दैश्च यो दुर्गां
तर्पयेत जलादिभिः ॥ संपूजयति भक्त्या च गंधपुष्पादिभिस्तथा ॥ स क्रीडते दिवं गत्वा गंधर्वाप्सरसां गणैः ॥ ११६ ॥ कृष्णा
गुरु सकर्पूरं सिंदूरं चन्दनं तथा ॥ भगवत्यै नरो भूयः पदं दत्त्वा नराधिप ॥ ११७ ॥ इह कामानवाप्याथ शिवलोके महीयते ॥
गुग्गुलुं सघृतं दत्त्वा दुर्गायै च नरर्षभ ॥ ११८ ॥ वर्षार्धं विधिवद्भक्त्या गोसहस्रफलं भजेत् ॥ अगुरुधूपमावेद्य सर्वयज्ञफलं भजेत् ॥
॥ ११९ ॥ सितागुरुं नरो दत्त्वा गोसहस्रफलं भजेत् ॥ सर्वेषामेव धूपानां दुर्गाया गुग्गुलुः प्रियः ॥ १२० ॥ घृतयुक्तो विशेषेण

१ इदं भीष्मसम्बोधनम् । एवमग्रेऽपि ॥

सततं प्रीतिवर्द्धनः ॥ द्वे सहस्रे पलानां तु तथा पलशद्वतयम् ॥ १२१ ॥ दत्त्वा शुक्लनवम्यां तु चंडिकावल्लभो भवेत् ॥ महिषाक्षं
घृताक्तं तु दग्ध्वा बिल्वमथापि वा ॥ १२२ ॥ वाजपेयफलं प्राप्य सूर्यलोके महीयते ॥ सकृच्चागुरुधूपेन सर्वमंगलप्राप्तिदा ॥ १२३ ॥
शोधयेत्पापकलिकं कांचनं दहनो यथा ॥ वस्त्राणि सुविचित्राणि सूक्ष्मानि सुमृदूनि च ॥ १२४ ॥ यः प्रयच्छति दुर्गायै स गच्छति
शिवालयम् ॥ सुवर्णघटितं वस्त्रं यो दुर्गायै प्रयच्छति ॥ ॥ १२५ ॥ गोसहस्रफलं प्राप्य सूर्यलोके महीयते ॥ एवं
वित्तानुसारेण फलं ज्ञेयं समासतः ॥ १२६ ॥ संध्याकाले नवम्यां यो बलिं कुर्यान्नराधिपः ॥ चंडिकायतने भक्त्या महिषाज
निपातनैः ॥ १२७ ॥ विमानवरमारुह्य सर्वदेवनमस्कृतम् ॥ स गच्छति परं स्थानं यत्र सा चंडिका स्थिता ॥ १२८ ॥
गुडखंडाज्यसंमिश्रमन्नं दत्त्वा नराधिप ॥ वैष्णवः सकलं प्राप्य सूर्यलोके महीयते ॥ १२९ ॥ गुडखंडघृतानां च तथा शर्करया नृप ॥
दत्ते चोद्वर्तने देव्यै स याति ब्रह्मणः पदम् ॥ १३० ॥ शाल्योदनं रसानां च प्रपानं विरजस्तथा ॥ यः प्रयच्छति दुर्गायै स च गच्छे
च्छिवालयम् ॥ १३१ ॥ दुर्गामुद्दिश्य पानीयं केतकीगंधवासितम् ॥ यः प्रयच्छति राजेन्द्र स गणाधिपतिर्भवेत् ॥ १३२ ॥ आम्रं
च नारिकेलं च खर्जूरं बीजपूरकम् ॥ यः प्रयच्छति दुर्गायै स गच्छेत्परमं पदम् ॥ १३३ ॥ घृतदीपप्रदानेन योऽर्चयेच्चंडिकां
नरः ॥ सोऽश्वमेधफलं प्राप्य चंडिकानुचरो भवेत् ॥ १३४ ॥ तैलदीपं च यो दद्यात् पूजयित्वा तु चंडिकाम् ॥ नागलोकं समासाद्य
क्रीडते सह किन्नरैः ॥ १३५ ॥ आत्मदेहवसादीपं प्रज्वाल्य चंडिकाग्रतः ॥ निवेदयेन्नरो भक्त्या मोदते सोंऽबिकालये ॥ १३६ ॥
यः कुर्यात्कार्तिके मासे शोभनां दीपमालिकाम् ॥ चंडिकायतने भक्त्या स सूर्यालयमाव्रजेत् ॥ १३७ ॥ घृतेन कुरुशार्दूल अमायां
च स्वशक्तितः ॥ विशेषतो नवम्यां तु भक्त्या श्रद्धासमन्वितः ॥ १३८ ॥ तावद्वर्षसस्राणि ब्रह्मलोके महीयते ॥ अश्मसार
मयं कृत्वा नानादीपसमान्वितम् ॥ १३९ ॥ दीपं दत्तं समुद्बोध्य दुर्गायाः पुरतो नृप ॥ नरः कल्पायुतं साग्रं दुर्गालोके मही
यते ॥ १४० ॥ चन्द्रांशुनिर्मलं छत्रं मणिमाणिक्यभूषितम् ॥ सर्वतः शोभनं कृत्वा नानापुष्पानुलेपनैः ॥ १४१ ॥ दुर्गार्थं

पुरतो वीर स याति परमां गतिम् ॥ चामरे श्रद्धया देव्यै दत्त्वा च परयान्वितः ॥ राजसूयफलं प्राप्य हंसलोके महीयते ॥ १४२ ॥ संप्रसारितदेही यो दंडवत्पतितो भुवि ॥ चंडिकापुरतो वीर स याति परमां गतिम् ॥ १४३ ॥ तत्फलं लभते वीर प्रणम्य शिरसा महीम् ॥ दुर्गापूजोपकरणं स्वल्पं वा यदि वा बहु ॥ १४४ ॥ कृत्वा वित्तानुसारेण इन्द्रलोके महीयते ॥ १४५ ॥ पुलस्त्य उवाच ॥ देवैः पुरा जगत्कर्ता पृष्टो देवः पितामहः ॥ ब्रूहि दुर्गार्चनं देव येन तुष्यति चंडिका ॥ १४६ ॥ ब्रह्मोवाच ॥ शंभुः पूजयते देवीं मंत्रशक्तिमयीं शुभाम् ॥ अक्षमालां करे न्यस्य तेनासौ विभवोद्भवः ॥ १४७ ॥ दुर्गां रत्नमयीं देवाः पूजयामि सदा ह्यहम् ॥ तेन प्राप्तं मया चैव ब्रह्मत्वं च सुदुर्लभम् ॥ १४८ ॥ इन्द्रनीलमयीं देवीं विष्णुः पूजयते सदा ॥ विष्णुत्वं प्राप्तवांस्तेन ह्यद्भुतैकं सनातनम् ॥ १४९ ॥ देवीं हेममयीं दुर्गां धनदोऽर्चयते सदा ॥ तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ॥ १५० ॥ विश्वे देवा महात्मानो रौप्यं देवीं मनोरमाम् ॥ यजंति विधिवत्तेन विश्वे देवत्वमागताः ॥ १५१ ॥ वायुः पूजयते भक्त्या देवीं पित्तलसंभवाम् ॥ वायुत्वं तेन संप्राप्तं ह्यनुत्तमगुणावहम् ॥ १५२ ॥ वसवः कांस्यकां देवीं पूजयंते विधानतः ॥ प्राप्तास्तते महात्मानो वसुत्वं तन्महोदयम् ॥ १५३ ॥ अश्विनौ पार्थिवीं देवीं पूजयंतौ विधानतः ॥ तेन तावश्विनौ देवौ स्वर्वैद्यौ संबभूवतुः ॥ १५४ ॥ स्फाटिकीं शोभनां देवीं वरुणोऽर्चयते सदा ॥ वरुणत्वं च संप्राप्तस्तेन चर्द्धया समन्वितम् ॥ १५५ ॥ देवीं रत्नमयीं पुण्यामग्निर्यजति भावितः ॥ अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ॥ १५६ ॥ ताम्रां देवीं सदाकालं भक्त्या देवो दिवाकरः ॥ अर्चते तेन संप्राप्तं सूर्यत्वं शुभमुत्तमम् ॥ १५७ ॥ मुक्ताफलमयीं देवीं सोमः पूजयते सदा ॥ तेन सोमेन संप्राप्तं सोमत्वं सततोज्ज्वलम् ॥१५८॥ प्रवालकमयीं देवीं पूजयंति विधानतः ॥ तेन ते ग्रहतां प्राप्ता ग्रहाः सूर्यादयोऽनिशम् ॥ १५९ ॥ वारिजां शोभनां देवीं पूजयंत्यसुरोत्तमाः ॥ वारिजाश्च महात्मानस्तेन तेऽमितविक्रमाः ॥ १६० ॥ त्रपुसीसमयीं देवीं

१ हंसो रविः। २ यजते इति पाठो वा।

यजंते पितरः सदा ॥ पितृत्वं प्राप्य ते सर्वे संपूज्याश्च जगत्त्रये ॥ १६१ ॥ तथा लोहमयीं देवीं पिशाचाः पूजयंति ताम् ॥ तेन सिद्धिबलोपेताः प्रयांति परमं पदम् ॥ १६२ ॥ त्रैलोहिनीं सदा देवीं यजंते गुह्यकादयः ॥ तेन भोगबलोपेताः प्रयांतीश्वरमंदिरम् ॥ १६३ ॥ वज्रलोहमयीं देवीं यजंते भूतयोनयः ॥ तेन मुक्ता सुरत्वं च लभंते सततं दिवि ॥ १६४ ॥ देवास्तथा यूयमपि यदीच्छथ परां गतिम् ॥ शिवां मणिमयीमिष्ट्वा लप्स्यध्वे मानसेप्सितम् ॥ १६५ ॥ चंडिकां पूजयित्वा तु प्रहृष्टेनांतरात्मना ॥ कृतांजलिपुटो भूत्वा इदं स्तोत्रमुदीरयेत् ॥ १६६ ॥ (स्तोत्रं यथा) दुर्गां शिवां शांतिकरीं ब्रह्माणीं ब्रह्मणः प्रियाम् ॥ सर्वलोकप्रणेत्रीं च प्रणमामि सदांबिकाम् ॥ १ ॥ मंगलां शोभनां शुद्धां निष्कलां परमां कलाम् ॥ विश्वेश्वरीं विश्ववंद्यां चंडिकां प्रणमाम्यहम् ॥ २ ॥ सर्वदेवमयीं देवीं सर्वदेवनमस्कृताम् ॥ ब्रह्मेशविष्णुनमितां प्रणमामि सदा उमाम् ॥ ३ ॥ विंध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीम् ॥ योगिनीं योगविद्यां च चंडिकां प्रणमाम्यहम् ॥ ४ ॥ ईशानमातरं देवीमीश्वरीमीश्वरप्रियाम् ॥ प्रणतोऽस्मि सदा दुर्गां संसारार्णवतारिणीम् ॥ ५ ॥ दुर्गा संकटहंत्रीति दुर्गेति प्रथिता भुवि ॥ सर्वबुद्ध्यधिदेवीयमंतर्यामिस्वरूपिणी ॥ ६ ॥ वैष्णवानां च शैवानामुपास्येयं च नित्यशः ॥ मूलप्रकृतिरूपा सा सृष्टिस्थित्यंतकारिणी ॥ ७ ॥ सर्वे देवा हरिब्रह्मप्रमुखा मनवस्तथा ॥ मुनयो ज्ञाननिष्ठाश्च योगिनश्चाश्रमास्तथा ॥ ८ ॥ लक्ष्म्यादयस्तथा देव्यः सर्वा ध्यायंति तां शिवाम् ॥ इदं यः पठते स्तोत्रं शृणुयाद्वापि भक्तितः ॥ ९ ॥तदेव जन्मसाफल्यं दुर्गास्मरणमस्ति चेत् ॥ स मुक्तः सर्वपापेभ्यो दुर्गालोके महीयते ॥१०॥इति दुर्गापूजनमाहात्म्यम् । (अथ दुर्गापूजाप्रयोगः ॥) हिमालय उवाच ॥ देवि देवि महेशानि करुणासागरेऽम्बिके ॥ ब्रूहि पूजाविधिं सम्यग्यथावदधुना निजम् ॥ १ ॥ श्रीदेव्युवाच ॥ वक्ष्ये पूजाविधिं राजन्नंबिकाया यथा प्रियम् ॥ अत्यंतश्रद्धया सार्धं शृणु पर्वतपुंगव ॥ २ ॥ तत्रादौ चन्द्रतारादिबलान्विते सुदिने सुमुहूर्ते तीर्थपुण्यक्षेत्रनिर्जनस्थानादौ अनुष्ठानयोग्यभूमेः परिग्रहणं कृत्वा तत्र मार्जनदहनखननसंप्लवनादिभिः स्मृत्युक्तैः शोधनोपायैः शुद्धिं संपाद्य जपस्थानस्य चतुर्दिक्षु क्रोशं क्रोशद्वयं वा क्षेत्रं चतुरस्रमाहारादिविहारार्थं परिकल्प्य

जपस्थानभूमौ कूर्मशोधनं कुर्यात्। ततः पुरश्चरणात् प्राक् तृतीयदिवसे क्षौरादिकं विधाय ततः प्रायश्चित्तांगगतविष्णुपूजाविष्णुतर्पण विष्णुश्राद्धं होमं चांद्रायणादिव्रतं च कुर्यात् । व्रताशक्तौ गोदानं द्रव्यदानं च कुर्यात् । यदि सर्वकर्मणामशक्तिस्ततः प्रायश्चित्तांगगत पंचगव्यप्राशनं कुर्यात् । तत्र मंत्रः । ॐ यत्त्वगास्थिगतं पापं देहे तिष्ठति मामके ॥ प्राशनं पंचगव्यस्य दहत्वग्निरिवेंधनम् ॥ १ ॥ मूलं पठित्वा प्रणवेन पंचगव्यं पिबेत् । तद्दिने उपवासं कृत्वा अशक्तश्चेत् पयःपानहविष्यान्ने एकभुक्तिव्रतं वा । पुरश्चरणात्पूर्वदिने स्वेदहशुद्ध्यर्थं पुरश्चारणाधिकारप्राप्त्यर्थं चायुतगायत्रीजपं कुर्यात् । तद्यथा—देशकालौ संकीर्त्य ज्ञाताज्ञातपापक्षयार्थं करिष्यमाणामुक चंडीपुरश्चरणाधिकारार्थममुकमंत्रसिद्ध्यर्थं च गायत्र्ययुतजपमहं करिष्ये । इति संकल्प्य वैदिकगायत्रीम् । “ ॐ ह्रीं दुं दुर्गायै विद्महे अष्टाक्षरायै धीमहि । तन्नश्चंडी प्रचोदयात् ” इति दुर्गागायत्रीं वायुतं जपेत् । ततः तस्यां रात्रौ देवतोपासित शुभाशुभस्वप्नं सर्वदेवोप योगिपद्धतिमार्गेण विचारयेत् । इति पूर्वकृत्यम् । पुरश्चरणदिवसे श्रीमान्साधकेन्द्रः प्रातःकालात्पूर्वं दंडद्वयात्मके ब्राह्मे मुहूर्ते चोत्थाय प्रातः कृत्यादि तीर्थस्नानानांतं सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा गृहे स्नानं कुर्यात् । तद्यथा—तत्कालिकोद्धृतोदकेन उष्णोदकेन वा स्नानं कृत्वा न तु पर्युषितशीतोदकेन ताम्रादिबृहत्पात्रे जलं गृहीत्वा तीर्थान्यावाहयेत् । तत्र मंत्रः । ॐ गंगे च यमुने चैव गोदावरि सर स्वति ॥ नर्मदे सिंधु कावेरि जलेऽस्मिन्सान्निधिं कुरु ॥ १ ॥ इति तीर्थान्यावाह्य ॐ ऋतं च सत्यं० इति मंत्रेणाभिमंत्र्य वरुणमंत्रेण स्नात्वा शुष्कं शुभ्रं कर्पासोत्पन्नं रक्तवस्त्रं प्रयोगोक्तं वा परिधाय ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते ॥ अनुकंपय मां देव गृहा णार्घ्यं नमोऽस्तु ते ॥ इति सूर्यायार्घ्यं दत्त्वा स्नानार्द्रवस्त्रं परिपीड्य आचम्य शैवश्चेत्त्रिपुण्ड्रं वैष्णवो द्वादशोर्ध्वपुण्ड्रं तिलकं कुर्यात् । ततो देव्या अगारे स्वमंदिरे शुचौ देशे गोमयलिप्ते रंगमालाभिरलंकृत्य मंडपे षोडशकदलीस्तंभनिर्मितं यथोक्तसंख्याकं चतुर्दिक्षु चतु र्द्वारोपशोभितं तोरणानि यथोक्तानि स्ववितानध्वजपताकादिभिरलंकृतच्छत्रचामरमंडितानि एवं मंडपद्वारदेशमागत्य सर्वदेवोपयोगि पद्धतिदुर्गामखोत्सवप्रकरणे चावलोक्य द्वारप्रतिष्ठां कृत्वा अशक्तश्चेत् साधारणं कुर्यात् । तद्यथा—मूलेन फट् इति द्वारं संप्रोक्ष्य । पूर्वे—

ॐ गां गूं गणेशाय नमः ॥१॥ दक्षिणे ॐ क्षां ह्रीं वटुकाय नमः ॥२॥ पश्चिमे ॐ क्षां क्षें क्षेत्रपालाय नमः॥३॥ उत्तरे ॐ यां यूं योगिनी गणेभ्यो नमः ॥४॥ देहल्याम् ॐ गं गंगायै नमः ॥५॥ ऊर्ध्वे ॐ यं यमुनायै नमः॥६॥ मध्ये ॐ सं सरस्वत्यै नमः ॥७॥ इति पूजयेत् ॥ इति द्वारपूजां कृत्वा गृहांतः प्रविश्य "गृहीतस्यास्य मंत्रस्य पुरश्चरणसिद्धये॥मयेयं गृह्यते भूमिर्मंत्रोऽयं सिध्यतामिति॥१॥इति मंत्रेण भूमिं संगृह्य क्षेत्रकीलनं कुर्यात् । तद्यथा । अश्वत्थोदुंबरप्लक्षाणामन्यतमान्वितस्तिमात्रान् दश कीलान् मूलेन 'अस्त्राय फट्' इति मंत्रेण अष्टोत्तरशतमभिमंत्र्य । ॐ ये चात्र विघ्नकर्तारो भुवि दिव्यंतारिक्षगाः ॥ विघ्नभूताश्च ये चान्ये मम मंत्रस्य सिद्धिषु ॥ १ ॥ मयैतत्कीलितं क्षेत्रं परित्यज्य विदूरतः ॥ अपसर्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तु मे ॥ २ ॥ इति मंत्रद्वयेन दशदिक्षु दश कीलान् निखनेत् । ततस्तेषु मूलेन । 'अस्त्राय फट्' इति मंत्रेण प्रत्येकं कीलान् संपूज्य तत्रैव पूर्वादिक्रमेण इन्द्रादिलोकपालानावाह्य पंचोपचारैः संपूज्य ततः जपस्थानमध्ये गणेशं कूर्ममनंतवसुधाक्षेत्रपालांश्च संपूज्य दिक्पालेभ्यः क्षेत्रपालगणपतिभ्यश्च माषभक्तबलिं दत्त्वा तद्बाह्ये भूतबलिं दद्यात् । तत्र मंत्रः । ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः॥ मातरोऽप्युग्ररूपाश्च गणाधिपतयश्च ये॥ भूचराः खेचराश्चैव तथा चैवांतरिक्षगाः॥ ते सर्वे प्रीतमनसः प्रतिगृह्णंत्विमे बलिम् ॥ २ ॥ इति मंत्रद्वयेन दशदिक्षु बाह्ये माषभक्तबलिं दद्यात् । ततो वामकरांगुलिभिरर्घ्यजलं चोत्सृज्य पुष्पांजलिमादाय । ॐ भूतानि यानीह वसंति भूतले बलिं गृहीत्वा विधिवत्प्रयुक्तम् ॥ संतोषमासाद्य व्रजंतु सर्वे क्षमंतु नान्यत्र नमोऽस्तु तेभ्यः ॥ १ ॥ इति पुष्पांजलिं दत्त्वा प्रणमेत् । इति क्षेत्रकीलनं कृत्वा हस्तौ पादौ प्रक्षाल्याचमेत् । ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ॥ यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरे शुचिः ॥ इति मंत्रेण मंडपांतरं संप्रोक्ष्य तत्र तावदासनभूमौ कूर्मशोधनं कार्यम्। यत्र जपकर्ता एक एव तदा कूर्ममुखे उपविश्य जपं तत्रैव दीपस्थापनं च कुर्यात् । यत्र बहवो जापकास्तत्र कूर्ममुखोपरि दीपमेव स्थापयेत् । एवं कूर्मशोधनं विधाय तत्रासनाधोजलादिना त्रिकोणं कृत्वा तत्र ॐ कूर्माय नमः ॥ १ ॥ ॐ ह्रीं आधारशक्त्यै नमः ॥ २ ॥ ॐ पृथिव्यै नमः ॥ ३ ॥ इति गंधाक्षतपुष्पैः संपूज्य तदुपरि कुशासनम् ॥ १ ॥ तदुपरि मृगाजि

नम् ॥ २ ॥ तदुपरि कंवलाद्यासनमास्तीर्य स्थापितानां त्रयाणामासनानामुपरि क्रमेण । ॐ अनंतासनाय नमः ॥ १ ॥ ॐ विमलासनाय नमः ॥ २ ॥ ॐ पद्मासनाय नमः ॥ ३ ॥ इति मंत्रत्रयेण त्रीन्दर्भान्प्रत्येकं निदध्यात् । एवमासनं संस्थाप्य तत्र प्राङ्मुख उदङ्मुखो वा उपविश्य । ॐ पृथ्वीति मंत्रस्य मेरुपृष्ठ ऋषिः । कूर्मो देवता । सुतलं छंदः । आसने विनियोगः इति जलं क्षिप्त्वा ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥ इत्यासनं संप्रोक्ष्य मूलेन शिखां बद्ध्वा ऐं आत्मतत्त्वं शोधयामि नमः ॥ १ ॥ ह्रीं विद्यातत्त्वं शोधयामि स्वाहा ॥ २ ॥ क्लीं शिवतत्त्वं शोधयामि स्वाहा ॥ ३ ॥ इति तत्त्वत्रयेणाचम्य । अपक्रामंतु भूतानि पिशाचाः प्रेतगुह्यकाः ॥ ये चात्र निवसंत्यन्या देवता भुवि संस्थिताः ॥ १ ॥ अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ २ ॥ मूलेन फट् इति तालत्रयेण तीक्ष्णदृष्ट्यावलोकनेन विघ्नानुत्सार्य दिग्बंधनं कृत्वा मूलेनाचम्य प्राणानायम्य देशकालौ संकीर्त्य अमुकगोत्रश्चामुकदेवशर्म्माहं श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थममुकमंत्रसिद्ध्यर्थं यथोक्तं नवचंडीशतचंडीसहस्रचंड्ययुतचंडीलक्षचंडीकोटिचंडीविधानं वा श्रीदुर्गाप्रीत्यर्थमहं करिष्ये। अथवा सकलपरिवारस्यायुरारोग्यैश्वर्यसंपद्विवृद्ध्यर्थं पुत्रपौत्रादिसमृद्ध्यर्थंसर्वेप्सितासिद्ध्यर्थं धनधान्यसमृद्ध्यर्थं सकलमनोरथप्राप्त्यर्थमाधिदैविकाधिभौतिकाध्यात्मिकत्रिविधतापोपशमनार्थं जन्मराशेः सकाशाद्दुष्टस्थानस्थिता ग्रहाः ये केचित् क्रूरग्रहास्तत्सर्वारिष्टोपशांत्यर्थं सर्वकामनासंपूर्णतासिद्ध्यर्थं च स्वयमृत्विग्द्वारा वामुकचंडीविधानमहं करिष्ये इति संकल्प्य ब्राह्मणान्[१] वृणुयात् । तद्यथा—पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः ॥ अनुगृह्णंतु मामद्य महाचंड्याख्यकर्मणि ॥ १ ॥ चंडीकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥ श्रोत्रियाः सत्यवादाश्च वेदध्यानरताः पराः ॥ २ ॥ यद्वाक्यामृतसंसिक्ता ऋद्धिं यांति नरद्रुमाः ॥ अंगीकर्वंतु मत्कर्म

१ ब्राह्मणस्वरूपम्—सदाचाराः कुलीनाश्च श्रीमन्तः सत्यवादिनः ॥ चण्डिकापाठसंपूर्णा दयावन्तो जितेन्द्रियाः॥ ईदृग्लक्षणसंपूर्णा दंभमोहविवर्जिताः ॥ ब्रह्मचारिणौ समाहूय सोपाध्यायौ विशेषतः॥ विद्यागमसमायुक्तान्मन्त्रविद्याविशारदान् ॥

कल्पद्रुमसमाश्रिताः ॥ ३ ॥ यथोक्तनियमैर्युक्ता मंत्रार्थस्थिरबुद्धयः ॥ यत्कृपालोकनात्सर्वा वृद्धयो ऋद्धिमाप्नुयुः ॥ ४ ॥ महाचंडीजपे पूज्याः संतु मे नियमान्विताः ॥ अक्रोधनाः शौचपराः सततं ब्रह्मवादिनः ॥ ५ ॥ चंडीध्यानरता नित्यं प्रसन्नमनसः सदा ॥ मालीकभाषिणः संतु मा संतु परवादकाः ॥ ६ ॥ ममापि नियमा ह्येते भवंतु भवतामपि ॥ ७ ॥ इति विप्रानपि स्तुत्वा पादप्रक्षालनं कृत्वा तिलकं दत्त्वा देशकालौ संकीर्त्य अमुकचंड्याख्ये कर्मणि तदंगभूतं सकलकर्म कर्तुममुकगोत्रममुकसप्रवरान्वितममुकशर्माणममुकशाखाध्यायिनं नवार्णसमन्वितसप्तशतीमालासहितैः एभिः पुष्पचंदनवासोऽलंकरणादिभिराचार्यत्वेन त्वामहं वृणे । इत्याचार्यदक्षिणकरे यज्ञसूत्रं बद्धा ततो देशकालौ संकीर्त्य अमुकगोत्रममुकप्रवरान्वितममुकशाखाध्यायिनममुकशर्माणमस्मिन्कर्मणि दाता त्वामहं वृणे ।इति विप्रा नवार्णोपासकाः वरणीयाः। ततो देशकालौ संकीर्त्य प्रारिप्सितकर्मणोऽगभूतमादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं करिष्ये इति संकल्प्य गणपतिपूजनं कुर्यात् । ततः देशकालौ संकीर्त्य प्रारिप्सितकर्मणोऽगभूतं मातृकाप्रतिष्ठापूजनं करिष्ये इति संकल्प्य मातृकाः पूजयेत् । तथा च–ॐ भूर्भुवः स्वः गौरि इहागच्छ इह तिष्ठ गंधाद्युपचारान्समर्पयामि नमः इति सर्वत्र १ । ॐ भू० पद्मे इ० २ ।ॐ भू० शचि इ० ३ । ॐ भू० मेधे० इ० ४ । ॐ भू० सावित्रि इ० ५ । ॐ भू विजये इ० ६ । ॐ भू० जये इ० ७ । ॐ भू० देवसेने इ० ८ । ॐ भू ९ स्वधे इ० ९ । ॐ भू० स्वाहे इ० १० । ॐ भू० मात्रे लोकमात्रे इ०११ । ॐ भू० धृते इ० १२ । ॐ पुष्टे इ० । १३ ॐ भू० तुष्टे इ० १४ । ॐ भू० आत्मकुलदेवते इ०१५ । ॐ भू० गणेश इ० १६ । एवं गौर्यादिषोडशमातृकाःपूजयेत् । ततः ॐ भू० ब्राह्मि इ० १ । ॐ भू० माहेश्वरि इ० २ । ॐ भू० कौमारि इ० ३ । ॐ भू० वैष्णवि इ० ४ । ॐ भू० वाराहि इ० ५। ॐ भू० इन्द्राणि इ० ६ । ॐ भू० चामुंडे इ० ७ । ॐ भू० चंडिके इ० ८ । एवं ब्राह्म्याद्यष्टस्थलमातृकाः पूजयेत् । ततः ॐ भू० कीर्ते इ० १ । ॐ भू० लक्ष्मि इ० २ । ॐ भू धृते इ० ३ । ॐ भू० मेधे इ० ४ । ॐ भू० पुष्टे इ० ५ । ॐ भू० श्रद्धे इ० ६ । ॐ भू० क्रिये इ० ७ ।ॐ भू० मते इ० ८ । ॐ भू० बुद्धे इ० ९ । ॐ भू० लज्जे इ० १० । ॐ भू० श्रीः इ० ११ । ॐ भू० शांते इ० १२ । ॐ भू०

कांते इ० १३। ॐ भू० तुष्टे इ० १४। एव कीर्त्यादिचतुर्दशमातृकाः पूजयेत्। ततः पुनः ॐ भू० कीर्त्ते इ० १। ॐ भू० लक्ष्मि इ० २। ॐ भू० धृते इ० ३। ॐ भू० मेधे इ० ४। ॐ भू० बुद्धे इ० ५। ॐ भू० प्रज्ञे इ० ६। ॐ भू० सरस्वति इ० ७। इति पजयित्वा प्रधानमातृकाः पूजयेत्। तद्यथा—ॐ भू० ऐं महाकालि विच्चे इ० १। ॐ भू० ह्रीं महालक्ष्मि विच्चे इ० २। ॐ भू० क्लीं महासरस्वति विच्चे इ० ३। एवं संपूज्य प्रणमेत्। तथा च। हस्तैः पद्मं रथांगं गुणमथ हरिणं पुस्तकं वर्णमालां टंकं शूलं कपालं दरममृतलसद्धेमकुंभं वहंतीम्॥ मुक्ताविद्युत्पयोजस्फटिकनवजपावंधुरैः पंचवक्रैस्त्र्यक्षैर्वक्षोजनम्रांसकलशशिनिभां मातृकां तां नमामि॥ १॥ इति प्रणम्य अस्य श्रीमातृकापूजनविधेर्न्यूनातिरिक्तं ब्राह्मणानां प्रसादात्सर्वं संपूर्णमस्तु इति वदेत्। इति मातृकापूजनं कृत्वा प्राणायामयोगेन भूतशुद्धिप्राणप्रतिष्ठांतर्मातृकाबहिर्मातृकासृष्टिस्थितिसंहारमातृकान्यासं च कृत्वा देवीकलामातृकान्यासं च कुर्यात्। तथा च—अस्य देवीकलामातृकान्यासस्य प्रजापतिर्ऋषिर्गायत्रीछंदः श्रीमातृकाशारदा देवता हलो बीजानि स्वराः शक्तयः अमुकमंत्रांगत्वेन मातृकान्यासे विनियोगः। ॐ प्रजापतिऋषये नमः शिरसि १। गायत्रीछंदसे नमो मुखे २। शारदा देवतायै नमो हृदि ३। हलबीजेभ्यो नमो गुह्ये ४। स्वरशक्तये नमः पादयोः ५। विनियोगाय नमः सर्वांगे ६। ॐ अं ॐ आं हृदयाय नमः ॥१॥ ॐ इं ॐ ईं शिरसे स्वाहा २। ॐ उं ॐ ऊं शिखायै वषट् ३। ॐ एं ॐ ऐं कवचाय हुम् ४। ॐ ओं ॐ औं नेत्रत्रयाय वौषट् ५। ॐ अं ॐ अः अस्त्राय फट् ६। एवं करांगन्यासं कृत्वा ध्यायेत्। अथ ध्यानम्। शंखचक्राब्जपरशुपालानक्षमालिकाः॥ पुस्तकातनुकुंभौ च त्रिशूलं दधती करैः॥२॥ सितपीतासितश्वेतरक्तवर्णैस्त्रिलोचनैः॥ पंचास्यसंयुतां चंद्रसंक्रांतिं शारदां भजे॥२॥ इति ध्यात्वा मातृका न्यसेत्। तद्यथा—ॐ अं निवृत्त्यै नमः ललाटे १। ॐ आं प्रतिष्ठायै नमः मुखवृत्ते २। ॐ इं विद्यायै नमः दक्षनेत्रे ३। ॐ ईं शांत्यै नमः वामनेत्रे ४। ॐ उं इंधकायै नमः दक्षकर्णे ५। ॐ ऊं दीपकायै नमः वामकर्णे ६। ॐ ऋं रेचिकायै नमः दक्षनासापुटे ७। ॐ ॠं मोचिकायै नमः वामनासापुटे ८। ॐ ऌं परायै नमः दक्षकपोले ९। ॐ ॡं सूक्ष्मायै नमः वामकपोले १०। ॐ एं सूक्ष्मामृतायै नमः

ऊर्ध्वोष्ठे ११। ॐ ऐं ज्ञानामृतायै नमः अधरोष्ठे १२। ॐ ओं आप्यायिन्यै नमः ऊर्ध्वदंतपंक्तौ १३ । ॐ औं व्यापिन्यै नमः अधोदंतपंक्तौ १४ ॐ अं व्योमरूपायै नमः जिह्वायाम् १५ । ॐ अः अनंतायै नमः कंठे १६ । ॐ कं सृष्ट्यै नमः दक्षबाहुमूले १७। ॐ खं ऋद्ध्यै नमः दक्षकूर्परे १८। ॐ गं स्मृत्यै नमः दक्षमणिबन्धे १९ । ॐ घं मेधायै नमः दक्षहस्तांगुलिमूले २०। ॐ ङं कांत्यै नमः दक्षहस्तांगुल्यग्रे २१। ॐ चं लक्ष्म्यै नमः वामबाहुमूले २२। ॐ छं द्युत्यै नमः वामकूर्परे २३। ॐ जं स्थिरायै नमः वाममणिबन्धे २४। ॐ झं स्थित्यै नमः वामहस्तांगुलिमूले २५। ॐ ञं सिद्ध्यै नमः वामहस्तांगुल्यग्रे २६ । ॐ टं जरायै नमः दक्षपादमूले २७। ॐ ठं पालिन्यै नमः दक्षजानुनि २८ । ॐ डं क्षांत्यै नमः दक्षगुल्फे २९। ॐ ढं ईश्वर्यै नमः दक्षपादांगुलिमूले ३०। ॐ णं रत्यै नमः दक्षपादांगुल्यग्रे ३१ । ॐ तं कामिकायै नमः वामपादमूले ३२ । ॐ थं वरदायै नमः वामजानुनि ३३। ॐ दं आह्लादिन्यै नमः वामगुल्फे ३४। ॐ धं प्रीत्यै नमः वामपादांगुलिमूले ३५ । ॐ नं दीर्घायै नमः वामपादांगुल्यग्रे ३६। ॐ पं तीक्ष्णायै नमः दक्षपार्श्वे ३७ । ॐ फं रौद्र्यै नमः वामपार्श्वे ३८। ॐ बं भयायै नमः पृष्ठे ३९ । ॐ भं निद्रायै नमः नाभौ ४०। ॐ मं तंद्रिकायै नमः जठरे ४१ । ॐ यं क्षुधायै नमः हृदि ४२। ॐ रं क्रोधिन्यै नमः दक्षांसे ४३ । ॐ लं क्रियायै नमः ककुदि ४४। ॐ वं उत्कार्यै नमः वामांसे ४५। ॐ शं मृत्युकायै नमः हृदयादिदक्षहस्तांतम् ४६ । ॐ षं पीतायै नमः हृदयादिवामहस्तांतम् ४७। ॐ सं श्वेतायै नमः हृदयादिदक्षपादांतम् ४८। ॐ हं अरुणायै नमः हृदयादिवामपादांतम् ४९। ॐ क्षं असितायै नमः मूर्द्धादिपादांतम् ५०। ॐ ळं अनंतायै नमः पादादिमूर्द्धांतम् ५१। एवं देवीकलामातृकान्यासं कृत्वा प्रयोगोक्तन्यासादिकं कुर्यात्। इति न्यासं विधाय देवीं ध्यात्वा । ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः इति सर्वांगे व्यापकं कृत्वा पीठपूजां कुर्यात् । तद्यथा—पीठादौ रचिते सर्वतोभद्रमंडले मंडलमध्यभागे। ॐ ॐकारपीठाय नमः १ । ॐ पं पूर्णपीठाय नमः । २ ॐ कं कामपीठाय नमः ३ ।

प्राच्यां दिशि। ॐ उं उड्यानपीठाय नमः ४। आग्नेय्याम्। ॐ मां मातृपीठाय नमः ५। दक्षिणे। ॐ जं जालंधरपीठाय नमः ६। नैर्ऋत्ये। ॐ कं कोल्हापुरोपपीठाय नमः ७। पश्चिमे। ॐ पूं पूर्णागिरिपीठाय नमः ८। वायव्याम्। ॐ सौं सौहारोपपीठाय नमः ९। उत्तरे। ॐ कं कोल्हागिरिपीठाय नमः १०। ऐशान्याम्। ॐ कं कामरूपपीठाय नमः ११। इति पीठं संपूज्य। दक्षिणे ॐ गुरवे नमः १। ॐ परमगुरवे नमः २। ॐ परमेष्ठिगुरवे नमः ३। ॐ गुरुपंक्तये नमः ४। ॐ मातापितृभ्यां नमः ५। ॐ उपमन्यु नारदसनकव्यासादिभ्यो नमः ६। वामे। ॐ गं गणपतये नमः१। ॐ दुं दुर्गायै नमः २। ॐ सं सरस्वत्यै नमः ३। ॐ क्षं क्षेत्रपालाय नमः ४। इति नत्वा पीठदेवताः स्थापयेत्। तद्यथा—पीठमध्ये। ॐ मं मंडूकाय नमः १। ॐ आं अधारशक्त्यै नमः २। ॐ मूं मूल प्रकृत्यै नमः ३। ॐ कं कालाग्निरुद्राय नमः ४। तदुपरि। ॐ अं आदिकूर्माय नमः ५। ॐ अं अनंताय नमः ६। ॐ आं आदिवराहाय नमः ७। ॐ पृं पृथिव्यै नमः ८। तदुपरि। ॐ अं अमृतार्णवाय नमः ९। ॐ रं रत्नदीपाय नमः १०। ॐ हं हेमगिरये नमः ११। ॐ नं नन्दनोद्यानाय नमः १२। ॐ कं कल्पवृक्षाय नमः १३। ॐ मं मणिभूतलाय नमः १४। ॐ दं दिव्यमंडपाय नमः १५। ॐ सं स्वर्णवेदिकायै नमः १६। ॐ रं रत्नसिंहासनाय नमः १७। ॐ धं धर्माय नमः १८। ॐ ज्ञां ज्ञानाय नमः १९। ॐ वैं वैराग्याय नमः २०। ॐ ऐं ऐश्वर्याय नमः २१। इति संपूज्य पूर्वे ॐ अं अधर्माय नमः २२। दक्षिणे ॐ अं अज्ञानाय नमः २३। पश्चिमे ॐ अं अवैराग्याय नमः २४। उत्तरे ॐ अं अनैश्वर्याय नमः २५। पुनर्मध्ये। ॐ सत्त्वाय नमः २६। ॐ प्रं प्रबोधात्मने नमः २७। ॐ रं रजसे नमः २८। ॐ प्रं प्रकृत्यात्मने नमः २९। ॐ तं तमसे नमः ३०। ॐ मं मोहात्मने नमः ३१। ॐ सों सोममंडलाय नमः ३२। ॐ सुं सूर्यमंडलाय नमः ३३। ॐ वं वह्निमंडलाय नमः ३४। ॐ मं मायातत्त्वाय नमः ३५। ॐ विं विद्यातत्त्वाय नमः ३६। ॐ शं शिवतत्त्वाय नमः ३७। ॐ ब्रं ब्रह्मणे नमः ३८। ॐ मं महेश्वराय नमः ३९। ॐ आं आत्मने नमः ४०। ॐ अं अंतरात्मने नमः ४१। ॐ पं परमात्मने नमः ४२। ॐ जं जीवात्मने नमः ४३। ॐ ज्ञं ज्ञाना

त्मने नमः ४४। ॐ कं कंदाय नमः ४५। ॐ नं नीलाय नमः ४६। ॐ पं पद्माय नमः ४७। ॐ मं महापद्माय नमः ४८। ॐ रं रत्नेभ्यो नमः ४९। ॐ कें केसरेभ्यो नमः ५०। ॐ कं कर्णिकायै नमः ५१। इति पीठदेवताः संपूज्य नवपीठशक्तीः पूजयेत्। तद्यथा—पूर्वाद्यष्टसु दिक्षु। ॐ नंदायै नमः १। ॐ भगवत्यै नमः २। ॐ रक्तदंतिकायै नमः ३। ॐ शाकंभर्य्यै नमः ४। ॐ दुर्गायै नमः ५। ॐ भीमायै नमः ६। ॐ कालिकायै नमः ७। ॐ भ्रामर्य्यै नमः ८। मध्ये। ॐ शिवदूत्यै नमः ९। इति पूजयित्वा प्रयोगोक्तपीठशक्तिं वा पूजयेत्। इति पीठपूजां कृत्वा पात्रासादनं कुर्यात्॥ अथ पात्रासादनम्॥ तत्रादौ कलशस्थापनप्रयोगः। देव्या अग्रे त्रिकोणमंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां (ह्रीं) विलिख्य ॐ ह्रीं आधारशक्तये नमः इति संपज्य शालिपुंजोपरि स्वर्णादिरचितं कुंभं नवतंतुना वेष्टितं चंदनादिचर्चितं सुधूपितं सहिरण्यं वज्रमुक्ताफलपद्मरागनीलमरकतैः पंचरत्नैः समायुक्तं संस्थाप्य मूलेन नमः इति जलेनापूर्य तत्र कुंकुमागुरुकर्पूरचंदनपंकं सुकुसुमानि च निक्षिप्य तस्य मुखे आम्रदलानि निधाय नारिकेलफलाढ्यं सतंडुलं पात्रं निधाय ॐ भूर्भुवः स्वः वरुण इहागच्छ इह तिष्ठ इति वरुणमावाह्य तन्मध्ये स्वेष्टदेवतां ध्यात्वा गंधाक्षतपुष्पैः संपूज्य प्रणमेत्। इति कलशस्थापनम्। अथ शंखस्थापनम्। देवीवामतः त्रिकोणमंडलं कृत्वा जलेन प्रोक्ष्य त्रिकोणांतर्मायां (ह्रीं) विलिख्य ॐ ह्रीं आधारशक्तये नमः इति संपूज्य मूलेन फट् इति त्रिपदमाधारं प्रक्षाल्य त्रिकोणमध्ये संस्थाप्य तत्र देशे ॐ मं वह्निमंडलाय दशकलात्मने शंखपात्रासनाय नमः इति आधारं संपूज्य आधारे पूर्वादिषु दशाग्निकलाः पूजयेत्। तद्यथा—ॐ यं धूम्रार्चिषे नमः १। ॐ रं ऊष्मायै नमः २। ॐ लं ज्वलिन्यै नमः ३। ॐ वं ज्वालिन्यैः नमः ४। ॐ शं विस्फुलिंगिन्यै नमः ५। ॐ षं सुश्रियै नमः ६। ॐ सं स्वरूपायै नमः ७। ॐ हं कपिलायै नमः ८। ॐ लं हव्यवाहायै नमः ९। ॐ क्षं कव्यवाहायै नमः १०। इति पूजयेत्। ततः ॐ क्लीं महाजलचराय हुं फट् स्वाहा पांचजन्याय नमः इति मंत्रेण प्रक्षालितं शंखमाधारोपरि संस्थाप्य तत्र देशे। ॐ अं सूर्य

[1] अथ कामनापरत्वेन कलशमध्ये निक्षेपपदार्थाः "धनकामो न्यसेत्स्वर्णं धान्यकामस्तु मौक्तिकम्॥ श्रीकामः कमलं न्यस्य कामार्थी दमनं न्यसेत्॥ मोक्षकामो न्यसेद्रत्नं जयकामोऽपराजिताम्॥ उच्चाटनार्थं हिंगूलं वश्यार्थं शिखिमूलिकाम्॥ मारणाय मरीचं तु केतकीं मोहनाय च॥ आकर्षणार्थं धत्तूरं प्रक्षिपेत्कलशोपरि॥"

मंडलाय द्वादशकलात्मने श्रीदुर्गाशंखपात्राय नमः इति शंखं संपूज्य पात्रे स्वाग्रादिप्रादक्षिण्येन द्वादशसूर्यकलाः पूजयेत्। तथा च–ॐ कं भं तपिन्यै नमः १। ॐ खं वं तापिन्यै नमः २। ॐ गं फं धूम्रायै नमः ३। ॐ घं पं मरीच्यै नमः ४। ॐ ङं नं ज्वालिन्यै नमः ५ ॐ चं धं रुच्यै नमः ६। ॐ छं दं सुषुम्णायै नमः ७। ॐ जं खं भोगदायै नमः ८। ॐ झं तं विश्वायै नमः ९। ॐ ञं णं बोधिन्यै नमः १०। ॐ टं ढं धारिण्यै नमः ११। ॐ ठं डं क्षमायै नमः १२। इति पूजयेत्। ततः ॐ क्षं ळं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं इत्येकाधिकपंचाशत् ५१। विलोममातृकामुच्चार्य मूलेन नमः इति शंखे जलमापूर्य तत्र देशे ॐ सोममंडलाय षोडशकलात्मने श्रीदुर्गाशंखपात्रामृताय नमः इति गंधादिभिः संपूज्य जले षोडशचन्द्रकलाः पूजयेत्। तद्यथा–ॐ अं अमृतायै नमः १। ॐ आं मानदायै नमः २। ॐ इं पूषिण्यै नमः ३। ॐ ईं तुष्ट्यै नमः ४। ॐ उं पुष्ट्यै नमः ५। ॐ ऊं वृत्यै नमः ६। ॐ ऋं धृत्यै नमः ७। ॐ ॠं शशिन्यै नमः ८। ॐ ऌं चंद्रिकायै नमः ९। ॐ ॡं कांत्यै नमः १०। ॐ एं ज्योत्स्नायै नमः ११। ॐ ऐं श्रियै नमः १२। ॐ ओं प्रीत्यै नमः १३। ॐ औं अंगदायै नमः १४। ॐ अं पूर्णायै नमः १५। ॐ अः पूर्णामृतायै नमः १६। इति संपूज्याभिमंत्रयेत्। तथा च–"ॐ शंखादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता॥ पृष्ठे प्रजापतिश्चैवमग्रे गंगा सरस्वती॥ १॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया॥ शंखे तिष्ठंति विप्रेन्द्र तस्माच्छंखं प्रपूजयेत्" ॥१॥ इत्यभिमंत्र्य प्रार्थयेत्। तथा च–"ॐ त्वं पुरा सागरा जातो विष्णुना विधृतः करे॥ निर्मितः सर्वदेवैश्च पांचजन्य नमोऽस्तु ते॥ १॥" इति संप्रार्थ्य 'ॐ पांचजन्याय विद्महे पावमानाय धीमहि॥ तन्नः शंखः प्रचोदयात्॥ इति शंखगायत्रीमष्टधा जपित्वा शंखमुद्राः प्रदर्शयेत्॥ इति शंखस्थापनम्॥१॥ ततो देव्यग्रे चार्घ्यं

१ गन्धाक्षतपुष्पयवपंचकुशाग्रबिल्वसर्षपदूर्वाष्टद्रव्याणि अर्घ्यपात्रजले क्षिपेत्–दूर्वाविष्णुक्रांताश्यामाकपद्मानि पाद्यपात्रजले क्षिपेत्–जातीफलकंकोललवंगान्याचमनपात्रजले क्षिपेत्। पयोदधिघृतखण्डानि मधुपर्कपात्रे क्षिपेत्॥

देवीदक्षिणतः प्रोक्षणीपात्रं च एवमेव विधिना संस्थाप्य त्रिरर्घ्यस्थापनानंतरं अर्घाद्वामतः श्रीपात्रं १ गुरुपात्रं २ देवीपात्रं ३ शक्तिपात्रं ४ योगिनीपात्रं ५ भोगपात्रं ६ वीरपात्रम् ७ आत्मपात्रं ८ बलिपात्रम् ९ एतानि नव पात्राणि संस्थाप्य दक्षिणे पाद्यार्घ्याचमनीयमधुपर्काणीति चत्वारि पात्राणि संस्थापयेत् । अशक्तश्चेद्गुरुवीरात्मबलिभोगसंज्ञकानीति पंचपात्राणि पाद्याद्युपचारार्थमेकं वा पात्रं स्थापयेत् । अथ घंटास्थापनं देवीदक्षिणतः 'जगद्ध्वनिमंत्रमातः स्वाहा' इति मंत्रेण घंटां च संपूज्य गरुडमुद्रां प्रदर्शयेत् । ततः गंधाक्षतपुष्पादींश्च पूजोपकरणार्थं स्वदक्षिणपार्श्वे निधाय । "ॐ दुर्गार्चनकाले तु यानि यानीह सांप्रतम् ॥ वस्तूनि सौरभाढ्यानि पवित्राणि भवन्तु वै ॥ १ ॥ मूलेन नमः इति जलेन प्रोक्ष्य जलार्थं बृहत्पात्रं व्यजनं छत्रादर्शचामराणि च स्ववामे संस्थाप्य अखंडदीपस्थापनं कुर्यात् । देवी दक्षिणभागे घृतदीपं वामे तैलदीपं स्थापयेत्।तद्यथा–दक्षिणे दीपपात्रं गोघृतेन तैलेन वाममापूर्य मंत्रवर्णतंतुभिः वर्तिं निक्षिप्य प्रणवेन प्रज्वाल्य सुदर्शनमंत्रेण घृतदीपं पूजयेत् । तत्र मंत्रः "ॐ रां रीं रूं रैं रौं रः ॐ सहस्रारं हुं फट् स्वाहा"१ तैलदीपं पाशुपतास्त्रमंत्रेण पूजयेत् । तत्र मंत्रः । ॐ श्लीं पशु हुं फट् स्वाहा । इति मंत्रेण गंधपुष्पाभ्यां संपूज्य हस्तद्वयेन दीपशिखां स्पृष्ट्वा मंत्रं पठेत् । तत्र मंत्रः "ॐ घोराय घोरतमाय महारौद्राय वीरभद्राय ज्वालामालिने सर्वदुष्टोपसंहर्त्रे हुं फट् स्वाहा ॥ १ ॥"इति पठित्वा पश्चात्तत्तेजसात्मानं समर्प्य ततो वाक्कायचित्तशोधनं कुर्यात् । ॐ हुं फट् स्वाहा । इति मुखे ॐ रक्षरक्ष हुं फट् स्वाहेति हृदि हस्तं दत्त्वात्मरक्षां विधाय 'ॐ' इति मंत्रेण चन्दनपुष्पाणि कराभ्यां मर्दयित्वा पुष्पाक्षतानादाय "ते सर्वे विलयं यांतु ये मां हिंसंति हिंसकाः ॥ मृत्युरोगभयक्लेशाः पतंतु रिपुमस्तके॥१॥"इति मन्त्रेण ऐशान्यां दिशि दूरतः पुष्पं क्षिप्त्वा हस्तौ प्रक्षाल्याचामेत् । (अथ पूजाप्रयोगः) स्वर्णादिनिर्मितं यंत्रं मूर्तिं च ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संशोष्य ॐ वज्रनखदंष्ट्रायुधाय महासिंहासनाय नमः । इति मंत्रेण पुष्पाद्यासनं दत्त्वा मूर्तिं कलशोपरि संस्थाप्य यंत्रं मंडलोपरि च संस्थाप्य प्राणप्रतिष्ठां च कुर्यात् । तद्यथा–देश

१ प्रतिमालक्षणं यथा-आमाघात्पलपर्यन्ता चंडिकाप्रतिमा बुधैः ॥ कर्तव्या च तदर्धा तु यथाशक्त्या नराधिप ॥

कालौ संकीर्त्य मम श्रीदुर्गानूतनयंत्रे मूर्तौ च प्राणप्रतिष्ठां करिष्ये इति संकल्प्य प्रतिष्ठां कुर्यात्। ॐ अस्य श्रीप्राणप्रतिष्ठामंत्रस्य ब्रह्म विष्णुमहेश्वरा ऋषयः ऋग्यजुःसामानि छन्दांसि क्रियामयवपुःप्राणाख्या देवता आं बीजं ह्रीं शक्तिः क्रौं कीलकमस्य नूतनयन्त्रे मूर्तौ च प्राणप्रतिष्ठापने विनियोगः। इति जलं क्षिप्त्वा करेणाच्छाद्य। ॐ आँ ह्रीं क्रौं यँ रं लँ वँ शँ षँ सँ हँ सः सोहमस्य दुर्गासपरिवारयन्त्रस्य प्राणा इह प्राणाः १। पुनः। ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोहं अस्य श्रीदुर्गासपरिवारयन्त्रस्य जीव इह स्थितः २। पुनः। ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोहमस्य श्रीदुर्गा सपरिवारयन्त्रस्य सर्वेन्द्रियाणि इह स्थितानि ३। ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ सः सोहं अस्य श्रीदुर्गासपरि वारयन्त्रस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा। एवमेव विधिना मूर्तिं च प्रतिष्ठाप्य 'यः प्राणतो निमिषतो महित्वे विधेम०' इति मन्त्रं त्रिवारं पठेत्। मनोजूतिर्जुषताम् सुप्रतिष्ठा प्रतिष्ठा इत्युक्त्वा संस्कार सिद्धये पञ्चदश प्रणवावृत्तीः कृत्वा अनेन श्रीदुर्गासपरिवारयन्त्रस्य मूर्तौ च गर्भाधानादिपञ्चदशसंस्कारान्संपादयामि इति वदेत्। ततो यन्त्रराजाय विद्महे महायन्त्राय धीमहि। तन्नो यन्त्रं प्रचोदयात्॥ इत्यष्टोत्तरशतमभिमन्त्र्य देवीं ध्यायेत्। अथ ध्यानम्। "ध्याये न्नित्यां महादेवीं मूलप्रकृतिमीश्वरीम्॥ ब्रह्मविष्णुशिवादीनां पूज्यां वंद्यां सनातनीम्॥ १॥ नारायणीं विष्णुमायां वैष्णवीं विष्णु भक्तिदाम्॥ सर्वस्वरूपां सर्वेशां सर्वाधारां परात्पराम्॥ २॥ तप्तकांचनवर्णाभां सूर्यकोटिसमप्रभाम्॥ ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकातराम्॥ ३॥ दुर्गां शतभुजां देवीं भक्तदुर्गतिनाशिनीम्॥ त्रिलोचनप्रियां साध्वीं त्रिगुणां च त्रिलोचनाम्॥ ४॥ बिभ्रतीं कबरीभारान्मालतीमाल्यमंडितान्॥ वर्तुलं वामवक्त्रं च शंभोर्मानसमोहनम्॥ ५॥ नासादक्षिणभागेन बिभ्रतीं गज मौक्तिकम्॥ सिंदूरबिंदुना शश्वद्भालमध्यस्थलोज्ज्वलाम्॥ ६॥ वह्निशुद्धांशुकाधानां गंधचंदनचर्चिताम्॥ बिभ्रतीं स्तनयुग्मं च कस्तूरीचित्रशोभिताम्॥ ७॥ विधातुश्च विधात्रीं च सर्वधात्रीं च शांकरीम्॥ सृष्टौ स्रष्टुः शिल्परूपां दयां पातुश्च पालने॥ ८॥

संहारकाले संहर्तुः परां संहाररूपिणीम् ॥ निशुंभशुंभमथिनीं महिषासुरमर्दिनीम् ॥ ९ ॥" इति ध्यात्वा स्वशिरसि पुष्पांजलिं दत्त्वावाहयेत् । तत्र मंत्रः । "एह्येहि भगवत्यंव शिवलोकात्सनातने ॥ गृहाण मम पजां च शारदीयां सुरेश्वरि ॥ १ ॥ इहागच्छ जगत्पूज्ये तिष्ठ तिष्ठ महेश्वरि ॥ हे मातरस्यामर्चायां सन्निरुद्धा भवांबिके ॥२॥ इहागच्छंतु त्वत्प्राणाश्चाधःप्राणैः सहाच्युते ॥ इहागच्छंतु त्वरितं तत्रैव सर्वशक्तयः ॥ ३ ॥ ॐ ह्रीं श्रीं क्लीं च दुर्गायै वह्निजायांतमेव च ॥ समुच्चार्योरासि प्राणाः संतिष्ठंतां सदाशिवे ॥ ४ ॥ सर्वेन्द्रियाधिदेवास्ते इहागच्छंतु चंडिके ॥ इहागच्छंतु ते शक्त्या इहागच्छतु चेश्वरः ॥ ५ ॥ दुर्गे देवि इहागच्छ सान्निध्य मिह कल्पय ॥ पूजाभागान्गृहाण त्वं योगिनीकोटिभिः सह ॥ ६ ॥" मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गे इहागच्छ इह तिष्ठ इत्या वाहनं कृत्वा सिंहासनं दद्यात् । तत्र मंत्रः । "अमूल्यरत्ननिर्माणं नानाचित्रविराजितम् । वरं सिंहासनं श्रेष्ठं गृह्यतां शंकरप्रिये ॥ १ ॥" इति सिंहासनं दत्त्वा स्वागतं कुर्यात् । तद्यथा—स्वागतं भगवत्येवं शिवलोकाच्छिवप्रिये ॥ प्रसादं कुरु मे भद्रे भद्रकालि नमोऽस्तु ते ॥ ॥ १ ॥ धन्योऽहं कृतकृत्योऽहं सफलं जीवनं मम ॥ आगतासि यतो मातर्माहेश्वरि ममालयम् ॥ २ ॥ अद्य मे सफलं जन्म सार्थकं जीवनं मम ॥ पूजयामि यतो दुर्गां पुण्यक्षेत्रे च भारते ॥ ३ ॥ स्वागतं देवदेवेशि मद्भाग्यात्त्वमिहागता ॥ प्राकृतं त्वमदृष्ट्वा मां बाल वत्परिपालय ॥ ४ ॥ इति स्वागतं कृत्वा पाद्यादिपूजनं कुर्यात् ॥ अथ पाद्यादिपूजनम् ॥ अमूल्यरत्नपात्रस्थं निर्मलं जाह्नवीजलम् ॥ पादप्रक्षालनार्थाय दुर्गे पाद्यं च गृह्यताम् ॥१॥ मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीदुर्गायै नमः पाद्यं समर्पयामि इति सामान्यार्घोदकेन शंखोदकेन वा पाद्यं दद्यात् । इति पाद्यम्॥१॥ ॐ वेदानामपि वेद्यायै देवानां देवतात्मने॥ आचमं कल्पयामीशि शुद्धानां शुद्धिहेतवे॥१॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गायै नमः आचमनं समर्पयामि । इति कनिष्ठाहीनोन्नतसंयुक्तचतुरंगलीरूपाचमनमुद्रया चंदनपुष्प जातीकर्पूरकंकोललवंगतमालकादिचूर्णसंयुक्तजलं मुखे दद्यात् । इत्याचमनम् ॥ २ ॥ ॐ सर्वकालष्यहीनायै परिपूर्णसुखात्मने ॥ मधुपर्कमिमं देवि कल्पयामि प्रसीद मे ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गायै नमः मधुपर्कं समर्पयामि । इति संयुक्ता

धोमुखानामिकास्पृष्टांगुष्ठात्मिकया मधुघृतशर्करादधिदुग्धसंघातात्मकमधुपर्कं मुखे दद्यात् । इति मधुपर्कः॥३॥ ॐ उच्छिष्टोऽप्यशुचिर्वापि यस्याः स्मरणमात्रतः ॥ शुद्धिमाप्नोति तस्यै ते पुनराचमनीयकम् ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गायै नमः आचमनं समर्पयामि । इत्यामचमनं द्वितीयम् ॥ ४ ॥ ॐ तापत्रयहरं दिव्यं परमानंदलक्षणम् ॥ तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम् ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गायै नमः इदमर्घ्यं समर्पयामि । इत्यनेन कुशाग्राक्षततिलव्रीहियवाज्यसिद्धार्थपुष्पामिश्रित जलात्मकार्घ्यं शिरसि सर्वांगुलीसंयोगेन दद्यात् । इत्यर्घ्यः ॥ ५ ॥ ॐ स्नेहं गृहाण स्नेहेन लोकमातर्महाशये ॥ सर्वलोकेषु शुद्धात्मन् ददामि स्नेहमुत्तमम् ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गायै नमः सुगंधतैलं समर्पयामि । इत्युक्त्वा हरिद्रादिद्रव्यं सुगंधतैलं च उद्वर्तयेत् । इति सुगंधतैलम् ॥ ६ ॥ ॐ परमानंदबोधाब्धिनिमग्ननिजमूर्तये ॥ सांगोपांगमिदं स्नानं कल्पयाम्यहमीश्वरि ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः जलस्नानं समर्पयामि । कनिष्ठाहीनदक्षहस्तमुष्ट्यात्मिकया मुद्रया स्नानीयं दद्यात् । इति जलस्नानम् ॥ ७ ॥ इति जलस्नानं दत्त्वा पंचामृतादिकैः स्नापयित्वा देवीसूक्तेन यथाशक्त्यभिषेकं कुर्यात् । ततः । ॐ माया चित्रपटच्छन्ननिजगुह्योरुतेजसे ॥ निवारणाय विज्ञानवासस्ते कल्पयाम्यहम् ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः उत्तानदक्षिणहस्तांगुष्ठस्पृष्टतन्मध्यमात्मिकया मुद्रया रक्तवस्त्र दद्यात् । इति वस्त्रम् ॥८॥ ॐ यामाश्रित्य महादेवो जगसंहारकस्सदा ॥ तस्यै ते परमेशान्यै कल्पयाम्युत्तरीयकम् ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः इदमुत्तरीय समर्पयामि इत्युत्तरीयम् ॥ ९ ॥ ॐ स्वभावसुंदरांगायै नानाशक्त्याश्रिते शिवे ॥ भूषणानि विचित्राणि कल्पयाम्यमरार्चिते ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः भूषणं समर्पयामि । इति वाक्येन दक्षहस्तांगुष्ठस्पृष्टानामिकात्मिकया मुद्रया भूषणानि दद्यात ॥ १० ॥ ॐ चंदनागुरुकस्तूर्यः कुंकुमं रोचनं तथा ॥ कर्पूरादिसुगंधाढ्यं सर्वाङ्गेषु विलेपयेत् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः चंदनं समर्पयामि । इति वाक्येन मंत्रेणोक्तचंदनं कनिष्ठांगुष्ठसंयोगेन देव्यंगे निवेदयेत् । इति गंधम् ॥ ११ ॥

ॐ अक्षतांस्तंडुलांश्चैव कुंकुमाक्तान्मनोहरान् ॥ गृहाण त्वं महादुर्गे सर्वसिद्धिप्रदा भव ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गा देव्यै नमः अक्षतान् समर्पयामि इति वाक्येन रक्ताक्षतान् सर्वांगुलीभिर्दद्यात् । इत्यक्षताः॥ १२ ॥ तुरीयवनसंभूतं नानागुणमनोहरम् ॥ अमन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः पुष्पं समर्पयामि । इति वाक्येन तर्जन्यं गुष्ठयोगेन दद्यात् । इति पुष्पम् ॥ १३ ॥ ब्रह्मविष्णुशिवादीनां द्रोणपुष्पं सदा प्रियम् ॥ तत्ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये ॥ ॥ १॥ मूलं पठित्वा ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः द्रोणपुष्पं समर्पयामि । इति पठंस्तर्जन्यंगुष्ठयोगेन दद्यात् । इति द्रोणपुष्पम्॥१४॥ अमृतोद्भववृक्षोत्थं शंकरस्य सदा प्रियम् ॥ बिल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरि॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः बिल्वपत्रं समर्पयामि । इति बिल्वपत्रम् ॥ १५ ॥ इति पुष्पांतं पूजयित्वा अस्मिन्नवसरे अंगपूजनं कुर्यात् । तद्यथा–ॐ चंचलायै नमः इति पादौ पूजयामि १ । ॐ आषाढायै नमः जानुद्वयं पू० २ । ॐ कमलवासिन्यै नमः कटिं पू० ३ । ॐ जनन्यै नमो नाभिं पू० ४ । ॐ मन्मथायै नमः स्तनौ पू० ५ । ॐ एकनाभ्यै नमो हृदयं पू० ६ । ॐ ललितायै नमः पाणी पू० ७ । उन्मत्तकंठायै नमः कंठं प० ८ । भूभृत्यै नमो मुखं पू० ९ । ॐ गौर्यै नमो नेत्रे पू० १० । ॐ धात्र्यै नमो नासापुटौ पू० ११ ॐ विधात्र्यै नमः कर्णौ पू० १२ । ॐ सर्वसौवर्णायै नमो ललाटं पू० १३ । ॐ सर्वनिष्कलंकायै नमो मस्तकं पू० १४ । ॐ सर्वसिद्धिप्रदायै नमः सर्वाङ्गं पूजयामि १५ ॥ इति गंधाक्षतपुष्पाभ्यां संपूज्य देव्याज्ञां गृहीत्वा प्रयोगोक्तावरणपूजां संपाद्य धूपादिपूजनं कुर्यात् ॥ अथ धूपादिपूजनम् । मूलेन फडिति धूपपात्रं संप्रोक्ष्य पुरतो निधाय मूलेन नमः इति गंधपुष्पाभ्यां संपूज्य । ॐ(रं)इति वह्निबीजेन उपरि अग्निं संस्थाप्य तदुपरि मूलेन गुग्गुलमिश्रितदशांगं दत्त्वा घंटां वादयन् दक्षतर्जन्यंगुष्ठयोगेन धूप मुद्रया देवतागुणान्कीर्तयन्नाभिदेशतो धूपयेत् । तत्र मंत्रः । ॐ दशांगं गुग्गुलं धूपं चंदनागुरुसंयुतम् ॥ सर्वेषामुत्तमं धूपं श्रीदुर्गायै निवेदयेत् ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगायै सपरिवारायै सवाहनायै सायुधायै श्रीदुर्गादेव्यै नमः धूपं समर्पयामि । इति पठित्वा

देव्या वामभागे धूपपात्रं निधाय शंखजलमुत्सृजेत्। इति धूपः १६। दीपपात्रं गोघृतेनापूर्य मंत्राक्षरतंतुभिर्वर्तिं निक्षिप्य प्रणवेन(ॐ) प्रज्वाल्य घंटां वादयन् मध्यमांगुष्ठलग्नदीपमुद्रया नेत्रादिपादपर्यंतं दीपं दर्शयेत्। तत्र मंत्रः। ॐ घृताद्यैर्वर्तितश्चैव महातेजोमयो ज्वलन्॥ महान्तमंधकारं च निवारयति भूतले॥ मूलं पठित्वा। ॐ भूर्भुवः स्वः सांगायै सपरिवारायै सवाहनायै सायुधायै श्रीदुर्गा देव्यै नमो दीपं समर्पयामि। इति देवीदक्षिणतः दीपपात्रं निधाय शंखजलमुत्सृजेत्। इति दीपः १७। देव्यग्रे देवीदक्षिणतो वा जलेन चतुरस्रं मंडलं कृत्वा स्वर्णादिनिर्मितं भोजनपात्रं निधाय तन्मध्ये षड्रसोपेतं विविधप्रकारं पायसं वा निधाय मूलेन ॐ ह्रीं नमः इत्यर्घ्योदकेन संप्रोक्ष्य मूलेन संवीक्ष्य अधोमुखदक्षिणहस्तोपरि तादृशं वामं निधाय नैवेद्यमाच्छाद्य ॐ (यं) इति वायुबीजेन षोडशधा संजप्य वायुना तद्गतदोषान् संशोध्य ततो दक्षिणकरतले तत्पृष्ठलग्नवामकरतलं कृत्वा नैवेद्यं प्रदर्श्य ॐ (रं) इति वह्निबीजं षोडश वारं संजप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा वामकरतले अमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य ॐ (वं) इति सुधाबीजं षोडशवारं संजप्य तदुत्थामृतधारया प्लावितं विभाव्य मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य देव्यास्योद्गतं तेजः स्मृत्वा वामांगुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा'सत्पात्रसिद्धं सुहविर्विविधानेकभक्षणम्॥नैवेद्यं मनसाभीष्टं श्रीदुर्गायै निवेदयेत्॥ १॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगायै सपरिवारायै सायुधायै श्रीदुर्गायै नमः इदं नैवेद्यं गृहाण स्वाहा। इति नैवेद्यं समर्प्य वामहस्तेन अनामिकामूलयोरंगुष्ठयोगेन ग्रासमुद्रां प्रदर्श्य देवीं भुक्तवतीं विभाव्य जलं दद्यात्। इति नैवेद्यम्॥ १८॥ नमस्ते देवदेवेशि सर्वतृप्तिकरं वरम्॥ परमानंदसंपूर्णे गृहाण जलमुत्तमम्॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगायै सपरिवारायै सवाहनायै सायुधायै श्रीदुर्गादेव्यै नमः जलं समर्पयामि। इति मंत्रेण स्वर्णादिपात्रस्थं कर्पूरादिसुवासितं जलं निवेद्य देव्या तज्जलं प्राशितमिति भावयन् अंतःपटं दद्यात्। इति जलम्॥ १९॥ ततः देव्याः सपरिवाराया देवतायाः तृप्तिं विभाव्य हस्तप्रक्षालनार्थं चंदनेन करोद्वर्तनं कृत्वा उष्णोदकेन आचमनं दद्यात्। तत्र मंत्रः। उच्छिष्टोऽप्यशुचिर्वापि यस्याः स्मरणमात्रतः॥ शुद्धिमाप्नोति

तस्यै ते प्रराचमनीयकम् ॥ १ ॥ मूलं पठित्वा ॐ भूर्भुवः स्वः सांगायै सपरिवारायै सवाहनायै सायुधायै श्रीदुर्गादेव्यै नमः आचमनं समर्पयामि । इत्याचमनम् ॥ २० ॥ इत्याचमनं दत्त्वा गंडूषार्थं जलं दद्यात् । कर्पूरैर्नागवल्लीभिः क्रमुकादिभिरन्वितम् ॥ शिववक्षो निवासायै तांबूलं च समर्पये ॥ १ ॥ मलं पठित्वा ॐ भूर्भुवः स्वः सां० श्रीदुर्गादेव्यै नमः तांबूलं समर्पयामि । इति तांबूलम् ॥ २१ ॥ फलैश्च पुरनारंगैः कदलीमधुरैस्तथा ॥ नारिकेलसमायुक्तं फलं च प्रतिगृह्यताम् ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः सां० श्री दुर्गादेव्यै नमः फलं समर्पयामि । इति फलम् ॥ २२ ॥ हिरण्यगर्भगर्भस्थं हेम बीजं विभावसोः ॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ १ ॥ मूलं पठित्वा । ॐ भूर्भुवः स्वः श्रीदुर्गादेव्यै नमः दक्षिणां समर्पयामि । इति हिरण्यादिदक्षिणां दद्यात् ॥ २३ ॥ शालि गोधूमपिष्टेन त्रिकोणाकारं प्रयोगोक्तं वा अमुकसंख्यापरिमितदीपं निर्माय स्वर्णादिस्थालीमध्ये संस्थाप्य घृतेनापूर्य कर्पूरादिवर्तिं निक्षिप्य मायाबीजेन (ह्रीं) प्रज्वाल्य मूलेनार्तिक्यं संपूज्य मूलं पठित्वा देव्युपरि नेत्रादिपादपर्यंतं नववारांस्त्रिवारान्वा भ्रामयेत् । घंटां च वादयेत् । तत्र मंत्रः । अंतस्तेजो बहिस्तेजो ह्येकीकृत्य निरंतरे ॥ त्रिधा देव्या परिभ्राम्य कुलदीपं निवेदयेत् ॥ १ ॥ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ॥ त्वमेव सर्वज्योतिस्त्वमार्तिक्यं मे गृहाण वै ॥ २ ॥ मूलं पठित्वा । ॐ भू० श्रीदुर्गादेव्यै नमः आर्तिक्यं समर्पयामि । इत्युच्चरन् देव्या दक्षिणतः निधाय शंखजलमुत्सृजेत् । इति नीराजनम् ॥ २४ ॥ ॐ कदलीगर्भसंभूतकर्पूरैश्च प्रदीपितम् ॥ आरार्तिक्यमहं कुर्वे पश्य मे वरदा भव ॥ १ ॥ मूलं पठित्वा । ॐ भू० श्रीदुर्गादेव्यै नमः कर्पूरार्तिक्यं प्रदर्शयामि । इति कर्पूरार्तिक्यम् ॥ २५ ॥ ॐ " यानि कानि च पापानि जन्मांतरकृतानि वै ॥ तानि सर्वाणि नश्यंतु प्रदक्षिणपदे पदे " ॥ १ ॥ इति पठित्वा एकां (१) प्रदक्षिणां कुर्यात् ॥ २६ ॥ " प्रपन्नं पाहि मामीशे भीतं मृत्युमहार्णवात् " इति वदन् साष्टांगं प्रणमेत् ॥ ॥ २७ ॥ ततः पुष्पांजलिमादाय " नानासुगंधयुक्तं च यथाकालोद्भवं तथा ॥ मया पुष्पांजलिं दत्तं गृहाण परमेश्वरि " ॥ १ ॥ मूलं पठित्वा ॐ भू० श्रीदुर्गादेव्यै नमः पुष्पांजलिं समर्पयामि । इति पुष्पांजलिः ॥ २८ ॥ इति पुष्पांजलिं दत्त्वा ततः स्तुतिपाठेन

देवीं स्तुत्वा बद्धांजलिपूर्वकं प्रार्थयेत्। तद्यथा—" ज्ञानतोऽज्ञानतो वाथ यन्मया क्रियते शिवे ॥ मम कृत्यमिदं सर्वमिति देवि क्षमस्व मे ॥ १ ॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ २ ॥ अपराधो भवत्येव सेवकस्य पदे पदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं विना ॥ ३ ॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ त्वयि जातापराधानां त्वमेव शरणं शिवे " ॥ ४ ॥ इति संप्रार्थ्य देवीवामकरे पूजार्पणजलं दत्वा सर्वदेवोपयोगिपद्धतिमार्गेण कुमारीपूजनं कृत्वा दिग्देवीभ्यो बलिं दद्यात्। तद्यथा—बलिं द्रव्येण पिंडवत्कृत्वा गंधादिभिः संपूज्य तस्योपरि दीपं दानविधिक्रमेण संस्थाप्य ॐ भूर्भुवः स्वः गजारूढे कादंबरि एह्येह्यागच्छागच्छ गंधाद्युपचारसहितसदीपमाषभक्तबलिर्नमः एवं सर्वत्र ॥ १ ॥ ॐ भू० अजारूढे उल्के ए० २। ॐ भू० महिषारूढे करालि ए० ३। प्रेतारूढे रक्ताक्षि ए० ४। उग्गारूढे श्वेतवक्त्रे ए० ५। मृगारूढे हरिते ए० ६। सिंहारूढे यक्षिणि ए० ७। वृषारूढे कंकालि ए० ८। हंसारूढे सुरज्येष्ठे ए० ९। अहिवाहिनि सर्वराज्ञि ए० १०। एवं दिग्देवीनां बलिं दत्त्वा नवग्रहेभ्यो दद्यात्। तद्यथा—मध्ये वृत्तमंडले सप्ताश्वरथारूढ सूर्य्य ए० १। आग्नेये चतुरस्रपीठे मृगारूढ सोम ए० २। दक्षिणे त्रिकोणपीठे मेषारूढ अंगारक ए० ३। ईशाने बाणाकृतिपीठे सिंहारूढ सौम्य ए०४। उत्तरे पट्टिशाकारपीठे हयारूढ आंगिरस ए० ५। प्राच्यां पंचकोणपीठे श्वेताश्वारूढ भार्गव ए० ६। पश्चिमे धनुराकारपीठे गृध्रारूढ मन्द ए०७। नैर्ऋत्ये सूर्याकारपीठे सिंहारूढ राहो ए० ८। वायुकोणे ध्वजाकारपीठे केतो ए० ९। इति ग्रहेभ्यो बलिं दत्त्वा पंचलोकपालेभ्यो बलिं दद्यात्। तद्यथा—नैर्ऋत्ये शूर्पाकृतिपीठे उंदुरारूढ गणेश ए० १। पश्चिमे धनुराकृतिशनिपीठे सिंहारूढे दुर्गे ए० २। मध्ये वृत्तपीठे मृगकृष्णसमारूढ वायो ए० ३। नैर्ऋत्ये शूर्पाकारराहुपीठे आकाश ए० ४। वायव्ये ध्वजाकारपीठे अश्विनीकुमारौ ए० ५। इति बलिं दत्त्वा पूर्वादिक्रमेण इन्द्रादिदशदिक्पालेभ्यो बलिं दद्यात्। तद्यथा—कौशिक गजारूढ इन्द्र ए० १। मेषारूढ यम अग्ने० २। महिषारूढ यम० ३। कौशिकारूढ नैर्ऋत० ४। मकरारूढ वरुण० ५। मृगारूढ वायो ए० ६। दशाश्वसमारूढ कुबेर० ७। वृषारूढ ईश्वर० ८। हंसारूढ ब्रह्मन्० ९।

गरुडारूढ अनंत० इति बलिदानं समाप्य हस्तौ पादौ प्रक्षाल्याचम्य मालायाः संस्कारान्कुर्यात् ॥ अथ मालायाः संस्काराः ॥ कुशो दकसहितैः पंचगव्यैर्मालां प्रक्षाल्य अश्वत्थपत्रे नवे रचिते कमले वा स्थापयित्वा ॥ ॐ ह्रीं अँ आँ इँ ईं उँ ऊं ऋँ ॠँ लृँ लॄँ एँ ऐं ओं औं अँ अः कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ बँ भँ मँ यँ रं ॅ व शँ षँ सँ हँ ळँ क्षँ इत्येतानि मातृकाक्षराणि मूलमंत्रं च मालायां विन्यस्य पुनः पंचगव्येन प्रोक्ष्य ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवेनातिभवे भवस्वमां भवोद्भवाय नमः ॥१ ॥इति मन्त्रेण शीतजलेन प्रक्षालयेत् ॥ पुनः ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमः ॥ इति मंत्रेण चन्दनागुरुकर्पूरादिसुगन्धद्रव्यैर्घर्षयेत् ॥ २ ॥ ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्य इति मंत्रेण तां धूपयेत् ॥ ३ ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ इति मंत्रण मालायां चन्दनं लेपयेत्॥४॥ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥इति मंत्रेण मेरुसहितं प्रत्येकमणिं सकृदसकृद् वाभिमन्त्रयेत् ॥इत्यभिमन्त्र्य अस्या मालायाः इति शब्दं संयोज्य प्राणप्रतिष्ठामंत्रेण मालायाः प्राणप्रतिष्ठां कृत्वा ध्यायेत् ॥ "ॐ माले माले महामाये सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव" ॥१॥ इति मालां संप्रार्थयेत् ॥ इति मालां प्रतिष्ठाप्य एकाग्रमनाः संभाषणादि परिहरन्दिशोऽनवलोकयन्देवीं मनसा ध्यायन्संपूर्णवर्णस्वरोच्चारतत्पदमात्राविभक्तिविवेकज्ञानवान्निराहारो यताहारो नक्तंभोजी अधःशायी कवचार्गलाकीलकं सकृज्जपित्वा ततः सप्तशतीमालास्तोत्रं त्रयोदशाध्यायात्मकम् ॐ कारमादौ संयोज्य पठेत् ॥ शतमादौ शतं चांते नवार्णं जपेत् ॥ एवं नवचंडीविधाने नित्यचंडीविधानेऽप्येवं नवदुर्गाविधानेऽप्येवं कालरात्रिविधानेऽप्येवं शतचंड्यादिविधाने ऊह्यम् ॥ प्रत्येकं कवचार्गलाकीलकादि कृत्वा मध्ये चारित्रत्रयमालां कृत्वा रहस्यसहितां जपित्वा शतावृत्तिजपं कृत्वा तद्दशगुणितं सहस्रचंड्या विधानेऽप्येवम् । केवलमंत्रानुष्ठाने । "ॐ अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा ॥" इति मंत्रेण दक्षिणहस्ते मालामादाय

हृदये धारयन् स्वेष्टदेवीं ध्यात्वा मध्यमांगुलिमध्यपर्वणि संस्थाप्य ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो मंत्रार्थं स्मरन्यथाशक्ति प्रातःकालमारभ्य मध्यंदिनं यावत् मूलमंत्रं जपेत् । नित्यमेव सामान्यजपः कार्यो न तु न्यूनाधिकः । ततो जपांते ॥ " ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ॥ शुभं कुरुष्व मे भद्रे यशो वीर्य्यं च सर्वदा ॥ तेन सत्येन सिद्धिं मे देहि मातर्नमोऽस्तु ते ॥ १ ॥ " ॐ ह्रीं सिद्ध्यै नमः इति मालां शिरसि निधाय गोमुख्यां रहस्यास्थापयेत् ॥ नाशुचिः स्पृशेत् । नान्यस्मै दद्यात् । अशुचिस्थाने न निदध्यात् । स्वयोनिवत् गुप्तां कुर्यात् । ततः कवचस्तोत्रसहस्रनामादिकं पठित्वा पुनः मूलमंत्रेण न्यासादिकं विधाय देवीं पंचोपचारैः संपूज्य पुष्पांजलिं च दत्त्वा जपस्य देव्या अर्पणं कुर्यात् । अर्घोदकेन चुलुकमादाय । " ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वयि स्थितम् ॥ १ ॥ ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृत तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा । मदीयं च सकलं श्री दुर्गादेव्यै समर्पयामि नमः । ॐ तत्सदिति ब्रह्मार्पणं भवतु ।" इति देवीवामकरे जपसमर्पणं कृत्वा कृतांजलिपूर्वकं क्षमापनं पठेत् ॥ अथ क्षमापनम् ॥ " आवाहनं न जानामि न जानामि विसर्जनम् ॥ पूजाभागं न जानामि त्वं गतिः परमेश्वरि ॥ १ ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ॥ यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥२॥ यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ३ ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ त्वमंतः सर्वभूतानां वीक्षसे परमेश्वरि ॥ ४ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारुण्यभावेन क्षमस्व परमेश्वरि ॥ ५ ॥ मातर्योनिसहस्रेषु सहस्रेषु व्रजाम्यहम् ॥ तेषु तेष्वचला भक्तिरच्युतेऽस्तु सदा त्वयि ॥ ६ ॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसंपत्तिः पुण्याच्च तव दर्शनात् ॥ ७ ॥ देवी दात्री च भर्त्री च देवीरूपमिदं जगत् ॥ देवी जयति सर्वत्र या देवी साहमेव हि ॥ ८ ॥ क्षमस्व देवदेवेशि मत्कृतं भुवनेश्वरि ॥ तव पादांबुजे नित्यं निश्चला भक्तिरस्तु मे " ॥ ९ ॥ इति कृतांजलिः प्रार्थयित्वा ततः शंखजलमुद्धृत्य देव्या उपरि भ्राम

यित्वा " साधु वासाधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देवि गृहाणाराधितं मम " इत्युच्चरन् देव्यै स्ववामकरेण किंचि जलं दत्त्वा प्राग्वदर्घ्यं देवीशिरसि दत्त्वा शंखं यथास्थाने निवेश्य ततः गतसारनैवेद्यं किंचिदुद्धृत्य ऐशान्यां दिशि ॐ ह्रीं उच्छिष्ट चांडाल्यै नमः इति उच्छिष्टचांडालीं संपूज्य " ॐ उच्छिष्टचांडालिनि देवि निर्माल्यैश्चंदनादिभिः ॥ लेह्यचोष्यान्नपानादिनिर्माल्यस्त्र ग्विलेपनैः ॥ १ ॥ निर्माल्यभोजनं तुभ्यं ददामि श्रीशिवाज्ञया " इति मंत्रेण निर्माल्यैस्तदुच्छिष्टभोजनं दत्त्वा तच्छेषनैवेद्यं शिरसि धृत्वा देवीभक्तेषु विभज्य स्वयं भुक्त्वा देवीं विसर्जयेत् । तत्र मंत्रः । " ॐ गच्छ गच्छ परं स्थानं स्वस्थानं परमेश्वरि ॥ पूजा राधनकाले च पुनरागमनाय च । " इति पठित्वा संहारमुद्रया देवीं विसृज्य स्वहृदये स्थापयेत् ॥ तत्र मंत्रः । ॐ तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वरि ॥ यत्र ब्रह्मादयो देवाः सर्वे तिष्ठंति मे हृदि ॥ १ ॥ " इति हृदयकमले हस्तं दत्त्वा देवीं संस्थाप्य मानसोपचारैः संपूज्य स्वात्मानं देवरूपं भावयन्यथासुखं विहरेत् । एवमेव विधिना जपं समाप्य जपांते तद्दशांशतो नित्यहोमं वा कुर्यात् ॥ अथ दुर्गामखोत्सवप्रारंभः ॥ यागभूमिं संशोध्य षोडशस्तंभसहितं मंडपं सवितानं चतुर्द्वारं तोरणवेष्टितं कृत्वा दिव्यवस्त्रपट्टदुकूलादि भिर्देवतागारं श्रीगिरिं कृत्वा कदलीस्तंभविराजितं सुमनोहरं पुष्पमालोपशोभितं मंडपं विधाय तन्मध्ये होमानुसारतः कुंडं चतुरस्रं प्रयो गोक्तं वा मेखलात्रययुतं योनिसहितं कुर्यात् । अथवा स्थंडिलं कुर्यात् । स्तंभतोरणादिप्रतिष्ठापूजनं सर्वदेवोपयोगिपद्धतिमार्गेण कृत्वा तेनैवाग्निं संस्थाप्य प्रधानहोमं समाप्य चरुतिलाज्येन पुनर्होमं कुर्यात् । तत्र क्रमः । ॐ गणपतये नमः स्वाहा इदं गणपतये न मम इति सर्वत्र १ ॥ ॐ दुर्गायै० २ ॥ ॐ सरस्वत्यै० ३ ॥ ॐ क्षेत्रपालाय नमः स्वाहा० ४ ॥ ॐ कादंबर्य्यै० ५ ॥ ॐ उल्कायै० ६ ॥ ॐ कराल्यै० ७ ॥ ॐ रक्तायै० ८ ॥ ॐ श्वेतकौबेर्य्यै० ९ ॥ ॐ यक्षिण्यै० १० ॥ ॐ काल्यै० ११ ॥ ॐ सुरश्रेष्ठायै० १२ ॥ ॐ जं जयायै० १३ ॥ ॐ विं विजयायै नमः स्वाहा इदं० १४ ॥ ॐ जं जयंत्यै० १५ ॥ ॐ अं अपराजितायै० १६ ॥ ॐ निं नित्यायै० १७ ॥ ॐ विं विलासिन्यै० १८ ॥ ॐ दों दोग्ध्र्यै० १९ ॥ ॐ अं अघोरायै० २० ॥ ॐ मं मंगलायै नमः २१ ॥ ॐ धात्रे नमः २२ ॥ ॐ

विधात्रे० २३ ॥ ॐ शंखनिधये० २४ ॥ ॐ पद्मनिधये० २५ ॥ ॐ द्वारश्रियै० २६ ॥ ॐ वास्तुपुरुषाय० २७ ॥ ॐ ऐरावताय० २८ ॥ ॐ पुंडरीकाय० २९ ॥ ॐ वामनाय० ३० ॥ ॐ कुमुदाय० ३१ ॥ ॐ अंजनाय० ३२ ॥ ॐ पुष्पदंताय० ३३ ॥ ॐ सार्वभौमाय० ३४ ॥ ॐ सुप्रतीकाय० ३५ ॥ ॐ दमनकाय० ३६ ॥ ॐ पुंडरीकाय० ३७ ॥ ॐ गुग्गुलाय० ३८ ॥ ॐ कुरंटकाय० ३९ ॥ ॐ ऋग्वेदाय० ४० ॥ ॐ यजुर्वेदाय० ४१ ॥ ॐ सामवेदाय० ४२ ॥ ॐ अथर्ववेदाय० ४३ ॥ इति होमं कृत्वा ग्रहमखं कुर्यात् । ॐ आदित्याय० ४४ ॥ ॐ सोमाय० ४५ ॥ ॐ भौमाय० ४६ ॥ ॐ बुधाय० ४७ ॥ ॐ बृहस्पतये० ४८ ॥ ॐ शुक्राय० ४९ ॥ ॐ शनैश्चराय० ५० ॥ ॐ राहवे० ५१॥ ॐ केतवे० ५२ ॥ ततः ॐ रुद्राय० ५३ ॥ ॐ गौर्यै० ५४ ॥ ॐ स्कंदाय० ५५ ॥ ॐ विष्णवे० ५६ ॥ ॐ ब्रह्मणे० ५७ ॥ ॐ इंद्राय० ५८ ॥ ॐ यमाय० ५९ ॥ ॐ कालाय० ६० ॥ ॐ चित्रगुप्ताय० ६१ ॥ ॐ अग्नये० ६२ ॥ ॐ अद्भ्यः स्वाहा इदमद्भ्यो न मम ६३ ॥ ॐ महाभार० ६४ ॥ ॐ इंद्राय० ६५॥ ॐ इन्द्राण्यै० ६६ ॥ ॐ वरुणाय० ६७ ॥ ॐ सर्पाय० ६८॥ ॐ ब्रह्मणे० ६९॥ ॐ अनंताय० ७० ॥ ॐ वासुकये० ७१ ॥ ॐ तक्षकाय० ७२ ॥ ॐ कर्कोटकाय० ७३ ॥ ॐ पद्माय० ७४॥ ॐ महापद्माय० ७५॥ ॐ शंखपालाय नमः ०७६॥ ॐ कंवलाय नमः० ७७ ॥ ॐ कुलिकाय० ७८ ॥ ॐ गणपतये० ७९ ॥ ॐ दुर्गायै० ८० ॥ ॐ वायवे० ८१ ॥ ॐ आकाशाय० ८२ ॥ ॐ अश्विदेवाभ्यां० ८३ ॥ इति होमं कृत्वा पीठदेवताहोमं कुर्यात् । ॐ ओंकारपीठादिकामरूपपीठांतेभ्यो नमः स्वाहा इति पीठेभ्यो नमः ८४ ॥ ततः ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः स्वाहा० ८५ ॥ इति होमं कृत्वा मंडूकादिपृथक्पृथङ्नाम्ना वा होमयेत् । तत्पश्चादावरणदेवताहोमं कुर्यात् । तद्यथा–ॐ गं गणपतये० ८६ ॥ ॐ क्षं क्षेत्रपालाय० ८७॥ ॐ पं पादुकाभ्यो० ८८॥ ॐ वं वटुकत्रयाय० ८९ ॥ ॐ अं अग्निमुखवेतालाय० ९० ॥ ॐ प्रं प्रेतवाहनवेतालाय० ९१ ॥ ॐ जं ज्वालामुखवेतालाय० ९२ ॥ ॐ धूं धूम्राक्षवेतालाय० ९३ ॥ ॐ जं जयायै० ९४॥ ॐ विं विजयायै० ९५॥ ॐ जं जयंत्यै० ९६ ॥ ॐ अं अपराजितायै० ९७ ॥ ॐ निं नित्यायै नमः स्वाहा०९८॥ ॐ विं विलासिन्यै०९९॥ ॐ दं दोग्ध्र्यै०१००॥ ॐ अं अघोरायै०१०१॥ॐ मं मंगलायै०१०२॥ॐ हं हंसवाहिन्यै ब्राह्म्यै विद्ये नमः स्वाहा इदं

ब्राह्म्यै नम० १०३ ॐ ह्लौं वृषभवाहिन्यै माहेश्वर्य्यै विच्चे नमः स्वाहा० १०४॥ ॐ क्लीं मयूरवाहिन्यै कौमार्यै विच्चे नमः स्वाहा १०५॥ ॐ श्रीं गरुड वाहिन्यै वैशाख्यै विच्चे नमः स्वाहा १०६ ॥ ॐ दं दंष्ट्रोद्धृतवसुंधरायै वाराह्यै नमः स्वाहा १०७ ॥ ॐ क्ष्म्रौं स्तंभोद्भवायै नारसिंह्यै विच्चे नमः स्वाहा १०८ ॥ ॐ लौं गजवाहिन्यै ऐंद्र्यै विच्चे नमः स्वाहा १०९ ॥ ॐ खें गणनाथपरिवारायै सदा रुद्रेण संयुक्तायै चंड मुण्डमंडितायै सिंहारूढायै चामुंडायै विच्चे नमः स्वाहा ११० ॥ ॐ ह्रीं हेमगर्भायै नंदायै विच्चे नमः स्वाहा १११ ॥ ॐ ह्रीं सुरक्तायै रक्तदंतिकायै विच्चे नमः स्वाहा ११२ ॥ ॐ ह्रीं नीलायै शाकंभर्य्यै विच्चे नमः स्वाहा ११३ ॥ ॐ ह्रीं सर्वरूपार्ति हारिण्यै दुर्गायै विच्चे नमः स्वाहा ११४॥ ॐ ह्रीं दंष्ट्राञ्चितमुखायै नीलपात्रशिरोधरायै भीमायै विच्चे नमः स्वाहा ११५॥ ॐ ह्रीं तेजोमंडल-दुर्धर्षायै वरदायै भ्रामर्यै विच्चे नमः स्वाहा ११६ ॥ ॐ यं यक्षिण्यै० ११७ ॥ ॐ कं कालिकायै ११८ ॥ ॐ सं सुरश्रेष्ठायै० ११९ ॥ ॐ दं दशाननायै० १२० ॥ ॐ रं रत्यै० १२१॥ ॐ प्रं प्रीत्यै० १२२॥ ॐ वं विश्वेश्वर्यै० १२३॥ ॐ अं अष्टादशभुजायै मनोभवायै० १२४॥ ॐ अणिम्ने० १२५ ॥ ॐ महिम्ने० १२६ ॥ ॐ लघिम्ने० १२७ ॥ ॐ गरिम्णे० १२८॥ ॐ प्राप्त्यै० १२९॥ ॐ प्राकाम्यै० १३० ॥ ॐ ईशितायै० १३१॥ ॐ वशितायै० १३२ ॥ ॐ असितांगभैरवाय० १३३ ॥ ॐ रुरुभै० १३४ ॥ ॐ चंडभै० १३५ । ॐ क्रोधभै० १३६ ॥ ॐ उन्मत्तभै० १३७ ॥ ॐ कपालभै० १३८ ॥ ॐ भीषणभै० १३९॥ ॐ संहारभै० १४०॥ इति होमं कृत्वा लोकपालेभ्यो जुहुयात् । तद्यथा—लँ वज्रहस्ताय सुराधिपतये इंद्राय० १४१॥ ॐ रं शक्तिहस्ताय तेजोऽधिपतये अग्नये० १४२॥ ॐ मं दंडहस्ताय प्रेताधिपतये यमाय० १४३॥ ॐ क्षं खड्गहस्ताय रक्षोऽधि-पतये निर्ऋतये० १४४॥ ॐ वं पाशहस्ताय जलाधिपतये वरुणाय० १४५॥ ॐ यं अंकुशहस्ताय प्राणाधिपतये वायवे० १४६॥ ॐ सं गदाहस्ताय नक्षत्राधिपतये० १४७ ॥ ॐ हैं त्रिशूलहस्ताय विद्याधिपतये ईशानाय० १४८ ॥ इति होमं कृत्वा ततः ॐ गुं गुरुभ्यो नमः १४९ ॥ ॐ पं परमगुरुभ्यो नमः स्वाहा १५० ॥ ॐ पं परमेष्ठिगुरुभ्यो० १५१॥ ॐ गं गणेशाय० १५२॥ ॐ हं हरये० १५३॥ ॐ हैं हराय० १५४ ॥ एताभ्यो देवताभ्य एकैकाज्यचरुतिलाज्याहुतयः ॥ ततः पूर्वोक्तसर्वन्यासं कृत्वा वह्नौ पीठपूजां कृत्वा हुताशने देवीमावाह्य पंचोपचारैः

संपूज्य अग्निमध्यभागे ॐ ह्रीं महालक्ष्म्यै विच्चे नमः स्वाहा इदं महालक्ष्म्यै न मम१।इति सर्वत्र ।तद्दक्षिणभागे॥ॐ ऐं महाकाल्यै विच्चे नमः म०सं० १
स्वाहा २। देव्या वामभागे ॥ ॐ क्लीं महासरस्वत्यै विच्चे नमः स्वाहा ३ ।इति त्रिराहुतिं हुत्वा पुनस्तत्रैव देव्या दक्षिणभागे॥ ॐ क्ष्रौं दु० त०
सिंहाय नमः स्वाहा० १ ॥ ॐ ह्रूं महिषाय नमः स्वाहा २ ॥ ॐ ह्लौं ह्लैं गौरीरुद्राभ्याम्० ३ ।देव्याः पृष्ठभागे लक्ष्मीसान्निध्ये।॥ ॐ लक्ष्मी तरं० १
हृषीकेशाभ्यां० ४ ॥ देव्याः पृष्ठभागे। ॐ ऐं विरंचये० ५ ॥ इति हुत्वा पुनः ॐ ह्रूं कं कालाय नमः १ ॥ ॐ रुं रुद्राय नमः २ ॥
ॐ सं सिंहाय नमः ३ ॥ ॐ मं मृत्यवे नमः ४ ॥ ॐ वं विजयाय नमः स्वाहा ५॥ ॐ गं गणेशाय० ६ ॥ ॐ मं महिषाय० ७ ॥
ॐ भं भैरवाय० ८ ॥ इति हुत्वा विष्णुमायादिहोमं कुर्यात् ॥ ॐ विष्णुमायायै० १॥ ॐ चेतनायै०२ ॥ ॐ बुद्ध्यै० ३॥ ॐ निद्रायै० ४॥
ॐ क्षुधायै० ५ ॥ ॐ छायायै० ६ ॥ ॐ शक्त्यै० ७॥ ॐ तृष्णायै० ८॥ ॐ क्षान्त्यै० ९ ॥ ॐ जात्यै० १० ॥ ॐ लज्जायै० ११ ॥
ॐ शांत्यै० १२ ॥ ॐ श्रद्धायै० १३ ॥ कांत्यै० १४ ॥ ॐ लक्ष्म्यै० १५ ॥ ॐ धृत्यै० १६ ॥ ॐ स्मृत्यै० १७ ॥ ॐ दयायै०
१८ ॥ ॐ तुष्ट्यै०१९ ॥ ॐ पुष्ट्यै० २० ॥ ॐ मात्रे० २१ ॥ ॐ भ्रांत्यै० २२ ॥ इति होमं कृत्वा रंगहोमं कुर्यात्। तद्यथा—
ॐ ह्रां हृ० १ ॥ ॐ ह्रीं शि० २ ॥ ॐ ह्रूं शि० ३ ॥ ॐ ह्रैं क० ४ ॥ ॐ ह्रौं ने० ५ ॥ ॐ ह्रः अ० ६ ॥ इति हुत्वा ॥ ॐ
नालाय० १ ॥ ॐ मूलाय० २ ॥ ॐ पद्माय० ३ ॥ ॐ महापद्माय० ४ ॥ ॐ आधारशक्तये० ५ ॥ कूर्माय० ६ ॥ ॐ शेषाय०
७ ॥ ॐ पृथिव्यै० ८ ॥ इति जुहुयात् । ततो मूलेन शतमेकादशाधिकमाज्याहुतीर्हुत्वा पायसतिलपलाशपुष्पसर्षपपूगीफललाजदूर्वां
कुरयवबिल्वफलरक्तचंदनगुग्गुलद्रव्याणि मितमिश्रपायसमेव वा प्रयोगोक्तद्रव्येण वा अर्गलाकीलकरहस्यैः प्रतिश्लोकं हुत्वा कृतस्य
जपस्य दशांशेन प्रतिश्लोकं सप्तशतीमंत्रेणोक्तद्रव्याणि तिलपायसं वा जुहुयात्। कवंचाहुतिनिषेधः। अध्यायसमाप्तौ महाहुतिं मंत्रेण हुत्वा ॥१३७॥

१ चंडीस्तवे प्रतिश्लोकमेकाहुतिरिष्यते ॥ रक्षाकवचगर्भं होमं तत्र न कारयेत ॥ मोहाद्यः कवचगमन्त्रः प्रतिश्लोकं जुहोति यः ॥ स्याद्देहपतनं तस्य नरकं प्रतिपद्यते ॥ अन्धकाख्यो महादैत्यो दुर्गाहोमपरायणः ॥ कवचाहुतिजात्यागान्महेशेन निपातितः ॥ इति कवचनिषेधः ॥

२ प्रत्यध्यायांते महाहुतिमन्त्रो यथा-प्रथमाध्यायांते—" नमो देव्यै महादेव्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥" सांगायै सपरि

उवाचस्थले च पत्रपुष्पफलैर्होमः। यद्वा "नमोदेव्यै०" इत्यनेन नवार्णेन वा जपदशांशहोमः। एवं होमं कृत्वा पुष्पाजलिं च दत्त्वा जयजयशब्दान्कारयेत्। ततः पुनः प्रधानहोमं कृत्वा ततोऽग्निपूजनं ग्रहपूजनं पीठे वरुणदेवतापूजनं च कृत्वा इंद्रादिदशदिक्पालेभ्यो बलिं निवेद्य मेखलोपरि अद्भिः परिषिच्यात्मनि पावकं योजयित्वा छागाद्य पशुमाषभक्तकूष्मांडानां नारिकेलस्य वा बलिं दत्त्वा पूर्णाहुतिं दद्यात्। तद्यथा–प्रक्षालितपाणिपादः आचम्य देशकालौ संकीर्त्य कृतस्य अमुकचंडीहोमस्य संपूर्णतासिद्ध्यर्थं पूर्णाहुतिहोममहं करिष्ये। इति संकल्प्य होमावशिष्टेनाज्येन स्रुचं पूरयित्वा तदग्रे पुष्पफलवस्त्रयुतं नारिकेलादिचंदनमालादियुतं निधाय तां स्रुवेणाच्छाद्य उत्थाय तयो मूलं नाभौ कृत्वा मूलमंत्रं वौषडंतं पठित्वा। ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं देव्यर्पणं भवतु ब्रह्मार्पणं भवतु स्वाहा। इति पूर्णाहुतिं दद्यात्। इति पूर्णाहुतिं हुत्वाग्निं प्रार्थयेत्। तद्यथा–" भो भो वह्ने महाशक्ते सर्वकर्मप्रसाधक। कर्मांतरेऽपि संप्राप्ते सान्निध्यं कुरु सादरम्॥" इत्यग्निं संप्रार्थ्य

रावायै सवाहनायै सायुधायै वाग्भवबीजाधिष्ठात्र्यै महाकाल्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन कपित्थफलं नागवल्लीदलद्वयसहितं कुंकुमाक्षतपुष्पैरभ्यर्चितं सघृतं होमयेत्॥ एवं द्वितीयाध्यायांते–नमो देव्यै० सांगायै सपरिवारायै सवाहनायै सायुधाय लक्ष्मीबीजाधिष्ठात्र्यै महालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन नारिकेलफलं सघृतं होमयेत्॥ एवं तृतीयाध्यायांते–नमो दे० अष्टाविंशतिवर्णात्मिकायै महालक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन सघृतमधुपुष्पाणि होमयेत्॥ एवं चतुर्थाध्यायांते। ॐ नमो दे० त्रिवर्णात्मिकायै शक्तिलक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन पूगीफलं सघृतं होमयेत्॥ ततः पंचमाध्यायांते–ॐ नमोदे० विष्णुमायादित्रयोविंशतिदेवतायै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन बीजपूरफलं सघृतं होमयेत्॥ ततः षष्ठाध्यायांते–ॐ नमो दे० शबाख्यै धूम्राक्ष्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन नारिकेलफलं सघृतं होमयेत्॥ ततः सप्तमाध्यायांते ॐ नमो दे० कर्पूरबीजाधिष्ठात्र्यै कालीचामुण्डादेव्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन कूष्मांडफलखण्डं सघृतं होमयेत्॥ ततोऽष्टमाध्यायांते –ॐ नमो दे० अष्टमातृकासहितायै रक्ताक्ष्यै देव्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेनेक्षुदंडखंडं सघृतं होमयेत॥ ततः नवमाध्यायांते–ॐ नमो दे० वाग्भवबीजाधिष्ठात्र्यै महाकाल्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन पुनः कूष्मांडखण्डमिक्षुदंडं सघृतं होमयेत्॥ ततो दशमाध्यायांते–ॐ नमो दे० सिंहवाहनायै त्रिशूलपाशधारिण्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन मातुलिंगफलं सघृतं होमयेत्॥ ततः एकादशाध्यायांते–ॐ नमो दे० सर्वनारायण्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन दाडिमफलं सघृतं होमयेत्॥ ततो द्वादशाध्यायांते–ॐ नमो दे०बालायै त्रिपुरसुन्दर्यै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन बिल्वफलं सघृतं होमयेत्॥ ततस्त्रयोदशाध्यायांते–ॐ नमो दे०श्रीत्रिपुरसुन्दर्यै श्रीविद्यायै महाहुतिं समर्पयामि नमः स्वाहा। इत्यनेन कदलीफलं सघृतं होमयेत्॥ एवमेव विधिना प्रत्यध्यायांते महाहुतिं कुर्यात्॥

विसृजेत्। इति होमं कृत्वा दक्षिणां च दत्त्वा वह्नौ पवित्रे निक्षिप्य प्रणीतांबु भुवि क्षिप्त्वा सकुशान्परिधीनग्नौ क्षिपेत्। इति होमं समाप्य होमदशांशतो दुग्धमिश्रितजलेन मूलमंत्रांते अमुकचंडीं तर्पयामि इति तर्पणं कृत्वा तर्पणदशांशेन मूलमंत्रांते सिंचामि इत्यभिषेकं कुर्य्यात्। ततो नानाविधैरन्नैर्द्विजसत्तमान्भोजयित्वा तेभ्यो दक्षिणां दत्त्वा न्यूनसंपूर्णतां वाचयेत्। इति पंचांगकृत्येन मंत्रः सिद्धो भवति। एवं सिद्धे मंत्रे मंत्री प्रयोगान्साधयेत्॥ अथ कुमारीपूजाप्रयोगः॥ पूजादिनात्पूर्वदिने गंधपुष्पाक्षतादिभिर्मूलेन भगवत्कुमारी पूजार्थं त्वं मया निमंत्रितासि मां कृतार्थयेति निमंत्रितां प्रातराहूय प्रदक्षिणीकृत्योद्वर्तनाद्यैः स्नापयित्वा गंधतैलेन शरीरं संस्कार्यकेशं परिष्कृत्य ललाटे सिंदूरं नयनयोः कज्जलं सर्वाङ्गे चंदनं दत्त्वा वस्त्रालंकारैराभूष्य पूजागृहमानीय पादौ प्रक्षाल्य अष्टदलपीठोपरि समावेश्य तांबूलेन मुखं संशोध्य देशकालौ स्मृत्वामुकसिद्ध्यर्थं श्रीदुर्गादेवीप्रीत्यर्थं कुमारीणां पूजनं करिष्ये इति संकल्प्य न्यासं कुर्यात्। ॐ क्रां कुमारिके हृदयाय नमः १॥ ॐ क्रीं कुमारिके शिरसे स्वाहा २॥ ॐ क्लूं कुमारिके शिखायै वषट् ३॥ ॐ क्रैं कुमारिके कवचाय हुम् ४॥ ॐ क्रौं कुमारिके नेत्रत्रयाय वौषट् ५॥ ॐ क्रः कुमारिके अस्त्राय फट् ६॥ इति षडंगं विन्यस्य एवमेव विधिना करांगन्यासं कुर्यात्। एवं न्यासं कृत्वा ध्यायेत्। "ॐ बालरूपां च त्रैलोक्यसुंदरीं वरवर्णिनीम्॥ नानालंकारनम्राङ्गीं

१–"सुवर्णमयुतं दद्यात्क्षैर्दशसुवर्णकम्॥ दक्षिणा तु प्रदातव्या यथा होमे तथा जपे"॥ मतांतरे। आचार्याय शतं तदर्धं तदर्धमष्टौ च गोमिथुनानि सुवर्णचतुष्टयं च दद्यात्॥ ब्राह्मणाय निष्कद्वयं गोद्वयं च ऋत्विग्भ्यः प्रत्येकं निष्कत्रयं गोमिथुनं च दद्यात्। इदं सहस्रचंड्यां तदर्धं शतचंड्यां तदर्धं नवचंड्यां अशक्तौ सर्वेभ्यः सुवर्णमाचार्याय द्विगुणं दद्यात्॥

२—विशुद्धेश्वरतन्त्रे यथा—"तर्पणं चन्दनं तोयैस्तीर्थतोयैरथो पुनः॥ गुरूपदिष्टमार्गेण मधुना वाथ तर्पयेत्"॥ तन्त्रान्तरेऽपि–"तीर्थतोयेन दुग्धेन सर्पिषा मधुनापि च॥ गन्धोदकेन वा कुर्यात्सर्वत्र साधकोत्तमः॥ उच्चार्य नाम मूलांते तर्पयामि ततः परम्॥ स्वाहांतं तर्पयेन्मन्त्री यथासंख्यविधानतः॥ तर्पणं च प्रकुर्वीत द्वितीयांतमथोच्चरन्॥"

३–मूलविद्यां समुच्चार्य तदन्ते देवताभिधाम्॥ तदन्ते चाभिषिंचामि नमोऽस्ते चाभिषेचनम्॥ इत्युच्चार्य मूर्ध्नि देशे चिंतयित्वा स्वमन्त्रकम्॥ अधिकां स्वीयसंख्यां तु विधाय तदनंतरम्॥ तत्र संचिंतयेद्देवीं सांगावरणदेवताम्॥ क्षिपेत्तोयं यथासंख्यं गणान् सिंचेत्सकृत्सकृत्॥

४–"अभिषेकं समाप्यैवमभिषेकदशांशतः॥ ब्राह्मणान्देवताबुद्ध्या भोजयेत्साधकोत्तमः॥" तन्त्रांतरेऽपि—सहस्रचंड्यां सहस्रं लक्षचंड्यां लक्षं कोटिचंड्यां कोटिं तथैव शतचंड्यां शतं नवचंड्यां नव ब्राह्मणान् भोजयेदेवं सुवासिनीकुमारीभोजनं च कारयेत्॥ तन्त्रांतरेऽपि–विभवे सति यो मोहान्न कुर्याद्विधिविस्तरम्॥ न तत्फलमवाप्नोति देवद्रोही स उच्यते॥

भद्रविद्याप्रकाशिनीम् ॥ १ ॥ चारुहास्यां महानंदहृदयां शुभदां शुभाम् ॥ शंखकुंदेन्दुधवलां द्विभुजां वरदाभयाम् ॥ २ ॥" एवं त्वात्मशिरसि पुष्पं दत्त्वावाहयेत् । "मंत्राक्षरमयीं लक्ष्मीं मातॄणां रूपधारिणीम् ॥ नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥ १ ॥" इत्यावाह्य ॐ ह्रीं कुलकुमारिकायै नमः इदं पाद्यम् एवमिदमर्घ्यमिदमाचमनीयमिदमनुलेपनमेतेऽक्षताः एतानि पुष्पाणि एष धूपः एष दीपः इदं नैवेद्यमिदं तांबूलमिति पूजयित्वा उपर्युक्तषडंगन्यासमंत्रेण षडंगं पूजयेत् । ततः ॐ ह्रीं हंसः कुलकुमारिके पुष्पांजलिं समर्पयामि । इति पुष्पांजलित्रयं दत्त्वा नवनामभिः पूजयेत् । तद्यथा—ॐ ह्रीं कौमार्य्यै नमः ॥ १ ॥ ॐ ह्रीं त्रिपुरायै नमः ॥ २ ॥ ॐ ह्रीं कल्याण्यै नमः ॥ ३ ॥ ॐ ह्रीं रोहिण्यै नमः ॥ ४ ॥ ॐ ह्रीं कामिन्यै नमः ॥५॥ ॐ ह्रीं चंडिकायै नमः ॥६॥ ॐ ह्रीं शांकर्यै नमः ॥७॥ ॐ ह्रीं दुर्गायै नमः ८ । ॐ ह्रीं सुभद्रायै नमः ९ । इति नामभिः संपूज्य मूलेन पुष्पांजलित्रयं दत्त्वा प्रदक्षिणीकृत्य प्रणमेत् ॥ तत्र मन्त्रः ॥ "ॐ जगत्पूज्ये जगद्वंद्ये सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥ १ ॥ त्रिपुरां त्रिगुणां धात्रीं ज्ञानमार्गस्वरूपिणीम् ॥ त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहम् ॥ २ ॥ कालात्मिकां कालभीतां कारुण्यहृदयां शिवाम् ॥ कारुण्यजननीं नित्यां कल्याणीं पजयाम्यहम् ॥ ३ ॥ अणिमादिगुणोपेतामकारादिस्वरात्मिकाम् ॥ शक्तिभेदात्मिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् ॥ ४ ॥ कलाधारां कलारूपां कालचण्डस्वरूपिणीम् ॥ कामदां करुणाधारां कामिनीं पूजयाम्यहम् ॥ ५ ॥ चण्डधारां चण्डमायां चण्डमुंडविनाशिनीम् ॥ प्रणमामि च देवेशीं चंडिकां पूजयाम्यहम् ॥ ६ ॥ सुखानन्दकरीं शांतां सर्वदेवनमस्कृताम् ॥ सव भूतात्मिकां देवीं शांकरीं पूजयाम्यहम् ॥ ७ ॥ दुर्गमे दुस्तरे चैव दुःखत्रयविनाशिनीम् ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गे नमाम्यहम् ॥ ८ ॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥ सुभद्रजननीं देवीं सुभद्रां प्रणमाम्यहम् ॥ ९ ॥" इति प्रणम्य तदंगे श्रीदुर्गामावाह्य षोडशनामभिः पूजयेत् । तद्यथा—ॐ ह्रीं उमायै नमः १॥ ॐ ह्रीं शूलधारिण्यै नमः २॥ ॐ ह्रीं खेचर्यै नमः३।ॐ ह्रीं

---

१ वाग्भवेन वपुःक्षोभं मायाबीजे गुणाष्टकम् ॥ श्रियोबीजे श्रियो लाभो मायाबीजे रिपुक्षयः ॥ भैरवेण तु बीजेन खे चरेद्वै सुरादिभिः ॥

चत्वरवासिन्यै नमः ४ ॥ ॐ ह्रीं सुगंधनासिकायै नमः ५ ॥ ॐ ह्रीं सर्वधारिण्यै नमः ६ ॥ ॐ ह्रीं चंडिकायै नमः ७ ॥ ॐ ह्रीं सौभद्रिकायै नमः ८ ॥ ॐ ह्रीं अशोकवासिन्यै नमः ९ ॥ ॐ ह्रीं वज्रधारिण्यै नमः १० ॥ ॐ ह्रीं ललितायै नमः ११ ॥ ॐ ह्रीं सिंहवाहिन्यै नमः १२ ॥ ॐ ह्रीं भगवत्यै नमः १३ ॥ ॐ ह्रीं विंध्यवासिन्यै नमः १४ ॥ ॐ ह्रीं महाबलायै नमः १५ ॥ ॐ ह्रीं भूतलवासिन्यै नमः १६ ॥ इति संपूज्य साष्टांगं प्रणमेत् । इति कुमारीपूजनम् ॥ अथ छागादिबलिदानप्रयोगः ॥ अर्धरात्रे पंचाब्दं सर्वलक्षणोपेतं छागादिपशुमानीय । "ॐ वाराही यमुना गंगा करतोया सरस्वती ॥ कावेरी चंद्रभागा च सिन्धुभैरवसागराः ॥ १ ॥ अजस्नाने महेशानि सान्निध्यमिह कल्पय ॥ पशुपाशविनाशाय हेमकूटस्थिताय च ॥ २ ॥ पराय परमेष्ठिने हुंकाराय च मूर्तये ॥ " इति पठित्वा मूलेन स्नापयित्वा सिंदूरमाल्यादिनालंकृत्य देव्यग्रे निधाय गंधमिश्रिताघ्योदकेन मूलेन त्रिः संप्रोक्ष्य कृतांजलिः प्रार्थयेत् । "छाग त्वं बलिरूपेण महाभाग्यादुपस्थितः ॥ प्रणमामि सदा भक्त्या रूपिणं बलिरूपिणम् ॥ १ ॥ चंडिकाप्रीतिकामस्य दातुरापद्विनाशिने ॥ चंडिकाबलिरूपाय बले तुभ्यं नमो नमः ॥ २ ॥ यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयंभुवा ॥ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥ ३ ॥ " इति संप्रार्थ्य पार्श्वपूजां कुर्यात् । तद्यथा—पार्श्वे ॐ जयंत्यै नमः १ ॥ ॐ मंगलायै नमः २ ॥ ॐ काल्यै नमः ३ ॥ ॐ भद्रकाल्यै नमः ४ ॥ ॐ मानस्तोकायै नमः ५ ॥ ॐ विजयायै नमः ६ ॥ ॐ अपराजितायै नमः ७ । मध्ये—ॐ अनंतायै नमः ८ । इति संपूज्य प्रत्यंगं पूजयेत् । तद्यथा—ॐ रुधिरवदनायै नमः इति शिरसि १ ॥ ॐ चंडिकायै नमः इति कपोले २ ॥ ॐ चंद्रार्काभ्यां नमः इति चक्षुषोः ३ ॥ ॐ बृहस्पतये नमः इति कर्णयोः ४ ॥ ॐ सरस्वत्यै नमः इति नासायाम् ५ ॥ ॐ उग्रदंतिकायै नमः इति जिह्वायाम् ६ ॥ ॐ महादंतिकायै नमः इति ग्रीवायाम् ७ ॥ ॐ पृथिव्यै नमः इति उदरे ८ ॥ ॐ धर्माय नमः इति जंघाचतुष्टये ९ ॥ इति संपूज्य जलं गृहीत्वा "ह्रीं श्रीं वरुणमंडलाधिष्ठितविग्रहायै पशुरूप चंडिकायै इमं पशुं प्रोक्षामि स्वाहा" इति पशुं संप्रोक्ष्य ततस्तिलकुशजलान्यादाय देशकालौ संकीर्त्य अमुकगोत्रः श्री—अमुक शर्माहं

छागसमसंख्याकपंचवर्षावच्छिन्नश्रीमद्दुर्गादेव्याःप्रीतिकामोऽहमेताञ्छागान्वह्निदैवतान्भगवति श्रीदुर्गे देवि तुभ्यं घातयिष्ये। इति संकल्प्य खड्गपूजां कुर्यात् । तद्यथा—खड्गं पुरतो निधाय" ॐ कृष्णं पिनाकपाणिं च कालरात्रिस्वरूपिणम्॥उग्रं रक्तास्यनयनं रक्तमाल्यानुलेपनम् ॥ १ ॥ रक्तांबरधरं चैव पाशहस्तं कुटुंबिनम्॥ पीयमानं च रुधिरं भुंजानं क्रव्यसंहतिम्॥ रसना त्वं चंडिकायाः सुरलोकप्रसाधिका ।" इति खड्गं ध्यात्वा । ॐ ह्रीं ह्रीं खड्ग आँ कालिकालि वज्रेश्वरीलोहदंडाय नमः इति गंधादिभिस्त्रिः संपूज्य खड्गोपरि सिंदूरादिना ह्रीं कारं विलिख्य। ॐ खड्गाय नमः इति संपूज्य बलिकर्णे पशुगायत्रीं श्रावयेत् । तत्र मंत्रः। ॐ ह्रीं "बलिरूपाय विद्महे देवीप्रियाय धीमहि। तन्नः पशुः प्रचोदयात्" इति बलिकर्णे श्रावयित्वा खड्गं हस्तेनादाय प्रार्थयेत् । तद्यथा—"ॐ असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः॥ श्रीगर्भो विजयश्चैव धर्मपाल नमोऽस्तु ते॥ १ ॥ इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा॥नक्षत्रं कृत्तिका ते तु गुरुर्देवो महेश्वरः॥ २ ॥ रोहिण्यश्च शरीरं ते धाता देवो जनार्दनः॥ पिता पितामहो देवस्त्वं मां पालय सर्वदा ॥ ३ नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रः कृशोदरः॥ भावशुद्धो मर्षणश्च अतितेजास्तथैव च ॥ ४ ॥इयं येन धृता क्षोणी हतश्च महिषासुरः॥ तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः ॥ ५ ॥ चंडिकारसनासि त्वमेकघातेन घातय ॥ ६ ॥" इति खड्गं संप्रार्थ्य "हे वज्रासुरनाशाय देवकार्यार्थतत्पर ॥ पशुं छिन्धि स्वयं शीघ्रं खड्गनाथ नमोऽस्तु ते ॥ १॥ यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनम्॥ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोऽवधः ॥२॥" इति पठित्वा पशुपाशाय विद्महे विप्रकर्णाय धीमहि। तन्नश्छागः प्रचोदयात्। मूलं पठित्वा श्रीदुर्गे देवि इमं छागबलिं तुभ्यमहं प्रददे इति बलिस्कंधे खड्गं दत्त्वा सकलं रुधिरं मुंडं च देव्यग्रे कृत्वा समभागेन संपूर्णं परमं कविर्दापयेन्मांससमीपजं दीपम् ॥ क्रौं क्रौं नमो नमः अनेन प्रतिमुण्डं दद्यात्ततस्तर्पयेदेभिः । ॐ चामुंडां तर्पयामि नमः इति पूर्वे १ ॥ ॐ योगिनीं तर्पयामि नमः इति दक्षिणे २ ॥ ॐ डाकिनीं तर्पयामि नमः इति पश्चिमे ३ ॥ ॐ भैरवीं तर्पयामि नमः इति उत्तरे ४ ॥ ॐ विदारिकां तर्पयामि नमः इति आग्नेय्याम् ५॥ॐ पापराक्षसीं तर्पयामि नमः इति नैर्ऋत्ये ६ ॥ ॐ पूतनां तर्पयामि नमः इति वायव्ये७॥ ॐ कालिकां तर्पयामि नमः इत्यैशान्याम्८ ॥इति

मांसन संतर्प्य ॐ अद्य पंचवर्षावच्छिन्नश्रीदुर्गादेव्याः प्रीतिकाम इदं छागरुधिरं समुण्डं विष्णुदैवतं भगवति श्रीदुर्गे देवि तुभ्यमहं प्रददे इति देवीं समर्प्य ततः शेषेण "ॐ बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा॥मरुतो येऽश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ १ ॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः॥ डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः॥२॥जृंभिकाः सिद्धगंधर्वा मल्ला विद्याधरा नगाः॥दिक्पाला लोकपालाश्च ये च विघ्नविनाशकाः॥३॥जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ।मा विघ्नो मा च मे पापं मा संतु परिपंथिनः॥४॥सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः॥५॥"इति विनिवेद्य स्नात्वा तिलकं धृत्वा खड्गिनी शूलिनीत्येकेन स्तुत्वा नमस्कृत्य पुष्पांजलिं दत्त्वा " रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥" इति प्रार्थयेत् । इति पशुबलिः ॥ इति श्रीदुर्गापद्धतिः समाप्ता ॥ अद्येत्यादिपूर्वो० श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थं चण्डीसप्तशतीपाठाख्यं कर्म करिष्ये ॥ तद ङ्गत्वेनादौ कवचार्गलाकीलकपठनमाद्यन्तयोरष्टोत्तरशतसंख्यनवार्णजपपूर्वकं क्रमेण रात्रिसूक्तदेवीसूक्तपठनमंते रहस्यत्रयपठनं च करिष्ये ॥ इति संकल्प्य ॥ प्रथमं नमो देव्यै महादेव्यै शिवायै सततं नमः॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥ इति मंत्रेण पंचोपचारैः पुस्तकपूजां कुर्यात् ॥ ॥ श्रीगणेशाय नमः ॥ ॐ नम श्चण्डिकायै ॥ मार्कण्डेय उवाच ॥ ॥ ॐ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ॥ यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥ १ ॥ ब्रह्मोवाच ॥ ॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम्॥ देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥ २ ॥ प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ॥ तृतीयं चन्द्रघण्टेति कूष्माण्डेति चतुर्थकम् ॥३॥ पंचमं स्कन्दमातेति षष्ठं कात्यायनीति च ॥ सप्तमं कालरात्रीति महागौरीति चाष्टमम् ॥ ४ ॥ नवमं सिद्धिदात्री च नवदुर्गाः प्रकीर्तिताः ॥ उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥ ५ ॥ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ॥ विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥ ६ ॥ न तेषां जायते किंचिदशुभं रणसंकटे ॥ नापदं तस्य पश्यामि शोकदुःखभयं नहि ॥ ७ ॥ यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ॥ ये त्वां स्मरंति देवेशि रक्षसे तान्न संशयः ॥ ८ ॥ प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥ ऐन्द्री गजसमारूढा वैष्णवी

गरुडासना ॥ ९ ॥ माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥ लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥ १० ॥ श्वेतरूपधरा देवी ईश्वरी वृषवाहना ॥ ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ॥११॥ इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ॥ नानाभरणशोभाढ्या नाना रत्नोपशोभिताः ॥ १२ ॥ दृश्यन्ते रथमारूढा देव्यः क्रोधसमाकुलाः ॥ शंखं चक्रं गदां शक्तिं हलं च मुसलायुधम् ॥ खेटकं तोमरं चैव परशुं पाशमेव च ॥ १३ ॥ कुन्तायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमम् ॥ दैत्यानां देहनाशाय भक्तानामभयाय च ॥ १४॥ धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥ नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे ॥ ॥१५ ॥ महाबले महोत्साहे महाभयविनाशिनि ॥ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि ॥ १६ ॥ प्राच्यां रक्षतु मामैन्द्री आग्नेय्यां भयवर्द्धिनी ॥ दक्षिणेऽवतु वाराही नैर्ऋत्यां खड्ग धारिणी ॥ १७॥ प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी ॥ उदीच्यां पातु कौमारी ईशान्यां शूलधारिणी ॥ १८ ॥ ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद्वैष्णवी तथा ॥ एवं दश दिशो रक्षेच्चामुण्डा शववाहना ॥१९॥ जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥ अजिता वामपार्श्वे च दक्षिणे चापराजिता ॥२० ॥ शिखामुद्द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥ मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी॥२१॥ त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥ शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ॥ २२ ॥ कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ॥ नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ॥ २३ ॥ अधरे चामृतकला जिह्वायां च सरस्वती ॥ दन्तान्रक्षतु कौमारी कण्ठदेशे तु चण्डिका ॥ २४ ॥ घण्टिकां चित्रघण्टा च महामाया च तालुके ॥ कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमंगला ॥ २५ ॥ ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥ नीलग्रीवा बहिः कण्ठे नलिकां नलकूबरी ॥ २६ ॥ स्कन्धयोः खड्गिनी रक्षेद्बाहू मे वज्रधारिणी ॥ हस्तयोर्दण्डिनी रक्षेदम्बिका चांगुलीषु च ॥ २७ ॥ नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥ स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी ॥ २८ ॥ हृदये ललिता देवी उदरे शूलधारिणी ॥ नाभौ च कामिनी रक्षेद्गुह्यं गुह्येश्वरी तथा ॥ २९ ॥ पूतना कामिका मेढ्रं गुदे महिषवाहिनी ॥ कट्यां भगवती रक्षेज्जानुनी विन्ध्यवासिनी ॥३०॥ जंघे महाबला रक्षेत्सर्वकामप्रदायिनी ॥ गुल्फ

योर्नारसिंही च पादपृष्ठे तु तैजसी ॥ ३१ ॥ पादांगुलीषु श्रीरक्षेत्पादाधस्तलवासिनी ॥ नखान्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ॥ ३२ ॥ रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा ॥ रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ॥ ३३ ॥ अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ पद्मावती पद्मकोशे कफे चूडामणिस्तथा ॥ ३४ ॥ ज्वालामुखी नखाजालमभेद्या सर्वसंधिषु ॥ शुक्रं ब्रह्माणी मे रक्षेच्छायां छत्रेश्वरी तथा ॥ ३५ ॥ अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥ प्राणापानौ तथा व्यानमुदानं च समानकम् ॥ ३६ ॥ वज्रहस्ता च मे रक्षेत्प्राणकल्पं च शोभना ॥ रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ॥३७॥ सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥ आयूरक्षतु वाराही धर्मं रक्षतु वैष्णवी॥३८॥यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥गोत्रमिन्द्राणी मे रक्षेत्पशून्मे रक्ष चण्डिके॥३९॥पुत्रान्रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥ पन्थानं सुपथा रक्षेन्मार्गं क्षेमकरी तथा ॥ ४० ॥ राजद्वारे महालक्ष्मीर्विजया सर्वतः स्थिता ॥ रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु॥४१॥ तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥ पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः॥४२॥ कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ॥ तत्र तत्रार्थलाभश्च विजयः सार्वकामिकः॥४३॥ यं यं चिन्तयते कामं तं तं प्राप्नोति निश्चितम्॥ परमैश्वर्यमतुलं प्राप्स्यते भूतले पुमान् ॥ ४४ ॥ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ॥ त्रैलोक्ये तु भवेत्पूज्यः कवचेनावृतः पुमान् ॥४५॥ इदं तु देव्याः कवचं देवानामपि दुर्लभम् ॥ यः पठेत्प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः॥४६॥ दैवी कला भवेत्तस्य त्रैलोक्येष्वपराजितः ॥ जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ॥४७॥ नश्यन्ति व्याधयः सर्वेलूता विस्फोटकादयः॥ स्थावरं जंगमं चैव कृत्रिमं चापि यद्विषम् ॥४७॥ अभिचाराणि सर्वाणि मंत्रयंत्राणि भूतले ॥ भूचराः खेचराश्चैव जलजाश्चोपदेशिकाः ॥४९॥ सहजा कुलजा माला डाकिनी शाकिनी तथा ॥ अन्तरिक्षचरा घोरा डाकिन्यश्च महाबलाः ॥ ५०॥ ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ॥ ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवादयः ॥ ५१ ॥ नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ॥ मानोन्नतिर्भवेद्राज्ञस्तेजोवृद्धिकरं परम् ॥५२॥ यशसा वर्धते सोऽपि कीर्तिमण्डितभूतले ॥ जपेत्सप्तशतीं चण्डीं कृत्वा तु कवचं पुरा ॥५३॥ यावद्भूमंडलं धत्ते सशैलवनकाननम्॥ तावत्तिष्ठति मेदिन्यां

सन्ततिः पुत्रपौत्रिकी ॥५४॥ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम् ॥ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥ ५५ ॥ लभते परमं रूपं शिवेन सह मोदते ॥ ५६ ॥ इति श्रीवाराहपुराणे हरिहरब्रह्मविरचितं देव्याः कवचं समाप्तम्॥श्रीजगदंबार्पणमस्तु॥ॐनमश्चंडिकायै॥ जयन्ती मङ्गला काली भद्रकाली कपालिनी॥दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तुते॥१॥जय त्वं देवि चामुंडे जय भूतार्तिहारिणि॥ जय सर्वगते देवि कालरात्रि नमोऽस्तु ते॥२॥मधुकैटभविद्राविविधातृवरदे नमः॥रूपं देहि जयं देहि यशो देहि द्विषो जहि॥३॥महिषासुर निर्णाशि भक्तानां सुखदे नमः॥रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥४॥ रक्तबीजवधे देवि चंडमुंडविनाशिनि॥रूपं देहि जयं देवि यशो देहि द्विषो जहि॥५॥शुम्भस्यैव निशुम्भस्य धूम्राक्षस्य च मर्दिनि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि॥६॥वन्दितांघ्रियुगे देवि सर्व सौभाग्यदायिनि॥रूपं देहि जयं देहि यशो देहि द्विषो जहि॥७॥अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि॥रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ ८॥ नतेभ्यः सर्वदा भक्त्या चंडिके दुरितापहे॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥९॥ स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि॥रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१०॥चण्डिके सततं ये त्वामर्चयंतीह भक्तितः॥रूपं देहि जयं देहि यशो देहि द्विषो जहि॥११॥देहि सौभाग्यमारोग्यं देहि मे परमं सुखम्॥रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१२॥विधेहि द्विषतां नाशं विधेहि बल मुच्चकैः॥रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१३॥विधेहि देवि कल्याणं विधेहि परमां श्रियम्॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि॥१४॥सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके॥रूपं देहि जयं देहि यशो देहि द्विषो जहि॥ १५ ॥ विद्यावन्तं यशस्वन्तं लक्ष्मीवंतं जनं कुरु॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥१६॥ प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १७ ॥ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १८ ॥ कृष्णेन संस्तुते देवि शश्वद्भ क्त्या सदाऽम्बिके ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ १९॥ हिमाचलसुतानाथसंस्तुते परमेश्वरि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २० ॥ इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ॥ रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥ २१ ॥ देवि

प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि॥रूपं देहि जयं देहि यशो देहि द्विषो जहि ॥२२ ॥ देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ॥ रूपं देहि
जयं देहि यशो देहि द्विषो जहि॥२३॥ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ॥तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥२४॥ इदं
स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ॥ स तु सप्तशतीसंख्यावरमाप्नोतिसम्पदाम् ॥ २५ ॥ इति श्रीमार्कण्डेयपुराणे अर्गलास्तोत्रं समा
प्तम् ॥ २ ॥ ॐ नमश्चंडिकायै ॥ मार्कण्डेय उवाच ॥ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ॥ श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे
॥ १ ॥ सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकम् ॥ सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥२॥सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकला
न्यपि ॥ एतेन स्तुवतां देवीं स्तोत्रमात्रेण सिध्यति॥३॥ न मन्त्रं नौषधं तत्र न किञ्चिदपि विद्यते॥विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादि
कम्॥४॥समग्राण्यपि सिद्ध्यंति लोकशंकामिमां हरः॥कृत्वा नियंत्रयामास सर्वमेवमिदं शुभम् ॥ ५ ॥ स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं
चकार सः॥समाप्नोति सुपुण्येन तां यथावन्नियन्त्रणाम् ॥६॥ सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः॥कृष्णायां वा चतुर्दश्यामष्टम्यां वा
समाहितः ॥७॥ ददाति प्रतिगृह्णाति नान्यथैषा प्रसिद्ध्यति॥इत्थं रूपेण कीलेन महादेवेन कीलितम् ॥ ८॥यो निष्कीलां विधायैनां नित्यं
जपति संस्फुटम्॥स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः॥९॥न चैवाप्यटतस्तस्य भयं क्वापि हि जायते॥ नापमृत्युवशं याति मृतो
मोक्षमवाप्नुयात् ॥१० ॥ ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति॥ ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः॥ ११ ॥ सौभाग्यादि
च यत्किञ्चिद्दृश्यते ललनाजने ॥ तत्सर्वं त्वत्प्रसादेन तेन जाप्यमिदं शुभम् ॥ १२ ॥ शनैस्तु जाप्यमानेऽस्मिन्स्तोत्रे सम्पत्तिरुच्चकैः ॥
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥१३॥ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः॥शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः
॥ १४ ॥ ॥ इति श्रीभगवत्याः कीलकस्तोत्रं समाप्तम् ॥ ३ ॥श्रीगणपतिर्जयति ॥ ॐ अस्य श्रीनवार्णमंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ॥
गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ ऐं बीजम् ॥ ह्रीं शक्तिः ॥ क्लीं कीलकम् ॥ श्रीमहाकाली
महालक्ष्मीमहासरस्वतीप्रीत्यर्थं जपे विनियोगः॥ ॥ ब्रह्मविष्णुरुद्रऋषिभ्यो नमः शिरसि । गायत्र्युष्णिगनुष्टुप्छंदोभ्यो नमः मुखे ॥

महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः हृदि ॥ ऐं बीजाय नमः गुह्ये ॥ ह्रीं शक्तये नमः पादयोः॥ क्लीं कीलकाय नमः नाभौ ॥ इति मूलेन करौ संशोध्य ॥ ॐ ऐं अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जनीभ्यां नमः ॐ क्लीं मध्यमाभ्यां नमः ॥ ॐ चामुण्डायै अनामिकाभ्यां नमः ॥ ॐ विच्चे कनिष्ठिकाभ्यां नमः ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादि ॥ ततोऽक्षरन्यासः ॥ ॐ ऐं नमः शिखायाम् ॥ ॐ ह्रीं नमः दक्षिणनेत्रे ॥ ॐ क्लीं नमः वामनेत्रे ॥ ॐ चां नमः दक्षिणकर्णे ॥ ॐ मुं नमः वामकर्णे ॥ ॐ डां नमः दक्षिणनासायाम् ॥ ॐ यैं नमः वामनासायाम् ॥ ॐ विं नमः मुखे ॥ ॐ च्चें नमः गुह्ये ॥ एवं विन्यस्याष्टवारं मूलेन व्यापकं कुर्यात्॥ ॐ ऐं प्राच्यै नमः ॥ ॐ ऐं आग्नेय्यै नमः ॥ ॐ ह्रीं दक्षिणायै नमः ॥ ॐ ह्रीं नैर्ऋत्यै नमः॥ ॐ क्लीं प्रतीच्यै नमः॥ ॐ क्लीं वायव्यै नमः ॥ ॐ चामुण्डायै उदीच्यै नमः ॥ ॐ विच्चे ऐशान्यै नमः ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे ऊर्ध्वायै नमः ॥ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे भूम्यै नमः ॥ ॥ अथ ध्यानम् ॥ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीं शिरः शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ॥ नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभम् ॥ १ ॥ अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुंडिकां दण्डं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनम् ॥ शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ २ ॥ घंटाशूलहलानि शंखमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजेच्छुंभादिदैत्यार्दिनीम् ॥ ३ ॥ अष्टोत्तरशतसंख्यया मन्त्रराजं जपेत् ॥ इति नवार्णविधिः ॥ ॥ अथ रात्रिसूक्तम् ॥ ॥ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुम् ॥ १ ॥ ब्रह्मोवाच ॥ त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ॥ सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥ २ ॥ अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ॥ त्वमेव संध्या सावित्री त्वं देवि जननी परा ॥ ३ ॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ॥ ४ ॥ विसृष्टौ सृष्टिरूपा त्वं

स्थितिरूपा च पालने ॥ तथा संहृतिरूपांते जगतोऽस्य जगन्मये ॥ ५ ॥ महाविद्या महामाया महामेधा महास्मृतिः ॥ महामोहा च भवती महादेवी महासुरी ॥ ६ ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ ७ ॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ॥ ८ ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणा भशुंडीपरिघायुधा ॥ ९ ॥ सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ परापराणां परमा त्वमेव परमेश्वरी ॥ १० ॥ यच्च किंचित्कचिद्वस्तु सदसद्वाऽखिलात्मिके ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥११ ॥ यया त्वया जगत्स्रष्टा जगत्पात्यात्ति यो जगत् ॥ सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ १२ ॥ विष्णुः शरीरग्रहण महमीशान एव च ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥ १३ ॥ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ १४ ॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ ॥ १५ ॥ इति रात्रिसूक्तं समाप्तम् ॥ ॐ श्रीगणेशाय नमः ॥ ॥ अथ सप्तशतीन्यासाः ॥ अथ प्रथममध्यमोत्तमचरित्राणां ब्रह्म विष्णुरुद्रा ऋषयः ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ गायत्र्युष्णिगनुष्टुभश्छंदांसि ॥ नंदाशाकंभरीभीमाः शक्तयः ॥ रक्तदंतिकादुर्गाभ्रामर्यो बीजानि ॥ अग्निर्वायुसूर्यास्तत्त्वानि ॥ ऋग्यजुःसामवेदा ध्यानानि ॥ सकलकामनासिद्धये श्रीमहाकालीमहा लक्ष्मीमहासरस्वतीदेवताप्रीत्यर्थं जपे विनियोगः॥ तत्रादौ न्यासाः ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ शंखिनी चापिनी बाणा भुशुंडी परिघायुधा ॥ अंगुष्ठाभ्यां नमः॥ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके॥ घंटास्वनेन नः पाहि चापज्यानिस्वनेन च॥ तर्जनीभ्यां नमः ॥ प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे॥ भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि॥ मध्यमाभ्यां नमः॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते॥ यानि चात्यर्थघोराणि तैरक्षास्मांस्तथा भुवम्॥ अनामिकाभ्यां नमः॥ खड्गशूलगदादीनि यानि चास्त्राणि तेंऽबिके ॥ कर पल्लवसंगीनि तैरस्मान्रक्ष सर्वतः॥ कनिष्ठिकाभ्यां नमः॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते॥ भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥

करतलकरपृष्ठाभ्यां नमः॥एवं हृदयादि॥खड्गिनी शूलिनी घोरा०हृदयाय नमः॥शूलेन पाहि नो देवि० शिरसे स्वाहा ॥ प्राच्यां रक्ष प्रती
च्यां० शिखायै वषट् ॥ सौम्यानि यानि रूपाणि० कवचाय हुम् ॥ खड्गशूलगदादीनि० नेत्रत्रयाय वौषट् ॥ सर्वस्वरूपे सर्वेशे० अस्त्राय
फट् ॥ अथ ध्यानम् ॥ विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्र
दरालिखेटविशिखांश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ १ ॥ इति ध्यानम् ॥ प्रथमचरित्रस्य ब्रह्मा
ऋषिः ॥ महाकाली देवता ॥ गायत्री छंदः ॥ नंदा शक्तिः ॥रक्तदंतिका बीजम्॥अग्निस्तत्त्वम् ॥ ऋग्वेदः स्वरूपम् ॥ श्रीमहाकाली
प्रीत्यर्थं प्रथमचरित्रजपे विनियोगः ॥ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुंडीं शिरः शंखं संदधतीं करैस्त्रिनयनां सर्वांगभूषावृताम् ॥नीला
श्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौत्स्वपिते हरौ कमलजो हंतुं मधुं कैटभम् ॥ मार्कण्डेय उवाच॥१॥सावर्णिः सूर्यतनयो
यो मनुः कथ्यतेऽष्टमः॥ निशामय तदुत्पत्तिं विस्तराद्गदतो मम ॥२॥महामायानुभावेन यथा मन्वंतराधिपः ॥स बभूव महाभागः सावर्णि
स्तनयो रवेः ॥ ३ ॥ स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ॥ सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले॥४॥ तस्य पालयतः सम्यक्प्रजाः
पुत्रानिवौरसान् ॥ बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा॥५॥तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः ॥ न्यूनैरपि स तैर्युद्धे कोलाविध्वंसि
भिर्जितः ॥६॥ ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ॥ आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥७ ॥अमात्यैर्बलिभिर्दुष्टैर्दुर्बल
स्य दुरात्मभिः ॥ कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ॥ ८ ॥ ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः ॥ एकाकी हयमारुह्य
जगाम गहनं वनम् ॥९ ॥ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः ॥ प्रशांतश्वापदाकीर्णं मुनिशिष्योपशोभितम् ॥१०॥ तस्थौ कंचित्स
कालं च मुनिना तेन सत्कृतः ॥ इतश्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे ॥ ११ ॥ सोऽचिंतयत्तदा तत्र ममत्वाकृष्टचेतनः ॥ मत्पूर्वैः पालितं
पूर्वं मया हीनं पुरं हि तत् ॥१२ ॥ मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥ न जाने स प्रधानो मे शूरहस्ती सदामदः ॥ १३ ॥ मम
वैरिवशं यातः कान्भोगानुपलप्स्यते ॥ ये ममानुगता नित्यं प्रसादधनभोजनैः ॥१४ ॥ अनुवृत्तिं ध्रुवं तेऽद्य कुर्वंत्यन्यमहीभृताम् ॥ अस

स्यपव्ययशीलैस्तैः कुर्वाद्भिः सततं व्ययम् ॥१५॥ संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ॥ एतच्चान्यच्च सततं चिंतयामास पार्थिवः ॥ १६ ॥ तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ॥ स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः॥१७॥सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥ इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ॥१८॥ प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम्॥१९॥ वैश्य उवाच ॥२०॥ समाधिर्नामवैश्योऽहमुत्पन्नो धनिनां कुले ॥ २१ ॥ पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥ विहीनश्च धनैर्दारैः पुत्रैरादाय मे धनम् ॥२२॥ वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः॥सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम्॥२३॥प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः॥ किं नु तेषां गृहे क्षेममक्षेमं किं नु सांप्रतम् ॥२४॥ कथं ते किं नु सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥२५॥ राजोवाच ॥ २६ ॥ यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ॥ २७ ॥ तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥२८॥ वैश्य उवाच ॥२९॥ एवमेतद्यथा प्राह भवान स्मद्गतं वचः ॥ ३० ॥ किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥ यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ॥३१॥ पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ॥ किमेतन्नाभिजानामि जानन्नपि महामते ॥३२॥ यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु ॥ तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ॥ ३३ ॥ करोमि किं यन्नमनस्तेष्वप्रीतिषु निष्ठुरम् ॥ ३४ ॥ मार्कंडेय उवाच ॥ ३५ ॥ ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ॥ ३६ ॥ समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ॥कृत्वा तु तौ यथान्यायं यथार्हं तेन संविदम् ॥ ३७ ॥ उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥ ३८ ॥ राजोवाच ॥ ३९ ॥ भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ॥ ४० ॥ दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥ ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्वपि ॥४१॥ जानतोऽपि यथाऽज्ञस्य किमेतन्मुनिसत्तम॥ अयं च निकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ॥४२॥ स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति॥एवमेष तथाऽहं च द्वावप्यत्यंतदुःखितौ ॥४३॥ दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥ तत्किमेतन्महाभाग यन्मोहो ज्ञानिनोरपि ॥ ४४ ॥ ममास्य च भवत्येषा विवेकांधस्य मूढता ॥ ४५ ॥ ऋषिरुवाच ॥ ४६ ॥ ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे ॥ ४७ ॥ विषयश्च महाभाग याति चैवं पृथक्पृथक् ॥

दिवांधाः प्राणिनः केचिद्रात्रावंधास्तथापरे ॥ ४८ ॥ केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥ ज्ञानिनो मनुजाः सत्यं किं नु ते
नहि केवलम् ॥ ४९ ॥ यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥ ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ॥ ५० ॥ मनुष्याणां
च यत्तेषां तुल्यमन्यत्तथोभयोः ॥ ज्ञानेऽपि सति पश्यैतान्पतङ्गाञ्छावचंचुषु ॥ ५१ ॥ कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ॥
मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति ॥ ५२ ॥ लोभात्प्रत्युपकाराय नन्वेतान्किं न पश्यसि ॥ तथापि ममतावर्ते मोहगर्ते
निपातिताः ॥ ५३ ॥ महामायाप्रभावेण संसारस्थितिकारिणा ॥ तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ॥ ५४ ॥ महा
माया हरेश्चैषा तया संमोह्यते जगत् ॥ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ ५५ ॥ बलादाकृष्य मोहाय महामाया प्रयच्छति ॥
तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥ ५६ ॥ सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी
॥ ५७ ॥ संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ॥ ५८ ॥ राजोवाच ॥ ५९ ॥ भगवन्का हि सा देवी महामायेति यां भवान् ॥ ६० ॥
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ॥ यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा ॥ ६१ ॥ तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्म
विदां वर ॥ ६२ ॥ ऋषिरुवाच ॥ ६३ ॥ नित्यैव सा जगन्मूर्तिस्तया सर्वमिदं ततम् ॥ ६४ ॥ तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां
मम ॥ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ॥ ६५ ॥ उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ॥ योगनिद्रां यदा विष्णु
र्जगत्येकार्णवीकृते ॥ ६६ ॥ आस्तीर्य शेषमभजत्कल्पांते भगवान्प्रभुः ॥ तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ॥ ६७ ॥
विष्णुकर्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ॥ स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ॥ ६८ ॥ दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च
जनार्दनम् ॥ तुष्टाव योगनिद्रां तामेकाग्रहृदयः स्थितः ॥ ६९ ॥ विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥ विश्वेश्वरीं जगद्धात्रीं स्थिति
संहारकारिणीम् ॥ ७० ॥ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ॥ ७१ ॥ ब्रह्मोवाच ॥ ७२ ॥ त्वं स्वाहा त्वं स्वधा त्वं
हि वषट्कारः स्वरात्मिका ॥ ७३ ॥ सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥ अर्धमात्रास्थिता नित्या याऽनुच्चार्या विशेषतः ॥

॥ ७४ ॥ त्वमेव संध्या सावित्री त्वं देवि जननी परा ॥ त्वयैतद्धार्यते विश्वं त्वयैतत्सृज्यते जगत् ॥ ७५ ॥ त्वयैतत्पाल्यते देवि
त्वमत्स्यंते च सर्वदा ॥ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ॥ ७६ ॥ तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥
महाविद्या महामाया महामेधा महास्मृतिः ॥ ७७ ॥ महामोहा च भवती महादेवी महासुरी ॥ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी
॥ ७८ ॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥ त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ॥ ७९ ॥ लज्जा पुष्टिस्तथा तुष्टिस्त्वं
शांतिः क्षांतिरेव च ॥ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ॥ ८० ॥ शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ॥
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी ॥ ८१ ॥ परापराणां परमा त्वमेव परमेश्वरी ॥ यच्च किंचित्क्वचिद्वस्तु सदसद्वाखिलात्मिके
॥ ८२ ॥ तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे तदा ॥ यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् ॥ ८३ ॥ सोऽपि
निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥ विष्णुः शरीरग्रहणमहमीशान एव च ॥ ८४ ॥ कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ॥
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ॥ ८५ ॥ मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ॥ ८६ ॥
बोधश्च क्रियतामस्य हंतुमेतौ महासुरौ ॥ ८७ ॥ ऋषिरुवाच ॥ ८८ ॥ एवं स्तुता तदा देवी तामसी तत्र वेधसा ॥ ८९ ॥ विष्णोः प्रबोध
नार्थाय निहंतुं मधुकैटभौ ॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ॥ ९० ॥ निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥ उत्तस्थौ च
जगन्नाथस्तया मुक्तो जनार्दनः ॥ ९१ ॥ एकार्णवे हि शयनात्ततः स ददृशे च तौ ॥ मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ॥ ९२ ॥
क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ॥ समुत्थाय ततस्ताभ्यां युयुधे भगवान्हरिः ॥ ९३ ॥ पंचवर्षसहस्राणि बाहुप्रहरणो विभुः ॥ तावप्यति
बलोन्मत्तौ महामायाविमोहितौ ॥ ९४ ॥ उक्तवंतौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥ ९५ ॥ भगवानुवाच ॥ ९६ ॥ भवेतामद्य
मे तुष्टौ मम वध्यावुभावपि ॥ ९७ ॥ किमन्येन वरेणात्र एतावद्धि वृतं मया ॥ ९८ ॥ ऋषिरुवाच ॥ ९९ ॥ वंचिताभ्यामिति तदा सर्वं ॥३४५॥
मापोमयं जगत् ॥ १०० ॥ विलोक्य ताभ्यां गदितो भगवान्कमलेक्षणः ॥ आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥ १ ॥ ऋषिरुवाच ॥

॥२॥ तथेत्युक्त्वा भगवता शंखचक्रगदाभृता ॥ कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः ॥ ३ ॥ एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता
स्वयम् ॥ प्रभावमस्या देव्यास्तु भूयः शृणुवदामि ते॥१०४॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये मधुकैटभवधो नाम
प्रथमोऽध्यायः ॥१ ॥ उवाच ॥ १४ ॥ अर्ध ॥ २४ ॥ श्लोक ॥ ६६ ॥ एवम् ॥ १०४ ॥ मध्यमचरितस्य विष्णंर्ऋषिः ॥ महालक्ष्मीर्देवता॥
उष्णिक्छन्दः ॥ शाकंभरी शक्तिः ॥ दुर्गा बीजम् ॥ वायुस्तत्त्वम् ॥ यजर्वेदः स्वरूपम् ॥ महालक्ष्मीप्रीत्यर्थं मध्यमचरितजपे विनि
योगः ॥ ॐ अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुः कुंडिकां दंडं शक्तिमसिं च चर्म जलजं घंटां सुराभाजनम्॥शूलं पाशसुदर्शने च दधतीं
हस्तैः प्रसन्नाननां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥ ऋषिरुवाच ॥ १ ॥ देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ॥ महिषे
ऽसुराणामधिपे देवानां पुरंदरे ॥ २ ॥ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ॥ जित्वा च सकलान्देवानिंद्रोऽभून्महिषासुरः ॥ ३ ॥
ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ॥ पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥ ४ ॥ यथा वृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ॥
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥ ५ ॥ सूर्येंद्राग्न्यनिलेंदूनां यमस्य वरुणस्य च ॥ अन्येषां चाधिकारान्स स्वयमेवाधि
तिष्ठति ॥ ६ ॥ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ॥ विचरंति यथा मर्त्या महिषेण दुरात्मना ॥७ ॥ एतद्वः कथितं सर्वममरारि
विचेष्टितम् ॥ शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिंत्यताम् ॥ ८ ॥ इत्थं निशम्य देवानां वचांसि मधुसूदनः ॥ चकार
कोप शंभश्च भ्रुकुटीकुटिलाननौ ॥ ९ ॥ ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ॥ निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ॥ १० ॥
अन्येषां चैव देवानां शक्रादीनां शरीरतः ॥ निर्गतं समहत्तेजस्तच्चैक्यं समगच्छत ॥ ११ ॥ अतीव तेजसः कूटं ज्वलंतमिव
पर्वतम् ॥ ददृशुस्ते सरास्तत्र ज्वालाव्याप्तदिगंतरम् ॥ १२ ॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजम् ॥ एकस्थं तदभून्नारी व्याप्तलोकत्रयं
त्विषा ॥ १३ ॥ यदभूच्छांभवं तेजस्तेनाजायत तन्मखम् ॥ याम्येन चाभवन्केशा बाहवो विष्णुतेजसा ॥ १४ ॥ सौम्येन
स्तनयोर्युग्मं मध्यं चैंद्रेण चाभवत् ॥ वारुणेन च जंघोरू नितंबस्तेजसा भुवः ॥ १५॥ ब्रह्मणस्तेजसा पादौ तदंगुल्योऽर्कतेजसा ॥

वसूनां च करांगुल्यः कौबेरेण च नासिका ॥ १६ ॥ तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा ॥ नयनत्रितयं जज्ञे तथा पावकतेजसा ॥ १७ ॥ भ्रुवौ च सन्ध्ययोस्तेजः श्रवणावनिलस्य च ॥ अन्येषां चैव देवानां संभवस्तेजसां शिवा ॥ १८ ॥ ततः समस्त देवानां तेजोराशिसमुद्भवाम् ॥ तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः॥१९॥ शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ॥ चक्रं च दत्तवान्कृष्णः समुत्पाट्य स्वचक्रतः ॥ २०॥ शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः ॥ मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी ॥२१॥ वज्रमिंद्रः समुत्पाट्य कुलिशादमराधिपः ॥ ददौ तस्यै सहस्राक्षो घंटामैरावताद्गजात् ॥ २२ ॥ कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ ॥ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुम् ॥ २३ ॥ समस्तरोमकूपेषु निजरश्मीन्दिवाकरः ॥ कालश्च दत्तवान्खड्गं तस्यै चर्म च निर्मलम् ॥ २४ ॥ क्षीरोदश्चामलं हारमजरे च तथांबरे ॥ चूडामणिं तथा दिव्यं कुंडले कटकानि च ॥ २५ ॥ अर्धचंद्रं तथा शुभ्रं केयूरान्सर्वबाहुषु ॥ नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥ २६ ॥ अंगुलीयकरत्नानि समस्तास्वंगुलीषु च ॥ विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥ २७ ॥ अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम् ॥ अम्लानपंकजां मालां शिरस्युरसि चापराम् ॥ २८ ॥ अददज्जलधिस्तस्यै पंकजं चातिशोभनम् ॥ हिमवान्वाहनं सिंहं रत्नानि विविधानि च ॥ २९ ॥ ददावशून्यं सुरया पानपात्रं धनाधिपः ॥ शेषश्च सर्वनागेशो महामणिविभूषितम् ॥ ३० ॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ॥ अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥ ३१ ॥ सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ॥ तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥ ३२ ॥ अमायतातिमहता प्रतिशब्दो महानभूत् ॥ चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे ॥ ३३ ॥ चचाल वसुधा चेलुः सकलाश्च महीधराः ॥ जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम् ॥ ३४ ॥ तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥ ३५ ॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ॥ आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥ ३६ ॥ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥ ३७ ॥ पादाक्रांत्या नतभुवं किरीटोल्लिखितांबराम् ॥ क्षोभिताशेषपातालां

धनुर्ज्यानिःस्वनेन ताम् ॥ ३८ ॥ दिशो भुजसहस्रेण समंताद्व्याप्य संस्थिताम् ॥ ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥ ३९ ॥
शस्त्रास्त्रैर्बहुधामुक्तैरादीपितदिगंतरम् ॥ महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥ ४० ॥ युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः ॥ रथाना
मयुतैः षड्भिरुदग्राख्यो महासुरः ॥ ४१ ॥ अयुध्यतायुतानां च सहस्रेण महाहनुः ॥ पंचाशद्भिश्च नियुतैरसिलोमा महासुरः ॥४२॥ अयु
तानां शतैः षड्भिर्बाष्कलो युयुधे रणे॥ गजवाजिसहस्रौघैरनेकैः परिवारितः ॥४३॥ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ॥ बिडा
लाख्योऽयुतानां च पंचाशद्भिरथायुतैः ॥४४॥ युयुधे संयुगे तत्र रथानां परिवारितः ॥ अन्ये च तत्रायुतशो रथनागहयैर्वृताः ॥४५॥ युयुधुः
संयुगे देव्या सह तत्र महासुराः ॥ कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥ ४६ ॥ हयानां च वृतो युद्धे तत्राभून्माहिषासुरः ॥ तोमरै
र्भिंदिपालैश्च शक्तिभिर्मुसलैस्तथा ॥४७॥ युयुधुः संयुगे देव्या खड्गैः परशुपाट्टिशैः॥ केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥४८॥
देवीं खड्गप्रहारैस्तु ते तां हंतुं प्रचक्रमुः ॥ सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥४९॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ॥
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः॥५०॥मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी॥सोऽपि क्रुद्धो धुतसटो देव्यावाहनकेसरी ॥५१॥
चचारासुरसैन्येषु वनेष्विव हुताशनः ॥ निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥५२॥ त एव सद्यः संभूता गणाः शतसहस्रशः ॥
युयुधुस्ते परशुभिर्भिंदिपालासिपट्टिशैः ॥५३॥ नाशयंतोऽसुरगणान्देवीशक्त्युपबृंहिताः ॥ अवादयंत पटहान्गणाः शंखांस्तथापरे ॥५४॥
मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ॥ ततो देवी त्रिशूलेन गदया शक्तिऋष्टिभिः ॥५५॥ खड्गादिभिश्च शतशो निजघान महासुरान्॥
पातयामास चैवान्यान्घंटास्वनविमोहितान् ॥५६॥ असुरान्भुविपाशेन बद्ध्वा चान्यानकर्षयत् ॥ केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथा
परे ॥५७॥ विपोथिता निपातेन गदया भुवि शेरते ॥ वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥५८॥ केचिन्निपतिता भूमौ भिन्नाः शूलेन
वक्षसि ॥ निरंतराः शरौघेण कृताः केचिद्रणाजिरे ॥ ५९ ॥ सेनानुकारिणः प्राणान् मुमुचुस्त्रिदशार्दनाः ॥ केषांचिद्बाहवश्छिन्ना
श्छिन्नग्रीवास्तथापरे ॥ ६० ॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥ विच्छिन्नजंघास्त्वपरे पेतुरुर्व्यां महासुराः ॥ ६१ ॥ एक

बाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः ॥ छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६२ ॥ कबंधा युयुधुर्देव्या गृहीतपरमायुधाः ॥
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥ ६३ ॥ कबंधाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ॥ तिष्ठतिष्ठेति भाषंतो देवीमन्ये महासुराः
॥ ६४ ॥ पातितै रथनागाश्वैरसुरैश्च वसुंधरा ॥ अगम्या साभवत्तत्र यत्राभूत्स महारणः ॥६५॥ शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः
॥ मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥ ६६ ॥ क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ॥ निन्ये क्षयं यथा वह्निस्तृणदारुमहा
चयम् ॥ ६७ ॥ स च सिंहो महानादमुत्सृजन्धुतकेसरः ॥ शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥ ६८ ॥ देव्या गणैश्च तैस्तत्र कृतं
युद्धं तथासुरैः ॥ यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि॥६९॥इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरसैन्यवधो
नाम द्वितीयोऽध्यायः ॥ २ ॥ उवाच ॥ १ ॥ श्लोक ॥ ६८ ॥ एवम् ॥ ६९ ॥ एवमादितः ॥ १७३ ॥ ऋषिरुवाच ॥ १ ॥
निहन्यमानं तत्सैन्यमवलोक्य महासुरः ॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकाम् ॥ २ ॥ स देवीं शरवर्षेण ववर्ष समरेऽसुरः ॥ यथा
मेरुगिरेः शृंगं तोयवर्षेण तोयदः॥ ३ ॥ तस्य छित्वा ततो देवी लीलयैव शरोत्करान् ॥ जघान तुरगान्बाणैर्यंतारं चैव वाजिनाम् ॥ ४ ॥
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ॥ विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ५ ॥स छिन्नधन्वा विरथो हताश्वो हत
सारथिः ॥ अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥ ६ ॥ सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ॥ आजघान भुजे सव्ये देवीमप्यति
वेगवान् ॥ ७॥ तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ॥ ततो जग्राह शूलं स कोपादरुणलोचनः ॥ ८ ॥ चिक्षेप च ततस्तत्तु भद्र
काल्यां महासुरः ॥ जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात् ॥९॥ दृष्ट्वा तदापतच्छूलं देवीशूलममुञ्चत ॥ तच्छूलं शतधा तेन नीतं स
च महासुरः ॥ १० ॥ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥ आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥११॥ सोऽपि शक्तिं मुमोचाथ
देव्यास्तामंबिका द्रुतम् ॥ हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ॥ १२ ॥ भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥ चिक्षेप
चामरः शूलं बाणैस्तदपि साच्छिनत् ॥ १३॥ ततः सिंहः समुत्पत्य गजकुंभांतरे स्थितः ॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥ १४॥

युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥ युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ॥१५॥ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ॥
करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥ १६ ॥ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ॥ दंतमुष्टितलैश्चैव करालश्च निपातितः ॥१७॥
देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ॥ बाष्कलं भिंदिपालेन बाणैस्ताम्रं तथांधकम् ॥ १८ ॥ उग्रास्यमुग्रवीर्यं च तथैव च
महाहनुम् ॥ त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥ १९ ॥ बिडालस्यासिना कायात्पातयामास वै शिरः ॥ दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये
यमक्षयम् ॥ २० ॥ एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ॥ माहिषेण स्वरूपेण त्रासयामास तान्गणान् ॥२१॥ कांश्चित्तुंडप्रहारेण खुर
क्षेपैस्तथापरान् ॥ लांगूलताडितांश्चान्याञ्छृङ्गाभ्यां च विदारितान् ॥ २२ ॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ॥ निःश्वासपवनेना
न्यान्पातयामास भूतले ॥२३॥ निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ॥ सिंहं हंतुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥२४॥ सोऽपि
कोपान्महावीर्यः खुरक्षुण्णमहीतलः ॥श्रृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च॥२५॥वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत॥लांगूलेना
हतश्चाब्धिः प्लावयामास सर्वतः ॥ २६ ॥ धुतश्रृंगविभिन्नाश्च खंडं खंडं ययुर्घनाः ॥ श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥२७॥
इति क्रोधसमाध्मातमापतंतं महासुरम् ॥ दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत्॥२८॥ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरम् ॥
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २९ ॥ ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः । छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत
॥ ३० ॥ तत एवाशु पुरुषं देवी चिच्छेद सायकैः॥ तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः॥३१॥करेण च महासिंहं तं चकर्ष जगर्ज च
॥ कर्षतस्तु करं देवी खड्गेन निरकृंतत ॥ ३२ ॥ ततो महासुरो भूयो माहिषं वपुरास्थितः ॥ तथैव क्षोभयामास त्रैलोक्यं सचराचरम्
॥ ३३ ॥ ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ॥ पपौ पुनः पुनश्चैव जहासारुणलोचना ॥ ३४ ॥ ननर्द चासुरः सोऽपि बल
वीर्यमदोद्धतः ॥॥विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान् ॥ ३५ ॥ सा च तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः॥ उवाच तं मदोद्धूत
मुखरागाकुलाक्षरम् ॥ ३६ ॥ देव्युवाच ॥ ३७ ॥ गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ॥ मया त्वयि हतेऽत्रैव गर्जिष्यंत्याशु

देवताः ॥ ३८ ॥ ऋषिरुवाच ॥ ३९ ॥ एवमुक्त्वा समुत्पत्य सा रूढा तं महासुरम् ॥ पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ॥ ४० ॥
ततः सोऽपि पदाक्रांतस्तया निजमुखात्ततः॥ अर्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृतः॥४१॥ अर्धनिष्क्रांत एवासौ युध्यमानो महासुरः॥
तया महासिना देव्या शिरश्छित्त्वा निपातितः ॥ ४२ ॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥ प्रहर्षं च परं जग्मुः सकला
देवतागणाः ॥ ४३ ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४४ ॥ इति मार्कंडेयपुराणे
सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ॥ ३ ॥ उवाच ॥ ३ श्लोकाः ॥ ४१ ॥एवम् ॥ ४४ ॥ एवमादितः
॥ २१७ ॥ ऋषिरुवाच ॥१॥ शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या ॥ तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः ॥ २ ॥ देव्या यया ततमिदं जगदात्मशक्त्या निश्शेषदेवगणशक्तिसमूहमूर्त्या ॥ तामंबिकामखिल
देवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः॥३॥ यस्याः प्रभावमतुलं भगवाननंतो ब्रह्मा हरश्च नहि वक्तुमलं बलं च ॥
सा चण्डिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु ॥ ४ ॥ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां
कृतधियां हृदयेषु बुद्धिः ॥ श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ५ ॥ किं वर्णयाम तव रूप
मचिंत्यमेतत्किंचातिवीर्यमसुरक्षयकारिभूरि ॥ किंचाहवेषु चरितानि तवाति यानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ६ ॥ हेतुः समस्त
जगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा ॥ सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ७ ॥
यस्याः समस्तसुरता समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः
स्वधा च ॥ ८ ॥ या मुक्तिहेतुरविचिंत्यमहाव्रता त्वमभ्यस्यसे सुनियतेंद्रियतत्त्वसारैः ॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्याऽसि सा
भगवती परमा हि देवि ॥९॥ शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम्॥देवि त्रयी भगवती भवभावनाय
वार्ता च सर्वजगतां परमार्तिहंत्री॥१०॥मेधासि देवि विदिताखिलशास्त्रसारा दुर्गाऽसि दुर्गभवसागरनौरसंगा ॥ श्रीः कैटभारिहृदयैककृता

धिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥ ११ ॥ ईषत्सहासममलं परिपूर्णचंद्रबिम्बानुकारि कनकोत्तमकांतिकांतम्॥अत्यद्भुतं प्रहृत
मात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण॥१२॥ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि यन्न सद्यः ॥ प्राणा
न्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितांतकदर्शनेन॥१३॥देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि
विज्ञातमेतदधुनैव यदस्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य ॥ १४ ॥ ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति
धर्मवर्गः ॥ धन्यास्त एव निभृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना ॥ १५ ॥ धर्म्याणि देवि सकलानि सदैव कर्माण्य
त्यादृतः प्रतिदिनं सुकृती करोति ॥ स्वर्गं प्रयाति च ततो भवतीप्रसादाल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥ १६ ॥ दुर्गे स्मृता हरसि
भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥ दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता
॥ १७ ॥ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नाम नरकाय चिराय पापम् ॥ संग्राममृत्युमधिगम्य दिवं प्रयांतु मत्वेति नूनमहितान्वि
निहंसि देवि ॥ १८ ॥ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ॥ लोकान्प्रयान्तु रिपवोऽपि हि शस्त्र-
पूता इत्थं मतिर्भवति तेष्वहितेषु साध्वी ॥ १९ ॥ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकांतिनिवहेन दृशोऽसुराणाम् ॥ यन्नागता
विलयमंशुमदिंदुखंडयोग्याननं तव विलोकयतां तदेतत् ॥ २० ॥ दुर्वृत्तवृत्तशमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः ॥
वीर्यं च हंतृहृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥ २१ ॥ केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभयकार्य
तिहारि कुत्र ॥ चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥ २२ ॥ त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं
त्वया समरमूर्धनि तेऽपि हत्वा ॥ नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते ॥ २३ ॥ शूलेन पाहि नो देवि
पाहि खड्गेन चाम्बिके ॥ घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च॥ २४ ॥ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ॥ भ्रामणे
नात्मशूलस्य उत्तरस्यां तथेश्वरि ॥ २५ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते॥ यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम्

॥ २६ ॥ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ॥ करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ॥ २७ ॥ ऋषिरुवाच ॥ २८ ॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिता जगतां धात्री तथा गंधानुलेपनैः॥ २९ ॥ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैः सुधूपिता ॥ प्राह प्रसाद सुमुखी समस्तान्प्रणतान्सुरान् ॥ ३० ॥ देव्युवाच ॥ ३१ ॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवांछितम् ॥ ३२ ॥ देवा ऊचुः ॥ ३३ ॥ भगवत्या कृतं सर्वं न किंचिदवशिष्यते ॥ यदयं निहतः शत्रुरस्माकं महिषासुरः ॥ ३४ ॥ यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ ३५ ॥ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ॥ तस्य वित्तर्द्धिविभवैर्धनदारादिसंप दाम् ॥ ३६ ॥ वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥ ३७ ॥ ऋषिरुवाच ॥ ३८ ॥ इति प्रसादिता देवैर्जगतोऽर्थे तथात्मनः ॥ तथे त्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥ ३९ ॥ इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥ देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ ४० ॥ पुनश्च गौरीदेहात्सा समुद्भूता यथाभवत् ॥ वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥ ४१ ॥ रक्षणाय च लोकानां देवानामुपकारिणी ॥ तच्छृणुष्व मया ख्यातं यथावत्कथयामि ते ॥ ४२ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतु र्थोऽध्यायः ॥ ४ ॥ उवाच ॥ ५ ॥ अर्द्धे ॥ २ ॥ श्लोकाः ॥ ३५ ॥ एवम् ॥ ४२ ॥ एवमादितः ॥ २५९ ॥ उत्तमचरितस्य रुद्रऋषिः॥महासर स्वती देवता॥ अनुष्टुप् छंदः ॥ भीमा शक्तिः ॥ भ्रामरी बीजम् ॥ सूर्यस्तत्त्वम् ॥ सामवेदः स्वरूपम् ॥ महासरस्वतीप्रीत्यर्थमुत्तमचरितजपे विनियोगः ॥ घण्टाशूलहलानि शंखमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनांतविलसच्छीतांशुतुल्यप्रभाम् ॥ गौरीदेहसमुद्भवां त्रिनयनामाधारभूतां महापूर्वामत्रसरस्वतीमनुभजे शुंभादिदैत्यार्दिनीम् ॥ ऋषिरुवाच ॥ १ ॥ पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः ॥ त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ २ ॥ तावेव सूर्यतां तद्वदधिकारं तथैंदवम् ॥ कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ ३ ॥ तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ॥ ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥ ४ ॥ हृताधिकारास्त्रि दशास्ताभ्यां सर्वे निराकृताः ॥महासुराभ्यां तां देवीं संस्मरंत्यपराजिताम् ॥ ५ ॥ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥ भवतां

नाशयिष्यामि तत्क्षणात्परमापदः॥६॥इति कृत्वा मतिं देवा हिमवंतं नगेश्वरम्॥जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः॥७॥देवा ऊचुः
॥८॥ नमो देव्यै महादेव्यै शिवायै सततं नमः॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥९॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै
नमो नमः॥ ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ॥१०॥ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै
शर्वाण्यै ते नमो नमः ॥ ११॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥१२॥अतिसौम्याति
रौद्रायै नतास्तस्यै नमो नमः॥नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः॥१३॥ या देवी सर्वभूतेषु विष्णुमायेतिशब्दिता॥नमतस्यै ॥१४॥
नमस्तस्यै ॥ १५ ॥ नमस्तस्यै नमो नमः ॥ १६ ॥ या देवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्तस्यै॥१७ ॥ नमस्तस्यै ॥ १८ ॥
नमस्तस्यै नमो नमः ॥ १९॥ या देवी सर्व भूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै॥२०॥ नमस्तस्यै॥२१॥ नमस्तस्यै नमो नमः ॥२२॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता॥ नमस्तस्यै ॥२३॥ नमस्तस्यै॥२४॥नमस्तस्यै नमो नमः॥२५॥ या देवी सर्वभूतेषु क्षुधारूपेण
संस्थिता ॥ नमस्तस्यै ॥ २६ ॥ नमस्तस्यै ॥ २७ ॥ नमस्तस्यै नमो नमः ॥ २८ ॥ या देवी सर्वभूतेषु च्छायारूपेण संस्थिता ॥
नमस्तस्यै ॥ २९ ॥ नमस्तस्यै ॥ ३० ॥ नमस्तस्यै नमो नमः ॥ ३१ ॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ३२ ॥
नमस्तस्यै ॥ ३३ ॥ नमस्तस्यै नमो नमः ॥ ३४ ॥ या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै ॥ ३५ ॥ नमस्तस्यै ॥ ३६ ॥
नमस्तस्यै नमो नमः ॥ ३७ ॥ या देवी सर्वभूतेषु क्षांतिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ३८ ॥ नमस्तस्यै ॥ ३९ ॥ नमस्तस्यै नमो
नमः ॥ ४० ॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ४१ ॥ नमस्तस्यै ॥ ४२ ॥ नमस्तस्यै नमो नमः
॥ ४३ ॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै ॥ ४४ ॥ नमस्तस्यै ॥ ४५ ॥ नमस्तस्यै नमो नमः ॥ ४६ ॥ या देवी
सर्वभूतेषु शांतिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ४७ ॥ नमस्तस्यै ॥ ४८ ॥ नमस्तस्यै नमो नमः ॥ ४९ ॥ या देवी सर्वभूतेषु श्रद्धा
रूपेण संस्थिता ॥ नमस्तस्यै ॥ ५० ॥ नमस्तस्यै ॥ ५१ ॥ नमस्तस्यै नमो नमः ॥ ५२ ॥ या देवी सर्वभूतेषु कांतिरूपेण संस्थिता ॥

नमस्तस्यै ॥ ५३ ॥ नमस्तस्यै ॥ ५४ ॥ नमस्तस्यै नमो नमः ॥ ५५ ॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ॥ नमस्तस्यै ॥ ५६ ॥
नमस्तस्यै ॥ ५७ ॥ नमस्तस्यै नमो नमः ॥ ५८ ॥ या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ५९ ॥ नमस्तस्यै ॥ ६० ॥
नमस्तस्यै नमो नमः ॥ ६१ ॥ या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ६२ ॥ नमस्तस्यै ॥ ६३ ॥ नमस्तस्यै नमो
नमः ॥ ६४ ॥ या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥ नमस्तस्यै ॥ ६५ ॥ नमस्तस्यै ॥ ६६ ॥ नमस्तस्यै नमो नमः ॥ ६७ ॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ॥ नमस्तस्यै ॥ ६८ ॥ नमस्तस्यै ॥ ६९ ॥ नमस्तस्यै नमो नमः ॥ ७० ॥ या देवी सर्वभूतेषु मातृ
रूपेण संस्थिता ॥ नमस्तस्यै ॥ ७१ ॥ नमस्तस्यै ॥ ७२ ॥ नमस्तस्यै नमो नमः ॥ ७३ ॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥
नमस्तस्यै ॥ ७४ ॥ नमस्तस्यै ॥ ७५ ॥ नमस्तस्यै नमो नमः ॥ ७६ ॥ इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥ भूतेषु सततं तस्यै
व्याप्त्यै देव्यै नमो नमः ॥ ७७ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै ॥ ७८ ॥ नमस्तस्यै ॥ ७९ ॥ नमस्तस्यै
नमो नमः ॥ ८० ॥ स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रेण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्य
भिहंतु चापदः ॥ ८१ ॥ या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षणमेव हन्ति नः सर्वापदो
भक्तिविनम्रमूर्तिभिः ॥ ८२ ॥ ऋषिरुवाच ॥ ८३ ॥ एवं स्तवादियुक्तानां देवानां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जाह्नव्या
नृपनंदन ॥ ८४ ॥ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिः स्तूयतेऽत्र का ॥ शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥ ८५ ॥ स्तोत्रं ममैत
त्क्रियते शुभंदैत्यनिराकृतैः ॥ देवैः समेतैः समरे निशुंभेन पराजितैः ॥ ८६ ॥ शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका ॥ कौशिकीति
समस्तेषु ततो लोकेषु गीयते ॥ ८७ ॥ तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ॥ कालिकेति समाख्याता हिमाचलकृताश्रया
॥ ८८ ॥ ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ॥ ददर्श चण्डो मुंडश्च भृत्यौ शुंभनिशुंभयोः ॥ ८९ ॥ ताभ्यां शुंभाय चाख्याता
सातीवसुमनोहरा ॥ काप्यास्ते स्त्री महाराज भासयंती हिमाचलम् ॥ ९० ॥ नैव तादृक्कचिद्रूपं दृष्टं केनचिदुत्तमम् ॥ ज्ञायतां

काप्यसौ देवी गृह्यतां चासुरेश्वर ॥ ९१ ॥ स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशस्त्विषा ॥ सा तु तिष्ठति दैत्येंद्र तां भवान्द्रष्टुमर्हति ॥ ९२ ॥ यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥ त्रैलोक्ये तु समस्तानि सांप्रतं भांति ते गृहे ॥ ९३ ॥ ऐरावतः समानीतो गजरत्नं पुरन्दरात् ॥ पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः ॥ ९४ ॥ विमानं हंससंयुक्तमेतत्तिष्ठति तेंऽगणे ॥ रत्नभूतमिहानीतं यदासीद्वेधसोऽद्भुतम् ॥ ९५ ॥ निधिरेष महापद्मः समानीतो धनेश्वरात् ॥ किंजल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ॥ ९६ ॥ छत्रं ते वारुणं गेहे कांचनस्रावि तिष्ठति ॥ तथायं स्यंदनवरो यः पुरासीत्प्रजापतेः ॥ ९७ ॥ मृत्योरुत्क्रांतिदा नाम शक्तिरीश त्वया हृता ॥ पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ॥ ९८ ॥ निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः ॥ वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥ ९९ ॥ एवं दैत्येंद्र रत्नानि समस्तान्याहृतानि ते ॥ स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ १०० ॥ ऋषिरुवाच ॥ १ ॥ निशम्येति वचः शुंभः स तदा चंडमुंडयोः ॥ प्रेषयामास सुग्रीवं दूतं देव्या महासुरम् ॥ ॥ २ ॥ इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥ यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥ ३ ॥ स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥ सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥ ४ ॥ दूत उवाच ॥ ५ ॥ देवि दैत्येश्वरः शुंभस्त्रैलोक्ये परमेश्वरः ॥ दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥ ६ ॥ अव्याहताज्ञः सर्वासु यः सदा देव योनिषु ॥ निर्जिताखिलदैत्यारिः स यदाह शृणुष्व तत् ॥ ७ ॥ मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥ यज्ञभागानहं सर्वानुपाश्नामि पृथक्पृथक् ॥ ८ ॥ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥ तथैव गजरत्नं च हृतं देवेंद्रवाहनम् ॥ ९ ॥ क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः । उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितम् ॥ ११० ॥ यानि चान्यानि देवेषु गंधर्वेषूरगेषु च ॥ रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ ११ ॥ स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ॥ सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥ १२ ॥ मां वा ममानुजं वापि निशुंभमुरुविक्रमम् ॥ भज त्वं चंचलापांगि रत्नभूतासि वै यतः ॥ १३ ॥ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥ एतद् बुद्ध्या समालोक्य मत्परिग्रहतां

व्रज ॥ १४ ॥ ऋषिरुवाच ॥ १५ ॥ इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥
॥ १६ ॥ देव्युवाच ॥ १७ ॥ सत्यमुक्तं त्वया नात्र मिथ्या किंचित्त्वयोदितम् ॥ त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः
॥ १८ ॥ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथम् ॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥ १९ ॥ यो मां जयति
संग्रामे यो मे दर्पं व्यपोहति ॥ यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥ १२० ॥ तदा गच्छतु शुंभोऽत्र निशुंभो वा महासुरः ॥
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु॥२१॥दूत उवाच॥२२॥अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ॥ त्रैलोक्ये कः पुमांस्तिष्ठे
दग्रे शुंभनिशुंभयोः॥२३॥ अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ॥ तिष्ठंति संमुखे देवि किं पुनः स्त्री त्वमेकिका॥२४॥इंद्राद्याः सकला
देवास्तस्थुर्येषां न संयुगे ॥ शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥ २५ ॥ सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुंभयोः ॥ केशा
कर्षणनिर्धूतगौरवा मा गमिष्यसि॥२६॥ देव्युवाच ॥२७॥ एवमेतद्बली शुंभो निशुंभश्चातिवीर्यवान् ॥ किं करोमि प्रतिज्ञा मे यदनालो
चिता पुरा ॥२८॥ स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ॥ तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु यत् ॥१२९॥इति श्रीमार्कंडेयपुराणे
सावर्णिके मन्वंतरे देवीमाहात्म्ये देव्या दूतसंवादो नाम पंचमोऽध्यायः ॥ ५ ॥ उवाच ॥ ९ ॥ खंडानि ॥ ६६ ॥ श्लोकाः ॥ ५४ ॥
एवम् ॥ १२९ ॥ एवमादितः ॥ ३८८ ॥ ऋषिरुवाच ॥ १ ॥ इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥ समाचष्ट समागम्य दैत्य
राजाय विस्तरात् ॥ २ ॥ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥३॥ हे धूम्रलोचनाशु
त्वं स्वसैन्यपरिवारितः ॥ तामानय बलाद्दुष्टां केशाकर्षणविह्वलाम् ॥ ४ ॥ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ॥ स हंतव्योऽमरो वापि
यक्षो गंधर्व एव वा ॥५॥ ऋषिरुवाच ॥६॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥ वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥७॥
स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ॥ जगादोच्चैः प्रयाहीति मूलं शुंभनिशुंभयोः ॥८॥ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति॥
ततो बलान्नयाम्येष केशाकर्षणविह्वलाम् ॥ ९ ॥ देव्युवाच ॥ १० ॥ दैत्येश्वरेण प्रहितो बलवान्बलसंवृतः ॥ बलान्नयसि मामेवं ततः

किं ते करोम्यहम् ॥ ११ ॥ ऋषिरुवाच ॥१२॥ इत्युक्तः सोऽभ्यधावत्तामसुरो धूम्रलोचनः ॥ हुंकारेणैव तं भस्म सा चकारांबिका ततः ॥
॥ १३ ॥ अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १४ ॥ ततो धुतसटः कोपात्कृत्वा
नादं सुभैरवम् ॥ पपातासुरसेनायां सिंहो देव्याः स्ववाहनः॥१५॥कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥आक्रान्त्या चाधरेणान्यान्स
जघान महासुरान् ॥ १६ ॥ केषांचित्पाटयामास नखैः कोष्ठानि केसरी ॥ तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥ १७ ॥ विच्छिन्न
बाहुशिरसः कृतास्तेन तथापरे॥पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥१८॥क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ॥तेन केसरिणा देव्या
वाहनेनातिकोपिना ॥ १९ ॥ श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम्॥बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥२०॥चुकोप दैत्याधि
पतिः शुंभः प्रस्फुरिताधरः॥आज्ञापयामास च तौ चंडमुंडौ महासुरौ॥२१॥हे चंड हे मुंड बलैर्बहुभिः परिवारितौ॥तत्र गच्छत गत्वा च सा
समानीयतां लघु ॥२२॥ केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ॥ तदाशेषायुधैःसर्वैरसुरैर्विनिहन्यताम्॥२३॥तस्यां हतायां दुष्टायां
सिंहे च विनिपातिते॥शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथांबिकाम् ॥२४॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये धूम्र
लोचनवधो नाम षष्ठोऽध्यायः ॥ ६ ॥ उवाच ॥ ४ ॥ अर्धम्० ॥ श्लोकाः ॥ २० ॥ एवम् ॥ २४ ॥ एवमादितः ॥ ४१२ ॥
ऋषिरुवाच ॥ १ ॥ आज्ञप्तास्ते ततो दैत्याश्चंडमुंडपुरोगमाः ॥ चतुरंगबलोपेता ययुरभ्युद्यतायुधाः ॥ २ ॥ ददृशुस्ते ततो देवीमीषद्धासां
व्यवस्थिताम् ॥ सिंहस्योपरि शैलेंद्र शृङ्गे महति कांचने॥३॥ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः॥ आकृष्टचापासिधरास्तथान्ये तत्स
मीपगाः ॥ ४ ॥ ततः कोपं चकारोच्चैरंबिका तानरीन्प्रति ॥ कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥ ५ ॥ भ्रुकुटीकुटिलात्तस्या ललाट
फलकाद्द्रुतम् ॥ काली करालवदना विनिष्क्रांतासिपाशिनी ॥६॥ विचित्रखट्वांगधरा नरमालाविभूषणा ॥ द्वीपिचर्मपरीधाना शुष्कमांसा
तिभैरवा ॥७॥ अतिविस्तारवदना जिह्वाललनभीषणा ॥ निमग्ना रक्तनयना नादापूरितदिङ्मुखा ॥ ८ ॥ सा वेगेनाभिपतिता घातयन्ती
महासुरान् ॥ सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥ ९ ॥ पार्ष्णिग्राहांकुशग्राहयोधघंटासमन्वितान् ॥ समादायैकहस्तेन मुखे

चिक्षेप वारणान् ॥ १० ॥ तथैव योधं तुरगै रथं सारथिना सह ॥ निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यातिभैरवम् ॥ ११ ॥ एकं जग्राह केशेषु ग्रीवायामथ चापरम् ॥ पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत् ॥ १२ ॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथा सुरैः ॥ मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥ १३ ॥ बलिनां तद्बलं सर्वमसुराणां दुरात्मनाम् ॥ ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तदा ॥ १४ ॥ असिना निहताः केचित्केचित्खट्वांगताडिताः ॥ जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा ॥ १५ ॥ क्षणेन तद्बलं सर्वमसुराणां निपातितम् ॥ दृष्ट्वा चंडोऽभिदुद्राव तां कालीमतिभीषणाम् ॥ १६ ॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥ छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः ॥ १७ ॥ तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ॥ बभुर्यथार्कबिंबानि सुबहूनि घनोदरम् ॥ १८ ॥ ततो जहासातिरुषा भीमं भैरवनादिनी ॥ काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला ॥ १९ ॥ उत्थाय च महासिंहं देवी चंडमधावत ॥ गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥ २० ॥ अथ मुंडोऽभ्यधावत्तां दृष्ट्वा चंडं निपातितम् ॥ तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥ २१ ॥ हतशेषं ततः सैन्यं दृष्ट्वा चंडं निपातितम् ॥ मुंडं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥ २२ ॥ शिरश्चंडस्य काली च गृहीत्वा मण्डमेव च ॥ प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकाम् ॥ २३ ॥ मया तवात्रोपहृतौ चण्डमुंडौ महापशू ॥ युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि ॥ २४ ॥ ऋषिरुवाच ॥ २५ ॥ तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ ॥ उवाच कालीं कल्याणी ललितं चंडिका वचः ॥ २६ ॥ यस्माच्चंडं च मुण्डं च गृहीत्वा त्वमुपागता॥चामुंडेति ततो लोके ख्याता देवी भविष्यसि॥२७॥इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये चंडमुंडवधो नाम सप्तमोऽध्यायः ॥ ७ ॥ उवाच ॥ २ ॥ श्लोकाः ॥ २५ ॥ एवम् ॥ २७ ॥ एवमादितः ॥ ४३९ ॥ ऋषिरुवाच ॥ १ ॥ चंडे च निहते दैत्ये मुण्डे च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ २ ॥ ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ ३ ॥ अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥ ४ ॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धूम्राणां निर्गच्छन्तु ममाज्ञया ॥ ५ ॥ कालका दौर्हृदा

मौर्याः कालिकेयास्तथासुराः ॥ युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम ॥६ ॥ इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ॥ निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥ ७ ॥ आयातं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ॥ ज्यास्वनैः पूरयामास धरणीगगनांतरम् ॥ ८ ॥ ततः सिंहो महानादमतीव कृतवान्नृप ॥ घण्टास्वनेन तं नादमंबिका चोपबृंहयत् ॥ ९ ॥ धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ॥ निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥ १० ॥ तं निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ॥ देवी सिंहस्तथा काली शरोघैः परिवारिताः ॥११॥ एतस्मिन्नंतरे भूप विनाशाय सुरद्विषाम् ॥ भवायामरसिंहानामतिवीर्यबलान्विताः ॥ १२ ॥ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः ॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥ १३ ॥ यस्य देवस्य यद्रूपं यथा भूषणवाहनम् ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥ १४ ॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥ आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥ १५ ॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥ महाहिवलया प्राप्ता चन्द्ररेखाविभूषिणा ॥ १६ ॥ कौमारीशक्तिहस्ता च मयूरवरवाहना ॥ योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी ॥ १७ ॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥ १८ ॥ यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः ॥ शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥१९॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥ प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥२०॥ वज्रहस्ता तथैवैंद्री गजराजोपरि स्थिता ॥ प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा॥२१॥ ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥ हन्यंतामसुराः शीघ्रं मम प्रीत्याह चण्डिकाम् ॥ २२ ॥ ततो देवीशरीरात्तु विनिष्क्रांतातिभीषणा ॥ चंडिका शक्तिरत्युग्रा शिवा शतनिनादिनी ॥ २३ ॥ सा चाह धूम्रजटिलमीशानमपराजिता ॥ दूत त्वं गच्छ भगवन्पार्श्वं शुंभनिशुंभयोः ॥ २४ ॥ ब्रूहि शुंभं निशुंभं च दानवावतिगर्वितौ ॥ ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥ २५ ॥ त्रैलोक्यमिंद्रो लभतां देवाः संतु हविर्भुजः ॥ यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥ २६ ॥ बलावलेपादथ चेद्भवंतो युद्धकांक्षिणः ॥ तदागच्छत तृप्यंतु मच्छिवाः पिशितेन वः ॥ २७ ॥ यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयम् ॥ शिवदूतीति लोकेऽस्मिंस्ततः सा

ख्यातिमागता ॥२८॥ तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ॥ अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता॥२९ ॥ ततः प्रथममे
वाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥ ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥३०॥ सा च तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् ॥चिच्छेद लीलया
ध्मातधनुर्मुक्तैर्महेषुभिः ॥ ३१ तस्याग्रतस्तथा काली शूलपातविदारितान् ॥ खट्वांगपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥ ३२ ॥ कमंडलु
जलाक्षेपहतवीर्यान्हतौजसः ॥ ब्रह्माणी चा करोच्छत्रून्येन येन स्म धावति ॥ ३३ ॥ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥ दैत्या
ञ्जघान कौमारी तथा शक्त्यातिकोपना ॥ ३४ ॥ ऐंद्री कुलिशपातेन शतशो दैत्यदानवाः ॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः
॥ ३५ ॥ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ॥ वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥ ३६ ॥ नखैर्विदारितांश्चान्यान्भक्षयंती
महासुरान् ॥ नारसिंही चचाराजौ नादापूर्णदिगंतरा ॥ ३७ ॥ चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥ पेतुः पृथिव्यां पतितास्तां
श्चखादाथ सा तदा ॥ ३८ ॥ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् ॥ दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥ ३९ ॥ पलायनपरान्दृष्ट्वा
दैत्यान्मातृगणार्दितान्॥ योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥ ४०॥ रक्तबिंदुर्यदाभूमौ पतत्यस्य शरीरतः ॥ समुत्पतति मेदिन्या
स्तत्प्रमाणस्तदासुरः ॥ ४१ ॥ युयुधे स गदापाणिरिंद्रशक्त्या महासुरः ॥ ततश्चैंद्री स्ववज्रेण रक्तबीजमताडयत् ॥ ४२ ॥ कुलि
शेनाहतस्याशु बहु सुस्राव शोणितम् ॥ समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥ ४३ ॥ यावंतः पतितास्तस्य शरीरा
द्रक्तबिंदवः ॥ तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ ४४ ॥ ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥ समं मातृभिरत्युग्र
शस्त्रपातातिभीषणम् ॥ ४५ ॥ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥ ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ४६ ॥ वैष्णवी
समरे चैनं चक्रेणाभिजघान ह ॥ गदया ताडयामास ऐंद्री तमसुरेश्वरम् ॥ ४७ ॥ वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः ॥
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ४८ ॥ शक्त्या जघान कौमारी वाराही च तथासिना ॥ माहेश्वरी त्रिशूलेन रक्तबीजं
महासुरम् ॥ ४९॥ स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् ॥ मातृः कोपसमाविष्टो रक्तबीजो महासुरः ॥ ५०॥ तस्याहतस्य बहुधा

शक्तिशूलादिभिर्भुवि ॥ पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ॥५१॥ तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् ॥ व्याप्तमासीत्ततो देवा
भयमाजग्मुरुत्तमम् ॥ ५२ ॥ तान्विषण्णान्सुरान्दृष्ट्वा चंडिका प्राह सत्वरा ॥ उवाच कालीं चामुंडे विस्तीर्णं वदनं कुरु ॥ ५३ ॥ मच्छस्त्र
पातसंभूतान्रक्तबिंदून्महासुरान् ॥ रक्तबिंदोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ॥ ५४ ॥ भक्षयंती चर रणे तदुत्पन्नान्महासुरान् ॥ एव
मेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति॥५५॥भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यंति चापरे॥इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम्
॥५६॥ मुखेन काली जगृहे रक्तबीजस्य शोणितम् ॥ ततोऽसावाजघानाथ गदया तत्र चंडिकाम्॥५७॥ न चास्या वेदनां चक्रे गदापातो
ऽल्पिकामपि ॥ तस्याहतस्य देहात्तु बहु सुस्राव शोणितम् ॥ ५८ ॥ यतस्ततस्तद्वक्त्रेण चामुंडा संप्रतीच्छति ॥ मुखे समुद्गता येऽस्या
रक्तपातान्महासुराः ॥ ५९ ॥ तांश्चखादाथ चामुंडा पपौ तस्य च शोणितम् ॥ देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥ ६० ॥ जघान
रक्तबीजं तं चामुंडा पीतशोणितम् ॥ स पपात महीपृष्ठे शस्त्रसंघसमाहतः ॥६१॥ नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ततस्ते हर्ष
मतुलमवापुस्त्रिदशा नृप ॥ ६२ ॥ तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ ६३ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे
देवीमाहात्म्ये रक्तबीजवधो नामाष्टमोऽध्यायः ॥ ८ ॥ उवाच ॥ १ ॥ अर्धम् ॥ १ ॥ श्लोकाः ॥ ६१ ॥ एवम् ॥ ६३ ॥ एवमादितः
॥ ५०२ ॥ राजोवाच ॥ १ ॥ विचित्रमिदमाख्यातं भगवन्भवता मम ॥ देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥ २ ॥ भूयश्चेच्छाम्यहं
श्रोतुं रक्तबीजे निपातिते ॥ चकार शुंभो यत्कर्म निशुंभश्चातिकोपनः ॥ ३ ॥ ऋषिरुवाच ॥ ४ ॥ चकार कोपमतुलं रक्तबीजे निपातिते ॥
शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ॥५॥ हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ॥ अभ्यधावन्निशुंभोऽथ मुख्ययासुरसेनया ॥ ६ ॥
तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ॥ संदष्टौष्ठपुटाः क्रुद्धा हंतुं देवीमुपाययुः ॥ ७ ॥ आजगाम महावीर्यः शुंभोऽपि स्वबलैर्वृतः ॥
निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥ ८ ॥ ततो युद्धमतीवासीद्देव्याः शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥९॥
चिच्छेदास्ताञ्छरांस्ताभ्यां चंडिका स्वशरोत्करैः ॥ ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ ॥ १० ॥ निशुंभो निशितं खड्गं चर्म चादाय

सुप्रभम् ॥ अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥११॥ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम्॥ निशुंभस्याशु चिच्छेद चर्म चाप्यष्ट
चंद्रकम् ॥ १२ ॥ छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः॥ तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥ १३ ॥ कोपाध्मातो निशुं
भोऽथ शूलं जग्राह दानवः ॥ आयांतं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥ १४ ॥ आविद्ध्याथ गदां सोऽपि चिक्षेप चंडिकां प्रति ॥ सापि
देव्यास्त्रिशूलेन भिन्ना भस्मत्वमागता॥१५॥ततः परशुहस्तं तमायांतं दैत्यपुंगवम्॥आहत्य देवी बाणौघैरपातयत भूतले॥१६॥तस्मिन्निपतिते
भूमौ निशुंभे भीमविक्रमे॥ भ्रातर्यतीव संक्रुद्धः प्रययौ हंतुमंबिकाम् ॥ १७ ॥ स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ॥ भुजैरष्टाभिरतुलै
र्व्याप्याशेषं बभौ नमः ॥ १८ ॥ तमायांतं समालोक्य देवी शंखमवादयत् ॥ ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ॥ १९ ॥ पूर
यामास ककुभो निजघंटास्वनेन च ॥ समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥ २० ॥ ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥ पूर
यामास गगनं गां तथैव दिशो दश॥२१॥ ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ॥कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः॥२२॥
अट्टाट्टहासमशिवं शिवदूती चकार ह ॥ तैः शब्दैरसुरास्त्रेसुः शुंभः कोपं परं ययौ ॥ २३ ॥ दुरात्मंस्तिष्ठ तिष्ठेति व्याजहारांबिका यदा ॥
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः॥२४॥शुंभेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा॥आयांती वह्निकूटाभा सा निरस्ता महोल्कया
॥ २५ ॥ सिंहनादेन शुंभस्य व्याप्तं लोकत्रयान्तरम् ॥ निर्घातनिःस्वनो घोरो जितवानवनीपते ॥ २६ ॥ शुंभमुक्ताञ्छरान्देवी शुंभ
स्तत्प्रहिताञ्छरान् ॥ चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः॥२७॥ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम्॥स तदा निहतो भूमौ
मूर्च्छितो निपपात ह॥२८॥ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः॥आजघान शरैर्देवीं कालीं केसरिणं तथा॥२९॥ पुनश्च कृत्वा बाहूना
मयुतं दनुजेश्वरः॥चक्रायुधेन दितिजश्छादयामास चंडिकाम्॥३०॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ॥ चिच्छेद तानि चक्राणि
स्वशरैः सायकांश्च तान् ॥ ३१ ॥ ततो निशुंभो वेगेन गदामादाय चंडिकाम् ॥ अभ्यधावत वै हंतुं दैत्यसेनासमावृतः ॥ ३२ ॥ तस्या
पतत एवाशु गदां चिच्छेद चंडिका ॥ खड्गेन शितधारेण स च शूलं समाददे ॥ ३३ ॥ शूलहस्तं समायांतं निशुंभममरार्दनम् ॥

हृदि विव्याध शूलेन वेगाविद्धेन चंडिका ॥ ३४ ॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ॥ महाबलो महावीर्यस्तिष्ठेति पुरुषो
वदन् ॥ ३५ ॥ तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ॥ शिरश्छिच्छेद खड्गेन ततोऽसावपतद्भुवि ॥ ३६ ॥ ततः सिंहश्चखादो
ग्रदंष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥ ३७ ॥ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ॥ ब्रह्माणी
मंत्रपूतेन तोयेनान्ये निराकृताः ॥ ३८ ॥ माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथापरे ॥ वाराहीतुंडघातेन केचिच्चूर्णी कृता भुवि ॥ ३९ ॥
खंडं खंडं च चक्रेण वैष्णव्या दानवाः कृताः ॥ वज्रेण चैंद्रीहस्ताग्रविमुक्तेन तथापरे ॥ ४० ॥ केचिद्विनेशुरसुराः केचिन्नष्टा महाह
वात् ॥ भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥ ४१ ॥ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये निशुंभवधो
नाम नवमोऽध्यायः ॥ ९ ॥ उवाच ॥ २ ॥ श्लोकाः ॥ ३९ ॥ एवम् ॥ ४१ ॥ एवमादितः ॥ ५४३ ॥ ऋषिरुवाच ॥ १ ॥ निशुंभं
निहतं दृष्ट्वा भ्रातरं प्राणसंमितम् ॥ हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः ॥ २ ॥ बलावलेपादुष्टे त्वं मा दुर्गे गर्वमावह ॥
अन्यासां बलमाश्रित्य युध्यसे याऽतिमानिनी ॥ ३ ॥ देव्युवाच ॥ ४ ॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥ पश्यैता दुष्टमय्येव
विशंत्यो मद्विभूतयः ॥ ५ ॥ ऋषिरुवाच ॥ ६ ॥ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ॥ तस्या देव्यास्तनौ जग्मुरेकैवासी
त्तदांबिका ॥ ७ ॥ देव्युवाच ॥ ॥ ८ ॥ अहं विभूत्या बहुभिरिहरूपैर्यदा स्थिता ॥ तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥
॥ ९ ॥ ऋषिरुवाच ॥ १० ॥ ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः ॥ पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥ ११ ॥ शरवर्षैः
शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥ तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरम् ॥ १२ ॥ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथांबिका ॥ बभंज
तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ॥ १३ ॥ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥ बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः ॥ १४ ॥
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥ सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥ १५ ॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥ १६ ॥ ततः खड्गमुपादाय शतचंद्रं च भानुमत् ॥ अभ्यधावत्तदा देवीं दैत्याना

मं० म० मधिपेश्वरः ॥ १७ ॥ तस्यापतत एवाशु खड्गं चिच्छेद चंडिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥ १८॥ हताश्वः स तदा दैत्य म०खं० २
॥१९९॥ श्छिन्नधन्वा विसारथिः ॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः ॥ १९ ॥ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥ तथापि सोऽभ्य
धावत्तां मुष्टिमुद्यम्य वेगवान् ॥ २० ॥ स मुष्टिं पातयामास हृदये दैत्यपुंगवः ॥ देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ॥ २१ ॥ दु० तं०
तलप्रहाराभिहतो निपपात महीतले॥ स दैत्यराजः सहसा पुनरेव तथोत्थितः ॥२२ ॥ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥ तत्रापि तं० १
सा निराधारा युयुधे तेन चंडिका ॥ २३ ॥ नियुद्धं खे तदा दैत्यश्चंडिका च परस्परम् ॥ चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम् ॥
॥ २४॥ ततो नियुद्धं सुचिरं कृत्वा तेनांबिका सह ॥ उत्पाट्य भ्रामयामास चिक्षेप धरणीतले॥ २५ ॥ स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य
वेगतः ॥ अभ्यधावत दुष्टात्मा चंडिकानिधनेच्छया ॥ २६ ॥ तमायांतं ततो देवी सर्वदैत्यजनेश्वरम् ॥ जगत्यां पातयामास भित्त्वा शूलेन
वक्षसि ॥ २७ ॥ स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ॥ चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ॥ २८ ॥ ततः प्रसन्न
मखिलं हते तस्मिन्दुरात्मनि॥ जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥२९॥ उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥ सरितो
मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥३०॥ ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥ बभूवुर्निहते तस्मिन्गंधर्वा ललितं जगुः ॥ ३१ ॥ अवा
दयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥ ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ ३२॥ जज्वलुश्चाग्नयः शांताः शांता दिग्जनितस्वनाः
॥ ३३ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शुंभवधो नाम दशमोऽध्यायः ॥ १० ॥ उवाच ॥ ५॥ अर्धम् ॥ १ ॥
श्लोकाः ॥ २७ ॥ एवम् ॥ ३३ ॥ एवमादितः ॥ ५७६ ॥ ऋषिरुवाच ॥ १ ॥ देव्या हते तत्र महासुरेंद्रे सेंद्राः सुरा वह्निपुरोगमा
स्ताम् ॥ कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासिवक्त्राब्जविकासिताशाः ॥ २॥ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ॥ प्रसीद
विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥३॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि॥अपां स्वरूपस्थितया ॥१९९॥
त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये॥४॥त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया॥संमोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना

भुवि मुक्तिहेतुः॥५॥विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु॥त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्यपरा परोक्तिः
॥ ६ ॥ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी ॥ त्वं स्तुता स्तुतये का वा भवंति परमोक्तयः ॥ ७ ॥ सर्वस्य बुद्धिरूपेण जनस्य हृदि
संस्थिते ॥ स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥ ८ ॥ कलाकाष्ठादिरूपेण परिणामप्रदायिनी ॥ विश्वस्योपरतौ शक्ते नारायणि
नमोऽस्तु ते ॥ ९ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ १० ॥ सृष्टिस्थिति
विनाशानां शक्तिभूते सनातनि ॥ गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥११॥शरणागतदीनार्तपरित्राणपरायणे ॥ सर्वस्यार्तिहरे देवि
नारायणि नमोऽस्तु ते ॥ १२ ॥ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ॥ कौशांभःक्षरिके देवि नारायणि नमोऽस्तु ते ॥ १३ ॥ त्रिशूल
चंद्राहिधरे महावृषभवाहिनि ॥ माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥ १४ ॥ मयूरकुक्कुटवृते महाशक्तिधरेऽनघे॥ कौमारीरूपसंस्थाने
नारायणि नमोऽस्तु ते॥ १५ ॥ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे ॥ प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते॥ १६ ॥ गृहीतोग्रमहाचक्रे
दंष्ट्रोद्धृतवसुंधरे ॥ वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥१७॥ नृसिंहरूपेणोग्रेण हंतुं दैत्यान्कृतोद्यमे॥त्रैलोक्यत्राणसहिते नारायणि
नमोऽस्तु ते ॥ १८ ॥ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥ वृत्रप्राणहरे चैंद्रि नारायणि नमोऽस्तु ते ॥ १९ ॥ शिवदूतीस्वरूपेण हत
दैत्यमहाबले॥ घोररूपे महारावे नारायणि नमोऽस्तु ते ॥ २० ॥ दंष्ट्राकरालवदने शिरोमालाविभूषणे ॥ चामुंडे मुंडमथने नारायणि नमो
ऽस्तु ते॥ २१ ॥ लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे॥ महारात्रिमहाविद्ये नारायणि नमोऽस्तु ते ॥२२॥ मेधे सरस्वतिवरे भूति बाभ्रवि
तामसि॥ नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते॥२३॥ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते॥भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते
॥२४॥ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्॥पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥२५॥ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ॥
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते॥२६॥हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्॥सा घंटा पातु नो देवि पापेभ्योऽनः सुतानिव२७॥
असुरासृग्वसापंकचर्चितस्ते करोज्ज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयम्॥२८॥रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकला

नभीष्टान्॥त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयांति॥२९॥एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ॥
रूपैरनेकैर्बहुधात्ममूर्तिं कृत्वाऽम्बिके तत्प्रकरोति काऽन्या॥३०॥विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ॥ ममत्वगर्तेऽति
महान्धकारे विभ्रामयत्येतदतीव विश्वम् ॥३१॥रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो दस्युबलानि यत्र ॥ दावानलो यत्र तथाब्धिमध्ये तत्र
स्थिता त्वं परिपासि विश्वम्॥३२॥विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम्॥विश्वेशवंद्या भवती भवंति विश्वाश्रया
ये त्वयि भक्तिनम्राः॥३३॥ देवि प्रसीद परिपालय नोऽरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः॥ पापानि सर्वजगतां प्रशमं नयाशु उत्पात
पाकजनितांश्च महोपसर्गान् ॥३४॥ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ॥ त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव॥३५॥देव्यु
वाच ॥ ३६ ॥ वरदाहं सुरगणा वरं यं मनसेच्छथ ॥ तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥ ३७ ॥ देवा ऊचुः ॥ ३८ ॥ सर्वबाधा[1]
प्रशमनं त्रैलोक्यस्याखिलेश्वरि ॥ एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥ ३९ देव्युवाच ॥ ४० ॥ वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे
युगे ॥ शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ॥ ४१ ॥ नंदगोपगृहे जाता यशोदागर्भसंभवा ॥ ततस्तौ नाशयिष्यामि विंध्याचल
निवासिनी ॥ ४२ ॥ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य हनिष्यामि वैप्रचित्तांश्च दानवान् ॥ ४३ ॥ भक्षयंत्याश्च तानुग्रान्वै
प्रचित्तान्महासुरान् ॥ रक्ता दंता भविष्यंति दाडिमीकुसुमोपमाः ॥ ४४ ॥ ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥ स्तुवंतो
व्याहरिष्यंति सततं रक्तदंतिकाम् ॥ ४५ ॥ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि ॥ मुनिभिः संस्मृता भूयो संभविष्याम्ययोनिजा
॥ ४६ ॥ ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ॥ कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ॥४७॥ ततोऽहमखिलं लोकमात्म
देहसमुद्भवैः ॥ भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥४८ ॥ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि ॥ तत्रैव च वधिष्यामि ॥३९६॥
दुर्गमाख्यं महासुरम् ॥ ४९ ॥ दुर्गादेवीतिविख्यातं तन्मे नाम भविष्यति ॥ पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥ ५० ॥ रक्षांसि

१ सर्वाबाधाप्रशमनमित्यपि पाठो बहुषु पुस्तकेषु तथैव दृष्टत्वात् ।

भक्षयिष्यामि मुनीनां त्राणकारणात् ॥ तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥५१॥ भीमादेवीतिविख्यातं तन्मे नाम भविष्यति॥ यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥ ५२ ॥ तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदम् ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥ ५३ ॥ भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ ५४ ॥ तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥ ५५ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये देवैः कृता नारायणी स्तुतिर्नामैकादशोऽध्यायः ॥ ११ ॥ उवाच ॥ ४ ॥ अर्धम् ॥ १ ॥ श्लोकाः ॥ ५० ॥ एवम् ॥ ५५ ॥ एवमादितः ॥ ६३० ॥ देव्युवाच ॥१॥ एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥ तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥ २ ॥ मधुकैटभनाशं च महिषासुरघातनम् ॥ कीर्तयिष्यंति ये तद्वद्वधं शुंभनिशुंभयोः ॥ ३ ॥ अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥ श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥ ४ ॥ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चापदः ॥ भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥५॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः ॥ न शस्त्रानलतोयौघात्कदाचित्संभविष्यति ॥ ६ ॥ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः ॥ श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत् ॥ ७ ॥ उपसर्गानशेषांस्तु महामारीसमुद्भवान् ॥ तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥ ८ ॥ यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ॥ सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥ ९ ॥ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ॥ सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च ॥ १० ॥ जानताऽजानता वापि बलिपूजां तथा कृताम् ॥ प्रतीक्षिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥ ११॥ शरत्काले महापूजा क्रियते या च वार्षिकी ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥१२॥ सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ॥ मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥१३॥ श्रुत्वा ममैतन्माहात्म्यं तथाचोत्पत्तयः शुभाः ॥ पराक्रमं च युद्धेषु जायते निर्भयः पुमान् ॥ १४ ॥ रिपवः संक्षयं यांति कल्याणं चोपपद्यते ॥ नंदते च कुलं पुंसां माहात्म्यं मम शृण्वताम् ॥ १५ ॥ शांतिकर्माणि सर्वत्र तथा दुःस्वप्नदर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ १६ ॥ उपसर्गाः शमं यांति ग्रहपीडाश्च दारुणाः ॥

दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ १७ ॥ बालग्रहाभिभूतानां बालानां शांतिकारकम् ॥ संघातभेदे च नृणां मैत्रीकरणमुत्त
मम् ॥ १८ ॥ दुर्वृत्तानामशेषाणां बलहानिकरं परम् ॥ रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥ १९ ॥ सर्वं ममैतन्माहात्म्यं
मम सन्निधिकारकम् ॥ पशुपुष्पार्घधूपैश्च गंधदीपैस्तथोत्तमैः ॥ २० ॥ विप्राणां भोजनैर्होमैः प्रोक्षणीयरहर्निशम् ॥ अन्यैश्च विविधै
र्भोगैः प्रदानैर्वत्सरेण या ॥ २१ ॥ प्रीतिर्मे क्रियते साऽस्मिन्सकृदुच्चरिते श्रुते ॥ श्रुतं हरति पापानि तथारोग्यं प्रयच्छति ॥ २२ ॥ रक्षां
करोति भूतेभ्यो जन्मनां कीर्तनं मम ॥ युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम्॥२३॥ तस्मिन्श्रुते वैरिकृतं भयं पुंसां न जायते ॥ युष्माभिः
स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥२४॥ ब्रह्मणा च कृतास्तास्तु प्रयच्छंति शुभां मतिम् ॥ अरण्ये प्रांतरे वापि दावाग्निपरिवारितः॥
॥ २५ ॥ दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ॥ सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥२६॥ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो
बंधगतोऽपि वा ॥ आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥ २७ ॥ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे ॥ सर्वबाधासु घोरासु
वेदनाभ्यर्दितोऽपि वा ॥२८॥ स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् ॥ मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तदा॥२९॥ दूरादेव पलायंते
स्मरतश्चरितं मम ॥ ३० ॥ ऋषिरुवाच ॥ ३१ ॥ इत्युक्त्वा सा भगवती चंडिका चंडविक्रमा ॥ ३२ ॥ पश्यतामेव देवानां तत्रैवांतरधी
यत ॥ तेऽपि देवा निरातंकाः स्वाधिकारान्यथा पुरा ॥३३॥ यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ॥दैत्याश्च देव्या निहते शुंभे देवरिपौ
युधि ॥३४ ॥ जगद्विध्वंसके तस्मिन्महोग्रेऽतुलविक्रमे ॥ निशुंभे च महावीर्ये शेषाः पातालमाययुः ॥३५॥ एवं भगवती देवी सा नित्यापि
पुनः पुनः ॥ संभूय कुरुते भूप जगतः परिपालनम् ॥ ३६ ॥ तयैतन्मोह्यते विश्वं सैव विश्वं प्रसूयते ॥ सा याचिता च विज्ञानं तुष्टा
ऋद्धिं प्रयच्छति ॥ ३७ ॥ व्याप्तं तयैतत्सकलं ब्रह्मांडं मनुजेश्वर ॥ महाकाल्या महाकाले महामारीस्वरूपया ॥ ३८ ॥ सैव काले महा
मारी सैव सृष्टिर्भवत्यजा ॥ स्थितिं करोति भूतानां सैव काले सनातनी ॥ ३९ ॥ भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥ सैवाभावे
तथाऽलक्ष्मीर्विनाशायोपजायते ॥ ४० ॥ स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ॥ ददाति वित्तं पुत्रांश्च मतिं धर्मे गतिं शुभाम्॥ ४१॥

इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देव्याश्चरितमाहात्म्यं नाम द्वादशोऽध्यायः ॥ १२ ॥ उवाच ॥ २ ॥ अर्ध० ॥ २ ॥ श्लोकाः
॥ ३७ ॥ एवम् ॥ ४१ ॥ एवमादितः ॥ ६७१ ॥ ऋषिरुवाच ॥ १ ॥ एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ॥ एवंप्रभावा सा देवी
ययेदं धार्यते जगत् ॥ २ ॥ विद्या तथैव क्रियते भगवद्विष्णुमायया ॥ तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ॥ ३ ॥ मोह्यंते मोहिता
श्चैव मोहमेष्यंति चापरे ॥ तामुपैहि महाराज शरणं परमेश्वरीम् ॥ ४ ॥ आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥ ५ ॥ मार्कं
डेय उवाच ॥ ६ ॥ इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ॥ ७ ॥ प्रणिपत्य महाभागं तमृषिं शंसितव्रतम् ॥ निर्विण्णोऽति
ममत्वेन राज्यापहरणेन च ॥ ८ ॥ जगाम सद्यस्तपसे स च वैश्यो महामुने ॥ संदर्शनार्थमम्बाया नदीपुलिनमास्थितः
॥ ९ ॥ स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ १० ॥ अर्हणां चक्रतुस्तस्याः
पुष्पधूपाग्नितर्पणैः ॥ निराहारौ यताहारौ तन्मनस्कौ समाहितौ ॥ ११ ॥ ददतस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥ एवं समाराध
यतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ १२ ॥ परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडिका ॥ १३ ॥ देव्युवाच ॥ १४ ॥ यत्प्रार्थ्यते त्वया भूप त्वया च
कुलनंदन ॥१५॥ मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् ॥ १६ ॥ मार्कंडेय उवाच ॥१७॥ ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि
॥ १८ ॥ अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥ सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ॥ १९ ॥ ममेत्यहमिति प्राज्ञः
संगविच्युतिकारकम् ॥ २० ॥ देव्युवाच ॥ २१ ॥ स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ॥ २२ हत्वारिपूनस्खलितं तव तत्र
भविष्यति ॥ मृतश्च भूयः संप्राप्य जन्म देवाद्विवस्वतः ॥ २३ ॥ सावर्णिको मनुर्नाम भवान्भुवि भविष्यति ॥ वैश्यवर्य त्वया यश्च
वरोऽस्मत्तोऽभिवांछितः ॥ २४ ॥ तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥ २५ ॥ मार्कंडेय उवाच ॥ २६ ॥ इति दत्त्वा तयोर्देवी
यथाभिलषितं वरम् ॥ २७ ॥ बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥ एवं देव्यावरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ २८ ॥
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ २९ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरेदेवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं

नाम त्रयोदशोऽध्यायः ॥ १३ ॥ उवाच ॥ ६ ॥ अर्धानि ॥ ११ ॥ श्लोकाः ॥ १२ ॥ एवम् ॥ २९ ॥ एवमादितः ॥ ७०० ॥ अथोत्तर
न्यासाः ॥ खड्गिनी शूलिनी घोरा० हृदयाय नमः ॥ शूलेन पाहिनो देवि० शिरसे स्वाहा ॥ प्राच्यां रक्ष प्रतीच्यां च० शिखायै वषट् ॥
सौम्यानि यानि रूपाणि० कवचाय हुम् ॥ खड्गशूलगदादीनि० नेत्रत्रयाय वौषट् । सर्वस्वरूपे सर्वेशे० अस्त्राय फट् ॥ अथ ध्यानम् ।
विद्युद्दामसमप्रभां मृगपतिस्कंधस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥ हस्तैश्चक्रदरालिखेट विशिखांश्चापं
गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ १ ॥ अथ देवीसूक्तम् ॥ ॥ नमो देव्यै महादेव्यै शिवायै सततं नमः॥
नमः प्रकृत्यै भद्रायै नियताः प्रणता स्म ताम् ॥ १ ॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः ॥ ज्योत्स्नायै चेंदुरूपिण्यै सुखायै
सततं नमः॥२॥ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः ॥ नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः॥३॥दुर्गायै दुर्गपारायै
सारायै सर्वकारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥४॥ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः॥ नमो जगत्प्रतिष्ठायै
देव्यै कृत्यै नमो नमः॥ ५ ॥ या देवी सर्वभूतेषु विष्णुमायेतिशब्दिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ६ ॥ या देवी
सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ७ ॥ या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै
नमस्तस्यै नमस्तस्यै नमो नमः ॥ ८ ॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ९ ॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥ या देवी सर्वभूतेषु च्छायारूपेण संस्थिता॥
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥११॥ या देवी सर्वभूतेषु शक्तिरूपेणसंस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः
॥ १२ ॥ या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥ या देवी सर्वभूतेषु शांतिरूपेण
संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥ या देवी सर्वभूतेषु जातिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै
नमो नमः॥१५॥ या देवी सर्वभूतेषु लज्जारूपेण संस्थिता॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥१६॥या देवी सर्वभूतेषु शांतिरूपेण

संस्थिता॥नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥१७॥ या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता॥नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥ या देवी सर्वभूतेषु कांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥१९॥ या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥२०॥या देवी सर्वभूतेषु वृत्तिरूपेण संस्थिता॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥२१॥या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २२ ॥ या देवी सर्वभूतेषु दयारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३ ॥ या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २४ ॥ या देवी सर्वभूतेषु मातृरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २५ ॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६ ॥ इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥ भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः ॥ २७ ॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २८ ॥ स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रेण दिनेषु सेविता ॥ करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः ॥ २९ ॥ या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ३० ॥ इति देवीसूक्तं पठित्वाऽष्टोत्तरशतं नवार्णजपं कृत्वा तदुत्तरन्यासान्विधाय " गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ॥ ३१ ॥ इति देव्या वामहस्ते जपं निवेदयेत् ॥ श्रीगणपतिर्जयति ॥ अस्य श्रीसप्तशतीरहस्यत्रयस्य नारायणऋषिः ॥ अनुष्टुप् छन्दः ॥ महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः ॥ यथोक्तफलावाप्त्यर्थं जपे विनियोगः ॥ राजोवाच ॥ भगवन्नवतारा मे चंडिकायास्त्वयोदिताः ॥ एतेषां प्रकृतिं ब्रह्मन्प्रधानं वक्तुमर्हसि ॥ १ ॥ आराध्यं यन्मया देव्याः स्वरूपं येन तद्द्विज ॥ विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे ॥ २ ॥ ऋषिरुवाच ॥ ॥ इदं रहस्यं परममनाख्येयं प्रचक्षते ॥ भक्तोऽसीति न मे किंचित्तवावाच्यं नराधिप ॥ ३ ॥ सर्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ॥ लक्ष्यालक्ष्य

स्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥४॥ मातुलिंगं गदां खेटं पानपात्रं च बिभ्रती ॥ नागं लिंगं च योनिं च बिभ्रती नृपभूर्धनि ॥५॥
तप्तकांचनवर्णाभा तप्तकांचनभूषणा ॥ शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥ ६ ॥ शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ॥
बभार रूपमपरं तमसा केवलेन हि ॥ ७ ॥ सा भिन्नांजनसंकाशा दंष्ट्रांचितवरानना ॥ विशाललोचना नारी बभूव तनुमध्यमा ॥
॥ ८ ॥ खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥ कबंधहारं शिरसा बिभ्राणाहिशिरःस्रजम् ॥ ९ ॥ सा प्रोवाच महालक्ष्मीं तामसी
प्रमदोत्तमा ॥ नाम कर्म च मे मातर्देहि तुभ्यं नमो नमः ॥ १० ॥ तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ॥ ददामि तव नामानि
यानि कर्माणि तानि च॥११॥महामाया महाकाली महामारी क्षुधा तृषा ॥ निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया ॥१२॥ इमानि तव
नामानि प्रतिपाद्यानि कर्मभिः॥ एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् ॥ १३ ॥ तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप ॥
सत्त्वाख्येनातिशुद्धेन गुणेनेंदुप्रभं दधौ ॥ १४ ॥ अक्षमालांकुशधरा वीणापुस्तकधारिणी ॥ सा बभूव वरा नारी नामान्य
स्यै च सा ददौ ॥ १५ ॥ महाविद्या महावाणी भारती वाक्सरस्वती ॥ आर्या ब्राह्मी कामधेनुर्वेदगर्भा च धीश्वरी ॥ १६ ॥ अथो
वाच महालक्ष्मीर्महाकालीं सरस्वतीम् ॥ युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ॥ १७ ॥ इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं
स्वयम् ॥ हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥ १८ ॥ ब्रह्मन्विधे विरंचेति धातरित्याह तं नरम् ॥ श्रीः पद्मे कमले लक्ष्मीत्याह
माता स्त्रियं च ताम् ॥ १९ ॥ महाकाली भारती च मिथुने सृजतः सह ॥ एतयोरपि रूपाणि नामानि च वदामि ते ॥ २० ॥ नील
कंठं रक्तबाहुं श्वेतांगं चन्द्रशेखरम् ॥ जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥ २१ ॥ स रुद्रः शंकरः स्थाणुः कपर्दी च
त्रिलोचनः ॥ त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा ॥ २२ ॥ सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप ॥ जनयामास
नामानि तयोरपि वदामि ते ॥ २३ ॥ विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ॥ उमा गौरी सती चंडी सुन्दरी सुभगा शुभा
॥ २४ ॥ एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ॥ चक्षुष्मंतोऽनुपश्यंति नेतरेऽतद्विदो जनाः ॥ २५ ॥ ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप

त्रयीम्॥ रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥ २६ ॥ स्वरया सह संभूय विरंचोऽण्डमजीजनत् ॥ बिभेद भगवान्रुद्रस्तद्गौर्या सह वीर्यवान् ॥ २७ ॥ अंडमध्ये प्रधानादिकार्यजातमभून्नृप॥ महाभूतात्मकं सर्वं जगत्स्थावरजंगमम् ॥२८॥ पुपोष पालयामास तल्लक्ष्म्या सह केशवः ॥ संजहार जगत्सर्वं सह गौर्या महेश्वरः ॥२९॥ महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी ॥ निराकारा च साकारा सैव नाना भिधानभृत् ॥ ३० ॥ नामांतरैर्निरूप्यैषा नाम्ना नान्येन केनचित् ॥ ३१ ॥ इति प्राधानिकं रहस्यं समाप्तम् ॥ ॥ ऋषिरुवाच ॥ त्रिगुणा तामसी देवी सात्विकी या त्वयोदिता॥सा शर्वा चंडिका दुर्गा भद्रा भगवतीर्यते॥१॥योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ॥ मधुकैटभनाशार्थं यां तुष्टावांबुजासनः ॥ २ ॥ दशवक्त्रा दशभुजा दशपादांजनप्रभा॥विशालया राजमाना त्रिंशल्लोचनमालया॥३॥स्फुर द्दशनदंष्ट्रा सा भीमरूपापि भूमिप ॥ रूपसौभाग्यकांतीनां सा प्रतिष्ठा महाश्रियाम् ॥ ४ ॥ खड्गबाणगदाशूलशंखचक्रभुशुंडिभृत्॥परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ॥५॥ एषा सा वैष्णवी माया महाकाली दुरत्यया । आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम्॥६॥सर्व देवशरीरेभ्यो याविर्भूतामितप्रभा॥त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी॥७॥श्वेतानना नीलभुजा सुश्वेतस्तनमंडला॥ रक्तमध्या रक्तपादा नीलजंघोरुरुन्मदा ॥ ८ ॥ सुचित्रजघना चित्रमाल्यांबरविभूषणा ॥ चित्रानुलेपना कांतिरूपसौभाग्यशालिनी ॥ ९ ॥ अष्टादश भुजा पूज्या सा सहस्रभुजा सती ॥ आयुधान्यत्र वक्ष्यंते दक्षिणाधःकरक्रमात्॥१०॥ अक्षमाला च कमलं बाणोऽसिः कलिशं गदा॥चक्रं त्रिशूलं परशुः शंखो घंटा च पाशकः ॥ ११ ॥ शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलुः ॥ अलंकृतभजामेभिरायुधैः कमलासनाम्॥१२॥सर्व देवमयीमीशां महालक्ष्मीमिमां नृप ॥ पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् ॥१३ ॥ गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥साक्षा त्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी ॥ १४॥ दधौ चाष्टभुजा बाणान्मुसलं शूलचक्रभृत् ॥ शंखं घंटां लांगलं च कार्मुकं वसुधाधिप॥१५॥ एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति॥ निशुंभमथिनी देवी शुंभासुरनिबर्हिणी॥ १६॥इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव॥उपा सनं जगन्मातुः पृथगासां निशामय ॥ १७ ॥ महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥ दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् ॥

॥ १८ ॥ विरंचिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे॥वामे लक्ष्म्या हृषीकेशः पुरतो देवतात्रयम् ॥१९ ॥ अष्टादशभुजा मध्ये वामे चास्या
दशानना ॥ दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समर्चयेत् ॥२०॥ पूर्वादिदलतः पूज्या असितांगादिभैरवाः ॥ अष्टादशभुजा चैषा यदा पूज्या
नराधिप ॥ २१ ॥ दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा ॥ दशानना यदा पूज्या दक्षिणोत्तरयोस्तदा ॥ २२ ॥ कालमृत्यू च संपूज्यौ
सर्वारिष्टप्रशांतये ॥ यदा चाष्टभुजा पूज्या शुंभासुरनिबर्हिणी॥२३॥ नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ ॥ नमो देव्या इतिस्तोत्रै
र्महालक्ष्मीं समर्चयेत् ॥२४॥ अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः॥अष्टादशभुजा चैषा पूज्या महिषमर्दिनी॥२५॥महालक्ष्मीर्महाकाली
सैव प्रोक्ता सरस्वती॥ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी ॥२६॥ महिषांतकरी येन पूजिता स जगत्प्रभुः ॥ पूजयेज्जगतां धात्रीं चण्डि
कां भक्तवत्सलाम् ॥ २७ ॥ अर्घादिभिरलंकारैर्गंधपुष्पैस्तथोत्तमैः ॥ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥ २८ ॥ रुधिराक्तेन बलिना
मांसेन सुरया नृप ॥ बलिमांसादिपूजेयं विप्रवर्ज्या मयेरिता ॥२९॥ तेषां किल सुरामांसैर्नोक्ता पूजा नृप क्वचित् ॥ प्रणामाचमनीयैश्च
चंदनेन सुगंधिना ॥ ३० ॥ सकर्पूरैश्च तांबूलैर्भक्तिभावसमन्वितैः ॥ वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥ ३१ ॥ पूजयेन्महिषं
येन प्राप्तं सायुज्यमीशया ॥ दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥ ३२ ॥ वाहनं पूजयेद्देव्या धृतं येन चराचरम् ॥ ततः कृतांजलि
र्भूत्वा स्तुवीत चरितैरिमैः ॥ ३३ ॥ एकेन वा मध्यमेन नैकेनेतरयोरिह ॥ चरितार्धं तु न जपेज्जपञ्छिद्रमवाप्नुयात् ॥ ३४ ॥ स्तोत्रमंत्रैः
स्तुवीतेमां यदि वा जगदंबिकाम् ॥ प्रदक्षिणा नमस्कारान्कृत्वा मूर्ध्नि कृतांजलिः ॥ ३५ ॥ क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतंद्रितः ॥ प्रति
श्लोकं च जुहुयात्पायसं तिलसर्पिषा ॥ ३६ ॥ जुहुयात्स्तोत्रमंत्रैर्वा चंडिकायै शुभं हविः ॥ भूयो नामपदैर्देवीं पूजयेत्सुसमाहितः
॥ ३७ ॥ प्रयतः प्रांजलिः प्रह्वः प्राणानारोप्य चात्मनि ॥ सुचिरं भावयेद्देवीं चंडिकां तन्मयो भवेत् ॥ ३८ ॥ एवं यः पूजयेद्भक्त्या
प्रत्यहं परमेश्वरीम् ॥ भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् ॥ ३९ ॥ यो न पूजयते नित्यं चंडिकां भक्तवत्सलाम् ॥ भस्मी
कृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ॥४०॥ तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ॥ यथोक्तेन विधानेन चंडिकां सुखमाप्स्यसि ॥ ४१ ॥

इति वैकृतिकं रहस्यं समाप्तम् ॥ ऋषिरुवाच ॥ नंदा भगवती नाम या भविष्यति नंदजा ॥ स्तुता संपूजिता भक्त्या वशीकुर्याज्जगत्त्रयम् ॥ १ ॥ कनकोत्तमकांतिः सा सुकांतिः कनकांबरा ॥ देवी कनकवर्णाभा कनकोत्तमभूषणा ॥ २ ॥ कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा ॥ इंदिरा कमला लक्ष्मीः सा श्रीरुक्मांबुजासना ॥ ३ ॥ या रक्तदंतिका नाम देवी प्रोक्ता मयानघ ॥ तस्याः स्वरूपं वक्ष्यामि शृण सर्वभयापहम् ॥ ४ ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ रक्तांबरा रक्तवर्णा रक्तसर्वांगभूषणा ॥ ५ ॥ रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥ रक्ततीक्ष्णनखा रक्तरसना रक्तदंतिका ॥ ६ ॥ पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम् ॥ वसुधेव विशाला सा सुमेरुयुगलस्तनी ॥ ७ ॥ दीर्घौ लंबावतिस्थूलौ तावतीव मनोहरौ ॥ कर्कशावतिकांतौ तौ सर्वानंदपयोनिधी ॥ ८ ॥ भक्तान्संपाययेद्देवी सर्वकामदुघौ स्तनौ ॥ खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा ॥ ९ ॥ आख्याता रक्तचामुंडा देवी योगेश्वरीति च ॥ अनया व्याप्तमखिलं जगत्स्थावरजंगमम् ॥१०॥ इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥ भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् ॥११॥ अधीते य इमं नित्यं रक्तदंत्या वपुः स्तवम् ॥ तं सा परिचरेद्देवी पतिं प्रियमिवांगना ॥१२॥ शाकंभरी नीलवर्णा नीलोत्पलविलोचना ॥ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी ॥ १३ ॥ सुकर्कशसमोत्तुंगवृत्तपीनघनस्तनी ॥ मुष्टौ शिलीमुखापूर्णं कमलं कमलालया ॥ १४ ॥ पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयम् ॥ काम्यानंतरसैर्युक्तं क्षुत्तृण्मृत्युजरापहम् ॥ १५ ॥ कार्मुकं च स्फुरत्कांति बिभर्ति परमेश्वरी ॥ शाकंभरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥१६॥ उमा गौरी सती चण्डी कालिका सा च पार्वती ॥ शाकंभरीं स्तुवन्ध्यायञ्जपन्संपूजयन्नमन् ॥ ॥ १७ ॥ अक्षय्यमश्नुते शीघ्रमन्नपानामृतं जलम् ॥ भीमाऽपि नीलवर्णा सा दंष्ट्रादशनभासुरा ॥ १८ ॥ विशाललोचना नारी वृत्तपीनपयोधरा ॥ चंद्रहासं च डमरुं शिरः पात्रं च बिभ्रती ॥ १९ ॥ एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥ तेजोमंडलदुर्धर्षा भ्रामरी चित्रकांतिभृत् ॥ २० ॥ चित्रभ्रमरसंकाशा महामारीति गीयते ॥ इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप ॥ २१ ॥ जगन्मातुश्चंडिकायाः कीर्तिताः कामधेनवः ॥ इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥ २२ ॥ व्याख्यानं दिव्यमूर्तीनामधीष्वावाहितः

स्वयम् ॥ एतस्यास्त्वं प्रसादेन सर्वमान्यो भविष्यसि ॥२३॥ सर्वरूपमयी देवी सर्वं देवीमयं जगत् ॥ अतोऽहं विश्वरूपां त्वां नमामि परमेश्वरीम् ॥ २४ ॥ इति मूर्तिरहस्यं समाप्तम् ॥ ॥ श्रीजगदंबार्पणमस्तु ॥

॥ श्रीगणेशाय नमः ॥ अथ दुर्गाष्टाक्षरकवचम् ॥ उक्तं च देवीरहस्यतंत्रे तत्रैवाष्टचत्वारिंशत्तमे पटले ॥ श्रीभैरव उवाच ॥ " अधुना देवि वक्ष्येऽहं कवचं मंत्रगर्भकम् ॥ दुर्गायाः सारसर्वस्वं कवचेश्वरसंज्ञकम् ॥ १ ॥ परमार्थप्रदं नित्यं महापातकनाशनम् ॥ योगिप्रियं योगिगम्यं देवानामपि दुर्लभम् ॥२॥ विना दानेन मंत्रस्य सिद्धिर्देवि कलौ भवेत् ॥ धारणादस्य देवेशि शिवस्त्रैलोक्यनायकः ॥ ३ ॥ भैरवी भैरवेशानी विष्णुर्नारायणो बली । ब्रह्मा पार्वति लोकेशो विघ्नध्वंसी गजाननः ॥ ४ ॥ सेनानीश्च महासेनो जिष्णुर्लेखर्षभः प्रिये ॥ सूर्यस्तमोऽपहो लोके चन्द्रोऽमृतविधिस्तथा ॥ ५ ॥ बहुनोक्तेन किं देवि दुर्गाकवचधारणात् ॥ मर्त्योऽप्यमरतां याति साधको मंत्रसाधकः ॥ ६ ॥ कवचस्यास्य देवेशि ऋषिः प्रोक्तो महेश्वरः ॥ छंदोऽनुष्टुप् प्रिये दुर्गा देवताऽष्टाक्षरा स्मृता ॥ चक्रिबीजं च बीजं स्यान्मायाशक्तिरितीरिता ॥ ७ ॥ अथ पाठः ॥ ॐ मे पातु शिरो दुर्गा ह्रीं मे पातु ललाटकम् ॥ दुं नेत्रेऽष्टाक्षरा पातु चक्री पातु श्रुती मम ॥ ८ ॥ मं ठं गंडौ च मे पातु देवेशी रक्तकुंडला ॥ वायुर्नासां सदा पातु रक्तबीजनिषूदिनी ॥ ९ ॥ लवणं पातु मे चौष्ठौ चामुंडा चंडघातिनी ॥ भेकी बीजं सदा पातु दंतान्मे रक्तदंतिका ॥ १० ॥ ॐ ह्रीं श्रीं पातु मे कंठं नीलकंठांकवासिनी ॥ ॐ ऐं क्लीं पातु मे स्कंधौ स्कंदमाता महेश्वरी ॥ ११ ॥ ॐ सौः क्लीं मे पातु बाहू देवेशी बगलामुखी ॥ ऐं श्रीं ह्रीं पातु मे हस्तौ शिवाशतनिनादिनी ॥ १२ ॥ सौः ऐं ह्रीं पातु मे वक्षो देवता विंध्यवासिनी ॥ ॐ ह्रीं श्रीं क्लीं पातु कुक्षिं मम मातंगिनी परा ॥ १३ ॥ ॐ ह्रीं ऐं पातु मे पार्श्वे हिमाचलनिवासिनी ॥ ॐ स्त्रीं हूं ऐं पातु पृष्ठं मम दुर्गातिनाशिनी ॥ १४ ॥ ॐ क्रीं हुं पातु मे नाभिं देवी नारायणी सदा ॥ ॐ ऐं क्लीं सौः सदा पातु कटिं कात्यायनी मम ॥ १५ ॥ ॐ ह्रीं श्रीं पातु शिश्नं मे देवी श्रीबगलामुखी ॥ ऐं सौः क्लीं सौः पातु गह्यं गुह्यकेश्वरपूजिता ॥ १६ ॥ ॐ ह्रीं ऐं श्रीं ह सौः पायादूरू मम मनोन्मनी ॥

ॐ जूं सः सौ जानु पातु जगदीश्वरपूजिता ॥ १७ ॥ ॐ ऐं क्लीं पातु मे जंघे मेरुपर्वतवासिनी ॥ ॐ ह्रीं श्रीं गीं सदा पातु गुल्फौ मम गणेश्वरी ॥ १८ ॥ ॐ ह्रीं दुं पातु मे पादौ पार्वती षोडशाक्षरी ॥ पूर्वे मां पातु ब्रह्माणी वह्नौ पातु च वैष्णवी ॥ १९ ॥ दक्षिणे चंडिका पातु नैर्ऋत्ये नारसिंहिका ॥ पश्चिमे पातु वाराही वायव्ये मापराजिता ॥ २० ॥ उत्तरे पातु कौमारी चैशान्यां शांभवी तथा ॥ ऊर्ध्वं दुर्गा सदा पातु पात्वधस्ताच्छिवा सदा ॥ २१ ॥ प्रभाते त्रिपुरा पातु निशीथे छिन्नमस्तका ॥ निशांते भैरवी पातु सर्वदा भद्रकालिका ॥ २२ ॥ अग्नेरंबा च मां पातु जलान्मां जगदंबिका ॥ वायोर्मां पातु वाग्देवी वनाद्वनजलोचना ॥ २३ ॥ सिंहात्सिंहासना पातु सर्पात्सर्पांतकासना ॥ रोगान्मां राजमातंगी भूताद्भूतेशवल्लभा ॥ २४ ॥ यक्षेभ्यो यक्षिणी पातु रक्षोभ्यो राक्षसांतका ॥ भूतप्रेतपिशाचेभ्यः सुमुखी पातु मां सदा ॥ २५ ॥ सर्वत्र सर्वदा पातु ॐ ह्रीं दुर्गा नवाक्षरा ॥ इत्येवं कवचं गुह्यं दुर्गासर्वस्वमुत्तमम् ॥ २६ ॥ मंत्रगर्भं महेशानि कवचेश्वरसंज्ञकम् ॥ वित्तदं पुण्यदं पुण्यं वर्म सिद्धिप्रदं कलौ ॥ २७ ॥ वर्म सिद्धिप्रदं गोप्यं परात्पररहस्यकम् ॥ श्रेयस्करं मनुमयं रोगनाशकरं परम् ॥ २८ ॥ महापातककोटिघ्नं मानदं च यशस्करम् ॥ अश्वमेधसहस्रस्य फलदं परमार्थदम् ॥ २९ ॥ अत्यंतगोप्यं देवेशि कवचं मंत्रसिद्धिदम् ॥ पठनात्सिद्धिदं लोके धारणान्मुक्तिदं शिवे ॥ ३० ॥ रवौ भूर्जे लिखेद्धीमान्कृत्वा कर्माह्निकं प्रिये ॥ श्रीचक्रांगेऽष्टगंधेन साधको मंत्रसिद्धये ॥ ३१ ॥ लिखित्वा धारयेद्बाहौ गुटिकां पुण्यवर्धिनीम् ॥ किं किं न साधयेल्लोके गुटिका वर्मणोऽचिरात्॥३२॥गुटिकां धारयन्मूर्ध्नि राजानं वशमानयेत् ॥ धनार्थी धारयेत्कंठे पुत्रार्थी कुक्षिमंडले ॥ ३३ ॥ तामेवं धारयेन्मूर्ध्नि लिखित्वा भूर्जपत्रके ॥ श्वेतसूत्रेण संवेष्ट्य लाक्षया परिवेष्टयेत् ॥ ३४ ॥ सवर्णेनाथ संवेष्ट्य धारयेद्रक्तरज्जुना ॥ गुटिका कामदा देवि देवानामपि दुर्लभा ॥३५॥ कवचस्यास्य गुटिकां धृत्वा मुक्तिप्रदायिनीम्॥कवचस्यास्य देवेशि गणितुं नैव शक्यते ॥ ३६ ॥ महिमा वै महादेवि जिह्वाकोटिशतैरपि ॥ अदातव्यमिदं वर्म मन्त्रगर्भं रहस्यकम् ॥ ३७ ॥ अवक्तव्यं महापुण्यं सर्वसारस्वतप्रदम् ॥ अदीक्षिताय नो दद्यात्कुचैलाय दुरात्मने ॥ ३८ ॥ अन्यशिष्याय दुष्टाय निंदकाय कुलार्थिनाम् ॥ दीक्षिताय कुलीनाय गुरु

भक्तिरताय च ॥ ३९ ॥ शांताय कुलशान्ताय शाक्ताय कुलवासिने ॥ इदं वर्म शिवे दद्यात्कुलभागी भवेन्नरः ॥ ४० ॥ इदं रहस्यं परमं दुर्गाकवचमुत्तमम् ॥ गुह्यं गोप्यतमं गोप्यं गोपनीयं स्वयोनिवत्" ॥ ४१ ॥ इति श्रीदेवीरहस्यतन्त्रोक्तं श्रीदुर्गाकवचं समाप्तम् ॥ ॥ अथ ब्रह्मांडमोहनाख्यं दुर्गाकवचम् ॥ ब्रह्मवैवर्तपुराणे ॥ नारद उवाच ॥ "भगवन्सर्वधर्मज्ञ सर्वज्ञानविशारद ॥ ब्रह्मांडमोहनं नाम प्रकृतेः कवचं वद ॥ १ ॥ नारायण उवाच ॥ शृणु वक्ष्यामि हे वत्स कवचं च सुदुर्लभम् ॥ श्रीकृष्णेनैव कथितं कृपया ब्रह्मणे पुरा ॥ ॥ २ ॥ ब्रह्मणा कथितं पूर्वं धर्माय जाह्नवीतटे ॥ धर्मेण दत्तं मह्यं च कृपया पुष्करे पुरा ॥ ३ ॥ त्रिपुरारिश्च यद्धृत्वा जघान त्रिपुरं पुरा ॥ ममोच ब्रह्मा यद्धृत्वा मधुकैटभयोर्भयात् ॥ ४ ॥ संजहार रक्तबीजं यद्धृत्वा भद्रकालिका । यद्धृत्वा हि महेंद्रश्च संप्राप कमलालयाम् ॥ ५ ॥ यद्धृत्वा च महायोद्धा बाणः शत्रुभयंकरः ॥ यद्धृत्वा शिवतुल्यश्च दुर्वासा ज्ञानिनां वरः ॥ ६ ॥ ॐ दुर्गेति चतुर्थ्यंतः स्वाहांतो मे शिरोऽवतु ॥ मंत्रः षडक्षरोऽयं च भक्तानां कल्पपादपः ॥ ७ ॥ विचारो नास्ति वेदे च ग्रहणेऽस्य मनोर्मुने ॥ मंत्रग्रहणमात्रेण विष्णुतुल्यो भवेन्नरः ॥ ८ ॥ मम वक्त्रं सदा पातु ॐ दुर्गायै नमोंऽतकः ॥ ॐ दुर्गे इति कंठं तु मन्त्रः पातु सदा मम ॥ ९ ॥ ॐ ह्रीं श्रीमिति मन्त्रोऽयं स्कंधं पातु निरंतरम् ॥ ह्रीं श्रीं क्लीमिति पृष्ठं च पातु मे सर्वतः सदा ॥ १० ॥ ह्रीं मे वक्षस्थले पातु हं सं श्रीमिति संततम् ॥ ऐं श्रीं ह्रीं पातु सर्वांगं स्वप्ने जागरणे सदा ॥ ११ ॥ प्राच्यां मां पातु प्रकृतिः पातु वह्नौ च चंडिका ॥ दक्षिणे भद्रकाली च नैर्ऋत्यां च महेश्वरी ॥ १२ ॥ वारुण्यां पातु वाराही वायव्यां सर्वमंगला ॥ उत्तरे वैष्णवी पातु तथैशान्यां शिवप्रिया ॥ १३ ॥ जले स्थले चांतरिक्षे पातु मां जगदंबिका ॥ इति ते कथितं वत्स कवचं च सुदुर्लभम् ॥ १४ ॥ यस्मै कस्मै न दातव्यं प्रवक्तव्यं न कस्यचित् ॥ गुरुमभ्यर्च्य विधिवद्वस्त्रालंकारचन्दनैः ॥ १५ ॥ कवचं धारयेद्यस्तु सोऽपि विष्णुर्न संशयः ॥ स्नाने च सर्वतीर्थानां पृथिव्याश्च प्रदक्षिणे ॥ १६ ॥ यत्फलं लभते लोकस्तदेतद्धारणे मुने ॥ पंचलक्षजपेनैव सिद्धमेतद्भवेद्ध्रुवम् ॥ १७ ॥ लोके च सिद्धकवचो नावसीदति संकटे ॥ न तस्य मृत्युर्भवति जले वह्नौ विषे ज्वरे ॥ १८ ॥ जीवन्मुक्तो

भवेत्सोऽपि सर्वसिद्धीश्वरीश्वारि ॥ यदि स्यात्सिद्धकवचो विष्णुतुल्यो भवेद्ध्रुवम् " ॥ १९ ॥ इति श्रीब्रह्मवैवर्ते प्रकृतिखंडांतर्गतदुर्गा कवचं समाप्तम् ॥ अथ दुर्गाकवचम् ॥ कुब्जिकातंत्रे ॥ ईश्वर उवाच ॥ "शृणु देवि प्रवक्ष्यामि कवचं सर्वसिद्धिदम्॥पठित्वा पाठयित्वा च नरो मुच्येत संकटात् ॥ १ ॥ अज्ञात्वा कवचं देवि दुर्गामंत्रं च यो जपेत् ॥ स नाप्नोति फलं तस्य परत्र नरकं व्रजेत् ॥ २ ॥ उमा देवी शिरः पातु ललाटं शूलधारिणी ॥ चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी ॥ ३ ॥ सुगंधा नासिके पातु वदनं सर्व धारिणी ॥ जिह्वां च चंडिका देवी ग्रीवां सौभद्रिका तथा ॥ ४ ॥ अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी ॥ हृदयं ललिता देवी उदरं सिंहवाहिनी ॥ ५ ॥ कटिं भगवती देवी द्वावूरू विंध्यवासिनी ॥ महाबला च जंघे द्वे पादौ भूतलवासिनी ॥ ६ ॥ एवं स्थितासि देवि त्वं त्रैलोक्यरक्षणात्मिके ॥ रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोऽस्तु ते "॥ ७ ॥ इति कुब्जिकातंत्रोक्तं दुर्गाकवचं समाप्तम् ॥ अथ दुर्गाष्टाक्षरसहस्रनामप्रारंभः ॥ उक्तं च देवीरहस्यतंत्रे चैकोनपंचाशत्तमे पटले ॥ भैरव उवाच ॥ " अधुना शृणु वक्ष्यामि दुर्गासर्वस्वमीश्वरि ॥ रहस्यं सर्वदेवानां दुर्लभं यमिनामपि ॥ १ ॥ श्रीदुर्गातत्त्वमुद्दिष्टं सारं त्रैलोक्यकारणम् ॥ मंत्रनामसहस्रं च दुर्गायाः पुण्यदं परम् ॥ २ ॥ यत्पठित्वा शिवे धृत्वा देवीनामसहस्रकम् ॥ अश्वमेधायुतं पुण्यं लोके सौभाग्यवर्धनम् ॥ ३ ॥ श्रेयस्करं विश्वत्रंयं सर्वदेवनमस्कृतम् ॥ गुह्यं गोप्यतमं देवि पठनात्सिद्धिदायकम् ॥ ४ ॥ ॐ अस्य श्रीदुर्गानामसहस्रस्य श्रीमहेश्वर ऋषिरनुष्टुप्छंदः श्रीदुर्गा देवता दुं बीजं ह्रीं शक्तिः ॐ कीलकं धर्मार्थकाममोक्षार्थे सहस्रनामपाठे विनियोगः ॥ ॐ महेश्वरऋषये नमः शिरसि १ ॥ अनुष्टुप्छंदसे नमो मुखे २ ॥ श्रीदुर्गादेवतायै नमो हृदि ३ ॥ दुं बीजाय नमो नाभौ ४ ॥ ह्रीं शक्तये नमो मुखे ५ ॥ ॐ कीलकाय नमः पादयोः ६ ॥ विनियोगाय नमः सर्वांगे ७ ॥ ॐ ह्रीं दुर्गा जगन्माता भद्रिका भद्रकालिका ॥ प्रचंडा चंडिका चंडी चंडमुंडनिषूदिनी ॥ ५ ॥ अनसूया त्रुटिस्तारा कृत्तिका कुब्जकालया ॥ प्रलयस्थितिसंभूतिविभूतिर्भयनाशिनी ॥ ६ ॥ महामाया महाविद्या मूलविद्या चिदीश्वरी ॥ मदालसा मदोत्तुंगा मदिरा मदनप्रिया ॥ ७ ॥ अलिव्यालप्रसूः पुण्या पवित्रा परमेश्वरी ॥

आदिदेवी कला कांता त्रिपुरा जगदीश्वरी ॥ ८ ॥ मनोन्मनी महालक्ष्मीः सिद्धलक्ष्मी सरस्वती ॥ सरित्कादंबरी गोधा गुह्यकाली गणेश्वरी ॥ ९ ॥ गणांबिका जया तापी तपना तापहारिणी ॥ तपोमयी दुरालंभा दुष्टग्रहनिवारिणी ॥ १० ॥ दुःखघ्नी सुखदा माध्वी परमामृतसूः सुरा ॥ सुधा सुधांशुनिलया प्रलयानलसन्निभा ॥ ११ ॥ समस्तसंपदंभोजविलया कलिकालया ॥ विद्येश्वरी विश्वमयी विराट्छंदोगतिर्मतिः ॥ १२ ॥ धृतिश्च दांभिकी दोला लोपामुद्रा पटीयसी ॥ गरिष्ठारिष्टहा दुष्टा कृशा काशी कुलाकुला ॥ १३ ॥ अकुलस्था पदन्यासा न्यासरूपा विरूपिणी ॥ विरूपाक्षी कोटराक्षी कुलकांतापराजिता ॥ १४ ॥ अजिता कुलिका लंपा लंपटा त्रिपुरेश्वरी ॥ त्रितयी वेदविन्यासा संन्यासा सुमतिर्भया ॥ १५ ॥ अभया स्वर्मुखी देवी महौषधिरलंबुषा ॥ चपला चंडिका चंडी चंडमुंडनिषूदिनी ॥ १६ ॥ चपलाक्षी मदाविष्टा मदिरारुणलोचना ॥ पुरी त्रिपुरसूराद्या रमा रामा मनोरमा ॥ १७ ॥ संध्या संध्याभ्रशीला च शाला श्यामपयोधरा ॥ शशांकमुकुटा श्यामा सुरा सुंदरलोचना ॥ १८ ॥ विषमाक्षी विशालाक्षी वशा वागीश्वरी शिला ॥ मनःशिला च कस्तूरी मृगनाभिर्मृगेक्षणा ॥ १९ ॥ मृगारिवाहना साध्वी मानदा मत्तभाषिणी ॥ नारसिंही वामदेवी वामा वामश्रुतिप्रिया ॥२० ॥ पुण्या पुण्यगतिः पुण्या पुत्री पुण्यजनप्रिया ॥ चामुंडा चोग्रमुंडा च महाचंडतमा उमा ॥ २१ ॥ तमस्विनी प्रभा ज्योत्स्ना महाज्योतिःस्वरूपिणी ॥ स्वरूपा सद्गतिः साध्वी सदसद्रूपराजिता ॥ २२ ॥ सृष्टिस्थितिः क्षेमकरी क्षामा क्षामोन्नतस्तनी ॥ क्षोणी क्षयकरी क्षीणा शवस्था शिववल्लभा ॥ २३ ॥ दंतुरा दाडिमप्रीतिर्दया दांभिकसूदिनी ॥ राक्षसी डाकिनी योग्या योगिनी योगवल्लभा ॥ २४ ॥ कबंधा कंदरा कृत्या कृत्तिका कंटकांतका ॥ कळंकरहिता काली कंपा काश्मीरवल्लभा ॥ ॥ २५ ॥ काशी कीर्तिप्रदा कांची काश्मीरी कोकिलस्वना ॥ प्रभावती महारौद्री रुद्रपत्नी रुजापहा ॥ २६ ॥ रतिः स्तुतिस्तुरी तुर्या तोतुला तलवासिनी ॥ तपःप्रिया सरिच्छ्रेष्ठा पंगुपुत्री यमस्वसा ॥ २७ ॥ यामी यमांतका याम्या यमुना स्वर्नदी तडित् ॥ नारायणी विश्वमाता भवानी पापनाशिनी ॥ २८ ॥ विगता विगतप्रश्ना कृशा कृष्णासिधारिणी ॥ वारी वराम्बरधरा वरदा वीर

सूदिनी ॥ २९ ॥ वीरसूर्वामनाकारा दीर्घसूत्रा दयावती ॥ दरी धनप्रिया धात्री धात्रीवल्ली महोदरी ॥ ३० ॥ गणेश्वरी गणा
कांची कांचीकिंकिणिघंटिका ॥ माया मायावती मत्ता प्रमत्ता प्रवरेश्वरी ॥ ३१ ॥ पौरंदरी शर्वी सीता शीतातपस्वभावजा ॥
स्वाभाविकगुणा गण्या गांभीर्यगुणभूषणा ॥ ३२ ॥ सूतिः सूर्यकला सुधा सततसततिरूपिणी ॥ तेजस्विनी सदानंदा सभासंतोष
वर्धिनी ॥ ३३ ॥ तर्पणा कर्षणा होत्री संकल्पा शुभमंत्रिका ॥ दर्भा द्रोणिकला शांता समिधा सुरवेदिका ॥ ३४ ॥ धूम्राहुति
श्रमतिश्रामीकरुचिश्रिता ॥ दिव्यानलेश्वरी नीला कालानलसरस्वती ॥ ३५ ॥ अपर्णा सुफला यज्ञा सभया निर्भयाभया ॥
भमिस्वना भर्गशिखा भास्वती भाकरा विभा ॥ ३६ ॥ विभावरी नदी नंद्या नद्यावर्तप्रवर्तिनी ॥ पृथ्वीधरा विषधरा विश्वगर्भा प्रव
र्तिका ॥ ३७ ॥ विश्वमाया विश्वबाला विश्वंभरविलासिनी ॥ उरगेशा पद्मनाभा पद्मनाभप्रसूः प्रजा ॥ ३८ ॥ तोरणा तुलसी
दीक्षा दक्षा दाक्षायणी द्युतिः ॥ संपुटा शयना शय्या शासना शमनांतका ॥ ३९ ॥ श्यामाकवर्णा शार्दूली शष्पनीतांशुवल्लभा ॥
स्तुत्या प्रणीता नियतिः कंपना कंपहारिणी ॥ ४० ॥ चंपका भूधरा चीना दीना दीनजनप्रिया ॥ वसुंधरा वासवेशी वसुनाथा
वटेश्वरी ॥ ४१ ॥ समुद्रासंगमा पूर्णा तरला तरुवासिनी ॥ पार्वती पामरी मान्या माननीया मधुप्रिया ॥ ४२ ॥
माधवी मधुपानस्था मंदिरा मंदुरा मृगी ॥ ममर्षाभेरुषा रेवा रेवती रमणी रमा ॥ ४३ ॥ ऋद्धिहस्ता सिद्धिहस्ता
चान्नपूर्णा महेश्वरी ॥ अणुरूपा जगज्ज्योतिः समस्तासुरघातिनी ॥ ४४ ॥ गारुडी गगनालंबा लंबमानकचप्रिया ॥
पीतांबरा पीतपुष्पा पूतना गीतवल्लभा ॥ ४५ ॥ बलाका जगदंता च जरा जयवरप्रदा ॥ प्रीतिः कठोरवदना करालरदना रमा ॥ ४६ ॥
जिह्वाहस्ता च बगला प्रणया विनयप्रदा ॥ कीरी करालदेहा च शेमुषी मक्षिका मषी ॥ ४७ ॥ उत्तीर्णा तर्णिका तीक्ष्णा श्लक्ष्णा
कामेश्वरी शिवा ॥ शिवपत्नी सरोजाक्षी पद्महस्ता सरस्वती ॥ ४८ ॥ तथ्या पथ्यकरी रथ्या रथस्था विततस्वरा ॥ महती
रागिणी मार्गी शुचिहासा हरीश्वरी ॥ ४९ ॥ हरिद्रलांशुलसिता लक्ष्मीनायकसुंदरी ॥ अंबालिकांबा देवेशी हव्यवाग्निशिखा श्रुतिः

॥ ५० ॥ अलसाल्पगतिश्चांत्यानंतानंतगुणाश्रया ॥ आद्या चादित्यसंकाशा ह्यादित्यकुलसुंदरी ॥ ५१ ॥ आत्मरूपाधिशामिनी चादिमायादिदेवता ॥ इंद्रप्रसूरिनय्नोतिरिनाग्निशशिलोचना ॥ ५२ ॥ उमा उर्वी उरुभुजा उत्तुंगा चोक्षवाहना ॥ उत्तंका चोत्तमा ध्येया उल्लासा चोरुगर्विणी ॥ ५३ ॥ ऊष्मा ऊर्गा च गुर्वंगी ऊर्ध्वाक्षी ऊर्ध्वमस्तका ॥ ऋद्धिश्चर्चा ऋवर्णेशी ऋगहर्त्री च वार्तकी ॥ ५४ ॥ ऋद्धिजा चारुवस्त्रा च ऋणिवासा महालसा ॥ लृकारा लृक्तुरा लीना लृकारवरधारिणी ॥ ५५ ॥ एणांकमुकुटा चेहा चारुचंद्रकला कला ॥ ऐंकारगतिरैश्वर्यदायिनी चेश्वरी गतिः ॥ ५६ ॥ ॐकारबीजरूपा च औत्रिकी बीजधारिणी ॥ अंबिका लंपिकांबा च अस्वरोद्धाररूपिणी ॥ ५७ ॥ काली च भद्रकाली च कालिका कालवल्लभा ॥ कदंबनिलया कंथा कांचीमंडनमंडिता ॥ ५८ ॥ कलंकरहिता कूर्पा कांचनाभा करीरगा ॥ कनकाचलवासा च कारुण्याकुलमानसा ॥ ५९ ॥ कुलस्था कौलिनि. कल्या कुरुकुल्ला कपालिनी ॥ कपालकुलनिर्विण्णा क्रेंकरा कंजलोचना ॥ ६० ॥ खंजनाक्षी खड्गधरा खेटकायुधभूषणा ॥ खर्पराढ्या च खलहा खेटिनी खेचरी खगा ॥ ६१ ॥ खगायुधा खगगतिः खकाराशरभूषणा ॥ गणाध्यक्षा गजगतिर्गणेशजननी गदा ॥ ६२ ॥ गोधा गदाधरप्राज्या गगनेशी महीमला ॥ घुर्घुरा घटभूर्घूका घुसृणाभा घनेश्वरी ॥ ६३ ॥ घुनसारप्रिया साम्या घवर्णरुतभूषणा ॥ चांद्री चंद्रस्तुता चार्वी चंद्रिका चंडनिःस्वना ॥ ६४ ॥ चंचरीकस्वना देवी चंचच्चामीकरांगदा ॥ छत्रिका च्छुरिका छच्छा छत्रचामरभूषणा ॥ ६५ ॥ जीकारी जलजिह्वा च जृंभिका जलयोगिनी ॥ जटाजूटधरा जातिर्जातीपुष्पसमानना ॥ ६६ ॥ जलेश्वरी जगद्धयेया जानकी जननी जटा ॥ झंझाझरी झरत्कारी जरत्कांची त्वकिंकिणी ॥ ६७ ॥ झिंटिका झंपकृज्झंपा झंपत्रासनिवारिणी ॥ ञणुरूपा ञकहस्ता ञकाराक्षरसंमता ॥ ६८ ॥ टंकायुधा महातथ्या टंकारा करुणा सती ॥ ठक्कुरा ठत्करा ठानी डिंडीरवसना डला ॥ ६९ ॥ ढंडानिलमयी ढंडा ढणत्कारकरा ढसा ॥ णांतानणी णीलायुधा णवर्णाक्षरभूषणा ॥ ७० ॥ तरुणी तुंदिला तोदा तामसी तामसप्रिया ॥ ताम्रानना ताम्रकरा ताम्रांबरधरा तुला ॥ ७१ ॥ तापत्रयहरी तापी तैलासका तिलोत्तमा ॥ स्थाणुपत्नी

स्थली स्थूला स्थितिः स्थैर्यधरा स्थुला ॥ ७२ ॥ दंतिनी दंतुरा दावी देवकी देवनायिका ॥ दामिनी दमिनी दंष्ट्रा दंडहस्ता दुरा नतिः ॥ ७३ ॥ दुर्वारा दुर्गतिर्द्राक्षी द्राक्षा द्रविडवासिनी ॥ दूरस्था दुंदुभिध्वाना दरदा दरनाशिनी ॥ ७४ ॥ दुःखघ्नी च द्रुगा द्रष्ट्री दया दांभिकनाशिनी ॥ धर्म्या धर्मप्रसूर्धन्या धनदा धातृवल्लभा ॥ ७५ ॥ धनुर्धरा धनुर्वल्ली धनुष्कवरदायिनी ॥ धूमाली धूम्र वदना धूम्रश्रीर्धूम्रलोचना ॥ ७६ ॥ नलिनी नर्तकी नांतानंगा नलिनलोचना ॥ निर्मला निगमाचारा निम्नगा नगजा नमिः ॥ ७७ ॥ नीलग्रीवा निरीहा च नीपोपवनवासिनी ॥ निरंजनजनिर्जन्या निद्रालुर्नीरवासिनी ॥ ७८ ॥ नटिनी नाट्यनिरता नवनीतप्रियानिला ॥ नारायणी निराकारा निर्लेपा नित्यवल्लभा ॥ ७९ ॥ पद्मावती पद्मकरा पुत्रदा पुत्रवत्सला ॥ परोत्तरा पुरी पाठा पीनश्रोणिः पुलोमजा ॥८०॥ पुष्पिणी पुस्तककरा पटुः पाटीरवाहना ॥ पापघ्नी पद्मिनी पाली पली परमसुंदरी॥८१॥ पिशाची च पिशाचघ्नी पानपात्रधरा पुटा ॥ पूर्णिमा पंचमी पौत्री पुरूरववरप्रदा ॥ ८२ ॥ पंचयज्ञा पंचशरी पंचाशन्मनुवल्लभा ॥ पांचली पंचपुत्रा च पूर्णा पूर्णमनोरथा ॥ ८३ ॥ फलिनी फलदात्री च फलहस्ता फणिप्रिया ॥ फिरंगहा स्फीतमतिः स्फीतिः स्फीतिमती स्फुरा ॥ ८४ ॥ बलमाया बलस्तन्या बिल्वसेना बलाबला ॥ बगलेश्वरपूज्या च बलिनी बलवर्धिनी ॥ ८५॥ बुद्धमाता बौद्धमतिर्बद्धा बंधनमोचिनी ॥ भगिनी भगमाला च भगलिंगामृतस्रवा ॥ ८६ ॥ भीमेश्वरी च भेरुंडा भगेशी भगमर्षिणी ॥ भगलिंगस्थिता भग्या भाग्यदा भग मालिनी ॥ ८७ ॥ मत्ता मनोहरा मेना मैनाकजननी मुरी ॥ मुरली मानवी मोक्त्री मनस्विजनमोदिता ॥ ८८ ॥ मत्तमातंगगा माद्री मरालगतिमंजुला ॥ यज्ञेश्वरीश्वरी यज्ञा यजुर्वेदप्रियाश्रिता ॥ ८९ ॥ यशोवती यतिस्था च यतिस्था यतिवल्लभा[१] ॥ यवनी यौवनस्था च यवा यक्षजनाश्रया ॥ ९० ॥ यज्ञसूत्रप्रदा ज्येष्ठा यज्ञभूर्यूपमालिनी ॥ रंजिता राजपत्नी च राजसूयफलप्रदा ॥ ९१ ॥ रजोवती रजश्चित्रा राज्यदा राज्यवर्धिनी ॥ राज्ञी रात्रिवरेशानी रोगघ्नी त्रिपुरेश्वरी ॥ ९२ ॥ ललिता ललितालापा लोपा ललन

---

१ यतीनामायतिरुत्तरकालः स वल्लभो यस्याः सा ।

लालसा ॥ लाटीरद्रुममासा च लाटीरद्रुमवर्तिनी ॥ ९३ ॥ लंका ललज्जटाजूटा लंघिता सुरसुंदरी ॥ लोकेशवरदा लीना लयकर्त्री महालया ॥ ९४ ॥ वेदिर्विनग्ना वाणी च वेणा वेणुर्वनेश्वरी ॥ वंद्यमाना वर्त्तर्णाढ्या वाराही वीरमातृका ॥ ९५ ॥ शंखिनी शंखवलया शंखायुधधरा शमा ॥ शशिमंडलमध्यस्था शीतलांबुनिवासिनी ॥ ९६ ॥ श्मशानस्था महाघोरा श्मशाननिलयेश्वरी ॥ सिंधुः सूत्रधरा सत्रा समस्तकुलचारिणी ॥ ९७ ॥ सप्तमी सात्त्विकी सत्त्वा सूत्रस्थासुरसूदिनी ॥ सुरेश्वरी संपदाद्या समस्ताचलचारिणी ॥ ॥ ९८ ॥ समदा संमसिः संमा सवना सवनेश्वरी ॥ हंसी हरिप्रिया हास्या हरिनेत्रा हरांबिका ॥ ९९ ॥ हेषा हटीश्वरी हीरा हलिनी हलदायिनी ॥ हे हाहा हारवा हाला हालाहलहताशया ॥१००॥ क्षेमा क्षेमप्रदा क्षामा क्षौमांबरधराक्षया ॥ क्षितिः क्षीरप्रिया लक्ष्या क्षितिभृत्क्षणदा क्षुधा ॥ १०१ ॥ क्षत्रिया ब्राह्मणी क्षेत्रा क्षरा क्षंबीजमंडिता ॥ लक्ष्यबीजस्वरूपा च क्षकाराक्षरमातृका ॥ १०२ ॥ दुर्गाघ्यनाशिनी दूर्वा दुर्गमा दुर्गनाशिनी ॥ दुर्गा दुर्गार्तिनाशिनी ॐ ह्रीं दुं बीजमंडिता ॥ १०३ ॥ इति नामसहस्रं तु मंत्रगर्भं महाफलम् ॥ दुर्गाया दुर्गतिहरं सर्वदेवनमस्कृतम् ॥ १०४ ॥ सर्वमंत्रमयं दिव्यं देवदानवपूजितम् ॥ श्रेयस्करं महापुण्यं महापातकनाशनम् ॥ १०५ ॥ यः पठेत्पाठयेद्वापि शृणोति श्रावयेत्तथा ॥ स महापातकैर्मुक्तो देवदानवसेवितः ॥ १०६ ॥ इह लोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत् ॥ दुर्गानामसहस्रं तु मूलमंत्रैकसाधनम् ॥ १०७ ॥ अर्धरात्रे पठेद्वीरो मधुरं भवसेवितम् ॥ त्रिवारं वर्षपूर्वं तु भवेद्वागीशसन्निभः ॥ १०८ ॥ यः पठेद्देवि मध्याह्ने स्त्रीयुतो मुक्तकुंतलः ॥ तस्य वैरिकुलं त्रस्येद्दर्शनादेव नश्यति ॥ १०९ ॥ दहनादिव देवेशि पतंगकुलमद्रिजे ॥ यः पठेद्वेतसीमूले सायं पूजितभैरवः ॥ ११० ॥ तस्यास्यकुहराद्वाणी निःसरेद्गद्यपद्यभाक् ॥ यः पठेत्सततं देवि शयने स्त्रीरताकुलः ॥ १११ ॥ स भवेद्वैरिविध्वंसी धनेन धनदोपमः ॥ वाग्भिर्वागीशसदृशः कवित्वेन सितोपमः ॥ ११२ ॥ तेजसा सूर्यसंकाशो यशसा सोमसन्निभः ॥ बलेन वायुतुल्यो हि लक्ष्म्या गीर्वाणनायकः ॥११३॥ देवि किं बहुनोक्तेन स भवेद्भैरवोपमः ॥ स्तंभनाकर्षणोच्चाटवशीकरणक्षमः ॥११४॥ रवौ भूर्जे लिखेद्देवि निशीथे चाष्टगन्धकैः ॥ सप्ततन्य

रेतोराजस्कैः साधको मंत्रसाधकः ॥११५॥ लिखित्वा वेष्टयेन्नामसहस्त्रमणिमीश्वरि ॥ श्वेतत्रस्त्रेण संवेष्ट्य लाक्षया परिवेष्टयेत् ॥ ११६ ॥
सुवर्णरजताद्यैश्च वेष्टयेत्पीतसूत्रकैः ॥ संपूज्य गुटिकां देवि शुभाहे साधकोत्तमः ॥ ११७ ॥ धारयेन्मूर्ध्नि वा बाहौ गुटिकां काम
दायिनीम् ॥ रणे रिपून्विजित्याशु कल्याणी गृहमाविशेत् ॥ ११८ ॥ वंध्या वामभुजे धृत्वा कृत्वा साधकपूजनम् ॥ लभते तनयान्देवि
साक्षाद्वैश्रवणोपमान् ॥ ११९ ॥ गुटिकैषा महादिव्या गोप्या कामफलप्रदा ॥ साधकैः सततं पूज्या साक्षाद्दुर्गास्वरूपिणी ॥ १२० ॥
योऽर्चयेत्साधको दुर्गां गुटिकां धारयेत्प्रिये ॥ पठेद्वर्म शिवे मंत्रं नामसाहस्त्रिकं परम् ॥ १२१ ॥ अंगस्तोत्रं फलं तस्य देवि वक्ष्येऽधुना
शृणु ॥ वने राजकुले वापि दुर्भिक्षे शत्रुसंकटे ॥ १२२ ॥ ग्रहयक्षपिशाचादिभूतप्रेतभये तथा ॥ वीरो विगतभीर्देवि सर्वत्र विजयी
भवेत् ॥ १२३ ॥ स्तंभयेद्वायुसूर्यौ च चंद्रादीन्साधकोत्तमः ॥ मोहयेत्त्रिजगत्सद्यः कांताश्चाकर्षयेद्ध्रुवम् ॥ १२४ ॥ मारयेदखिला
ञ्छत्रूंस्त्रिपूनुच्चाटयेत्तथा ॥ वशयेद्देवताः सद्यः किं पुनर्मानवाञ्छिवे ॥ १२५ ॥ शमयेदखिलान्रोगान्महोत्पातानुपद्रवान् ॥
किं किं न लभते वीरो दुर्गापञ्चांगपूजनात् ॥ १२६ ॥ इदं रहस्यं दुर्गाया अष्टाक्षर्या महेश्वरि ॥ सर्वस्वं सारतत्त्वं च मूलविद्यामयं
परम् ॥ १२७ ॥ महाचीनक्रमस्थानां साधकानां यशस्करम् ॥ पठेत्संपूजयेद्देव्या मन्त्रनामसहस्त्रकम् ॥ १२८ ॥ इदं सारो
हि तन्त्राणां तत्त्वानां तत्त्वमुत्तमम् ॥ दुर्गानामसहस्त्रं तु तव भक्त्या प्रकाशितम् ॥१२९॥ अभक्ताय न दातव्यं गोप्तव्यं पशुसंकटे ॥
अभक्तेभ्योऽपि पुत्रेभ्यो दत्त्वा नरकमाप्नुयात् ॥ १३० ॥ दीक्षिताय कुलीनाय गुरुभक्तिरताय च ॥ शांताय भक्तियुक्ताय देयं नाम
सहस्त्रकम् ॥ १३१ ॥ विना दानं न गृह्णीयान्न दद्याद्दक्षिणां विना ॥ दत्त्वा गृहीत्वाप्युभयोः सिद्धिहानिर्भवेद्ध्रुवम् ॥ १३२ ॥
इदं नामसहस्त्रं तु गुप्तं गोप्यतमं शिवे ॥ तव भक्त्या मयाख्यातं गोपनीयं स्वयोनिवत्" ॥ १३३ ॥ इति श्रीदेवीरहस्यतन्त्रोक्तं दुर्गा
सहस्त्रनामस्तोत्रं समाप्तम् ॥ अथ दुर्गाष्टाक्षरस्तोत्रप्रारंभः ॥ उक्तं च देवीरहस्यतंत्रे पंचाशत्तमे पटले ॥ भैरव उवाच ॥ " अधुना
देवि वक्ष्यामि दुर्गास्तोत्रं मनोहरम् ॥ मूलमंत्रमयं दिव्यं सर्वसारस्वतप्रदम् ॥ १ ॥ दुर्गार्तिशमनं पुण्यं साधकानां जयप्रदम् ॥ दुर्गाया

अंगभूतं तु स्तोत्रराजं परात्परम् ॥२॥ ॐ अस्य श्रीदुर्गास्तोत्रराजस्य महेश्वर ऋषिः । अनुष्टुप् छंदः ॥ श्रीदुर्गाष्टाक्षरात्मिका देवता । दु
बीजम् । पैरा शक्तिः । नमः कीलकम् । धर्मार्थकाममोक्षार्थे दुर्गास्तोत्रपाठे विनियोगः॥ ॐ महेश्वरऋषये नमः शिरसि १ । अनुष्टुप्छंदसे
नमोमुखे २। श्रीदुर्गाष्टाक्षरात्मिकादेवतायै नमो हृदि ३ । दुं बीजाय नमो नाभौ ४ । ह्रीं शक्तये नमो गुह्ये ५। नमः कीलकाय नमः
पादयोः ६ । विनियोगाय नमः सर्वांगे ७ । इति विन्यास्य ध्यानं कुर्यात ॥ दूर्वानिभां त्रिनयनां विलसत्किरीटां शंखाब्जखड्गशर
खेटकशूलचापान् ॥ संतर्जनीं च दधतीं महिषासनस्थां दुर्गां नवारकुलपीठगतां भजेऽहम् ॥ तारं हारं मंत्रमालां सुबीजं ध्याये
दंतयों वलं वालकांतः ॥ तस्य स्मारंस्मारमंघ्रिद्वयीं द्राग्रंभा याति स्वर्गतः कामवश्या॥ ४ ॥मायां जपेद्यस्तव मंत्रमध्ये दुर्गे सदा दुर्गति
खेदखिन्नः ॥ भवेत्स भूमौ नृपमौलिमालामाणिक्यनिर्घृष्टपादारविंदः ॥ ५ ॥ चाक्रिकं यदि जपेत्तवांबिके चक्रमध्यगत ईश्वरेश्वरि ॥
साधको भवति चक्रवर्तिनां नायको नयविलासकोविदः ॥ ६ ॥ चक्रिबीजमपरं स्मरेच्छिवे योऽरिवर्गविहिताहितव्यथः ॥ आजिमंडल
गतो जयेद्रिपून्वाजिवारणरथाश्रितो नरः ॥ ७ ॥ दूर्वाबीजं यो जपेत्प्रेतभूमौ सायं मायाभस्मनालिप्तकायः ॥ गीर्वाणानां नायको देव
मंत्री मुक्त्वा राज्यं प्राज्यमाद्यं करोति ॥ ८ ॥ वायव्यबीजं यदि साधको जपेत्प्रियाकुचद्वंद्वविमर्दनक्षमः ॥ समस्तकांताजननेत्रवागुरा
विलासहंसो भविता स पार्वति ॥ ९ ॥ विश्वं विश्वेश्वरि यदि जपेत्कामवेलाकलार्तो रात्रौ मात्राक्षरविलसितन्यास ईशानि मातः ॥
तस्य स्मेराननसरसिजभ्राजमानांगलक्ष्मीर्वश्याऽवश्यं सुरपुरवधूमौलिमालोर्वशी स्यात् ॥ १० ॥ भूगेहांचितसत्रिवृत्तविलसन्नागारवृत्तां
चितव्यग्रारोल्लसिताग्निकोणाविलसच्छ्रीबिंदुपीठस्थिताम् ॥ ध्यायेच्चेतसि शर्वपत्नि भवतीं माध्वीरसाघूर्णितां यो मंत्री स भवि
ष्यति स्मरसमः स्त्रीणां धरण्यां दिवि ॥ ११ ॥ दुर्गास्तवं मनुमयं मनुराजमौलिमाणिक्यमुत्तमशिवांगरहस्यभूतम् ॥
प्रातः पठेद्यदि जपावसरेऽर्चनायां भूमौ भवेत्स नृपतिर्दिवि देवनाथः ॥ १२ ॥ इति स्तोत्रं महापुण्यं पंचांगैक

१ परा ह्रीं × २ श्रीं ।

शिरोमणिम् ॥ यः पठेदर्धरात्रे तु तस्य वश्यं जगत्त्रयम् ” ॥ १३ ॥ इति श्रीदेवीरहस्यतंत्रोक्तं श्रीदुर्गाष्टाक्षरस्तोत्रं समाप्तम् ॥

॥ अथ दुर्गास्तवः ॥ उक्तं च हरिवंशे ॥ वैशंपायन उवाच ॥ “ आर्यास्तवं प्रवक्ष्यामि यथोक्तमृषिभिः पुरा ॥ नारायणीं नमस्यामि देवीं त्रिभुवनेश्वरीम् ॥ १ ॥ त्वं हि सिद्धिर्धृतिर्मेधा श्रीर्विद्या सन्नतिर्मतिः ॥ संध्या रात्रिः प्रभा निद्रा कालरात्रिस्तथैव च ॥ २ ॥ आर्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी ॥ जननी सिद्धसेनानीरुग्रचारिमहातपाः ॥ ३ ॥ जया च विजया चैव पुष्टिश्च त्वं क्षमा दया ॥ ज्येष्ठा यमस्य भगिनी नीलकौशेयवासिनी ॥४॥ बहुरूपा विरूपा च अनेकविधचारिणी ॥ विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ॥५ ॥ पर्वताग्रेषु घोरेषु नदीषु च गुहेषु च ॥ वासस्तव महादेवि वनेषूपवनेषु च ॥ ६ ॥ शबरैर्बर्बरैश्चैव पुलिंदैरभिपूजिता ॥ मयूरपक्षध्वजिनी लोकान्क्रमसि सर्वशः ॥ ७ ॥ कुक्कुटैश्छागलैर्मेषैः सिंहैर्व्याघ्रैः समाकुला ॥ घंटानिनादबहुला विश्रुता विंध्यवासिनी ॥ ८ ॥ शूलिनी पट्टिशयुता सूर्यचन्द्रपताकिनी ॥ नवमी कृष्णपक्षस्य शुक्लस्यैकादशी तथा ॥ ९ ॥ भगिनी बलदेवस्य रजनी कलहप्रिया ॥ आवासः सर्वभूतानां निष्ठा च परमा गतिः ॥ १० ॥ नंदगोपसुता चैव देवानां विजयावहा ॥ चीरवासा सुवासाश्च रात्रिः संध्या त्वमेव च ॥ ११ ॥ प्रकीर्णकेशी मृत्युश्च तथा मांसौदनप्रिया ॥ लक्ष्मीरलक्ष्मीरूपेण दानवानां वधाय च ॥ १२ ॥ सावित्री चव वेदानां माता मंत्रगणस्य च ॥ अंतर्वेदी च यज्ञानामृत्विजश्चैव दक्षिणा ॥ १३ ॥ सिद्धिः सांयात्रिकाणां तु वेला त्वं सागरस्य च ॥ यक्षाणां प्रथमा यक्षी नागानां सुरसेति च ॥ १४ ॥ कन्यानां ब्रह्मचर्या त्वं सौभाग्यं प्रमदासु च ॥ ब्रह्मचारिण्यथो दीक्षा शोभा च परमा तथा ॥ १५ ॥ ज्योतिषां त्वं प्रभा देवि नक्षत्राणां च रोहिणी ॥ राजद्वारेषु तीर्थेषु नदीनां संगमेषु च ॥ १६ ॥ पूर्णा च पूर्णिमा चंद्रे कृत्तिवासा इति स्मृता ॥ सरस्वती च वाल्मीकेः स्मृतिर्द्वैपायनस्य च ॥ १७ ॥ कर्षकाणां च सीतेति भूतानां धरणिस्तथा ॥ ऋषीणां धर्मबुद्धिस्तु देवानां मानसी तथा ॥ १८ ॥ सुरादेवीति भूतेषु स्तूयसे त्वं स्वकर्मभिः ॥ इन्द्रस्य चारुदृष्टिस्त्वं सहस्रनयनेति च ॥ १९ ॥ तापसानां च देवि त्वमरणिश्चाग्निहोत्रिणाम् । क्षुधा च सर्वभूतानां तृप्तिस्त्वं दैवतेषु च ॥ २० ॥ स्वाहा

तृप्तिर्धृतिर्मेधा वसूनां त्वं वसूमती ॥ आशा च मानुषाणां तु तुष्टिश्च कृतकर्मणाम् ॥२१॥दिशश्च विदिशश्चैव तथा ह्यग्निशिखा प्रभा ॥ शकुनी पूतना च त्वं रेवती वसुदारुणा ॥ २२ ॥ निद्रा च सर्वभूतानां मोहिनी क्षत्रिया तथा ॥ विद्यानां ब्रह्मविद्या च त्वमोंकारो वषट् तथा ॥ २३ ॥ नारीणां पार्वती च त्वं पौराणीमृषयो विदुः ॥ अरुंधत्येकभर्त्रीणां प्रजापतिवचो यथा ॥ २४ ॥ पर्यायनामभिर्दिव्यैरिंद्राणी चेति विश्रुता ॥ त्वया व्याप्तमिदं सर्वं जगत्स्थावरजंगमम् ॥ २५ ॥ संग्रामेषु च सर्वेषु अग्निप्रज्वलितेषु च ॥ नदीतीरेषु चोरेषु कांतारेषु भयेषु च ॥ प्रवासे राजबंधे च शत्रूणां च प्रदर्शने ॥ २६ ॥ प्रयाणाद्येषु सर्वेषु त्वं हि रक्षा न संशयः ॥ त्वयि मे हृदयं देवि त्वयि चित्तं मनस्त्वयि ॥ २७ ॥ रक्ष मां सर्वपापेभ्यः प्रसादं कर्तुमर्हसि ॥ इमं तव स्तवं दिव्यमिति व्यासप्रकल्पितम् ॥ २८ ॥ यः पठेत्प्रातरुत्थाय शुचिः प्रयतमानसः ॥ त्रिभिर्मासैः कांक्षितं च फलं वै संप्रयच्छसि ॥ २९ ॥ षड्भिर्मासैर्वरिष्ठं तु वरमेकं प्रयच्छसि ॥ अर्चिता नवभिर्मासैर्दिव्यं चक्षुः प्रयच्छसि ॥ ३० ॥ संवत्सरेण सिद्धिं तु यथाकामं प्रयच्छसि ॥ सत्यं ब्रह्म च दैवं च द्वैपायनवचो यथा ॥ ३१ ॥ नृणां बंधं वधं घोरं पुत्रनाशं धनक्षयम् ॥ व्याधिं मृत्युभयं चैव पुजिता शमयिष्यसि ॥ ३२ ॥ भविष्यसि महाभागे वरदा कामरूपिणी ॥ मोहयित्वा च तं कंसमेका त्वं भोक्ष्यसे जगत् ॥ ३३ ॥ अहमप्यात्मनो वृत्तिं विधास्ये गोषु गोपवत् ॥ स्ववृद्ध्यर्थमहं चैव करिष्ये कंसगोपनम् ॥ ३४ ॥ एवं तु स समादिश्य गतोऽतर्धानमीश्वरः ॥ सा चापि तं नमस्कृत्य तथास्त्विति विनिश्चिता" ॥ ३५ ॥ इति श्रीहरिवंशोक्तः श्रीआर्य्यास्तवः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥ अथ दुर्गास्तोत्रम् ॥ उक्तं च ब्रह्मवैवर्तपुराणे प्रकृतिखंडे अंतिमेऽध्याये ॥ "पुरा स्तुता सा गोलोके कृष्णेन परमात्मना ॥ संपूज्य मधुमांसेन प्रीतेन रासमंडले ॥ १ ॥ मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा ॥ तत्रैव काले सा दुर्गा ब्रह्मणः प्राणसंकटे ॥ २ ॥ चतुर्थे संस्तुता देवी भक्ता च त्रिपुरारिणा ॥ पुरा त्रिपुरयुद्धे च महाघोरतरे रणे ॥ ३ ॥ पंचमे संस्तुता देवी

१ दीर्घ आर्षः ।

वृत्रासुरवधे तथा ॥ शक्रेण सर्वैर्देवैश्च घोरे च प्राणसंकटे ॥ ४ ॥ तदा मुनींद्रैर्मुनिभिर्मानवैः सुरथादिभिः ॥ संस्तुता पूजिता सा
च कल्पे कल्पे परात्परा ॥ ५ ॥ स्तोत्रं च श्रूयतां ब्रह्मन्सर्वविघ्नविनाशनम् ॥ सुखदं मोक्षदं सारं भवाब्धेः पारकारकम् ॥ ६ ॥
श्रीकृष्ण उवाच ॥ त्वमेव सर्वजननी मूलप्रकृतिरीश्वरी ॥ त्वमेवाद्या सृष्टिविधौ स्वेच्छया त्रिगुणात्मिका ॥ ७ ॥ कार्यार्थे सगुणा त्वं
च वस्तुतो निर्गुणा स्वयम् ॥ परब्रह्मस्वरूपा त्वं सत्या नित्यस्वरूपिणी ॥ ८ ॥ निजस्वरूपा परमा भक्तानुग्रहविग्रहा ॥ सर्व
स्वरूपा शर्वाणी सर्वाधारा परात्परा ॥ ९ ॥ सर्वज्ञा सर्वतोभद्रा सर्वमङ्गलमङ्गला ॥ सर्वज्ञानप्रदा देवी सर्वज्ञा सर्वभाविनी ॥ १० ॥
त्वं स्वाहा देवदाने च पितृदाने स्वधा स्वयम् ॥ दक्षिणा सर्वदाने च सर्वकर्मणि संततम् ॥ ११ ॥ निद्रा त्वं च दया त्वं च तृष्णा
त्वं चात्मनश्च मे ॥ तत्क्षांतिः शांतिरीशा च कांतिस्तुष्टिश्च शाश्वती ॥ १२ ॥ श्रद्धा पुष्टिश्च तंद्रा च लज्जा शोभा प्रभा सदा ॥ सतां
संपत्स्वरूपा श्रीर्विपत्तिरसतामिह ॥ १३ ॥ प्रीतिरूपा पुण्यवतां पापिनां कलहांकुरा ॥ शश्वत्कर्ममयी शक्तिः सर्वदा सर्वजीविनाम् ॥
॥ १४ ॥ देवेभ्यः संपदां दात्री धातुर्धात्री कृपामयी ॥ कुलायः सर्वदेवानां सर्वासुरविनाशिनी ॥ १५ ॥ योगनिद्रा योगरूपा योग
दात्री च योगिनाम् ॥ माहेश्वरी च ब्रह्माणी विष्णुमाया च वैष्णवी ॥ १६ ॥ भद्रदा भद्रकाली च सर्वलोकभयंकरी ॥ ग्रामे ग्रामे
ग्रामदेवी गृहदेवी गृहे गृहे ॥ १७ ॥ महायुद्धे महामारी दुष्टसंहाररूपिणी ॥ रक्षास्वरूपा शिष्टानां मातेव हितकारिणी ॥ १८ ॥
ब्राह्मण्यरूपा विप्राणां तपस्या च तपस्विनाम् ॥ विद्या विद्यावतां त्वं च बुद्धिर्बुद्धिमतां सती ॥ १९ ॥ मेधा स्मृतिस्वरूपा च प्रतिभा
प्रतिभावताम् ॥ राज्ञां प्रतापरूपा च विशां वा विट्स्वरूपिणी ॥ २० ॥ इत्यात्मना कृतं स्तोत्रं दुर्गायाः स्वर्गकारणम् ॥ पूजाकाले
पठेद्यो हि सिद्धं तद्वाञ्छितं भवेत् ॥ २१ ॥ वंध्या वा काकवंध्या वा मृतवत्सा च दुर्भगा ॥ श्रुत्वा स्तोत्रं वर्षमेकं सुपुत्रं लभते ध्रुवम्
॥ २२ ॥ कारागारे महाघोरे यो बद्धो दृढबंधने ॥ श्रुत्वा स्तोत्रं मासमेकं बन्धनान्मुच्यते ध्रुवम् ॥ २३ ॥ यक्ष्मग्रस्तो गलत्कुष्ठी
महाशूली महाज्वरी ॥ श्रुत्वा स्तोत्रं वर्षमेकं सद्यो रोगात्प्रमुच्यते ॥ २४ ॥ राजद्वारे श्मशाने च महारण्ये रणस्थले ॥ हिंस्रजंतुसमीपे

तु श्रुत्वा स्तोत्रं प्रमुच्यते ॥ २५ ॥ महादरिद्रो मूर्खश्च वर्षं स्तोत्रं पठेत्तु यः ॥ विद्यावान्धनवांश्चैव स भवेन्नात्र संशयः" ॥ २६ ॥ इति श्री
ब्रह्मवैवर्तांतर्गतप्रकृतिखंडोक्तं दुर्गास्तोत्रं समाप्तम् ॥ ॥ अथ परशुरामकृतं दुर्गास्तोत्रम् ॥ परशुराम उवाच ॥ "श्रीकृष्णस्य च
गोलोके परिपूर्णतमस्य च ॥ आविर्भूता विग्रहतः परा सृष्ट्युन्मुखस्य च ॥ १ ॥ सूर्यकोटिप्रभायुक्ता रत्नालंकारभूषिता ॥ वह्नि
शुद्धांशुकाधाना सस्मिता सुमनोहरा ॥ २ ॥ नवयौवनसंपन्ना सिंदूरबिंदुशोभिना ॥ ललिता कबरीभारमालतीमाल्यमंडिता ॥ ३ ॥
अहोऽनिर्वचनीया त्वं चार्वीं मूर्तिं च बिभ्रती ॥ मोक्षप्रदा मुमुक्षूणां जगत्कर्ता विधिः स्वयम् ॥ ४ ॥ मुमोह क्षणमात्रेण दृष्ट्वा त्वां
सर्वमोहिनीम् ॥ रासे संभूय सहसा सस्मिता राधिता पुरा ॥ ५ ॥ सद्भिः ख्याता तेन राधा मूलप्रकृतिरीश्वरी ॥ कृष्णस्त्वां
सहसाज्ञाय वीर्याधानं चकार ह ॥ ६ ॥ ततोऽडमंभसो जज्ञे यतो भूतो महाविराट् ॥ यस्यैव लोमकूपेषु ब्रह्मांडान्यखिलानि च ॥ ७ ॥
तच्छृंगारश्रमेणैव त्वन्निश्वासो बभूव ह ॥ ततस्त्वं पंचधाभूय पंच मूर्तीश्च बिभ्रती ॥ ८ ॥ प्राणाधिष्ठात्री या मूर्तिः कृष्णस्य परमा
त्मनः ॥ कृष्णप्राणाधिकां राधां तां वदंति पुराविदः ॥ ९ ॥ वेदाधिष्ठात्री या मूर्तिर्वेदशास्त्रप्रसूरपि ॥ तां सावित्रीं शुद्धरूपां प्रवदंति
मनीषिणः ॥ १० ॥ ऐश्वर्याधिष्ठात्री मूर्तिर्या शांतिः शांतिस्वरूपिणी ॥ लक्ष्मीं वदंति संतस्तां शुद्धसत्त्वस्वरूपिणीम् ॥ ११ ॥ रागा
धिष्ठात्री या देवी शुक्लमूर्तिः सतां प्रसूः ॥ सरस्वतीं तां शास्त्रज्ञाः प्रवदंति बुधा भुवि ॥ १२ ॥ बुद्धिर्विद्या सर्वशक्तिर्ज्या मुक्तिरधि
देवता ॥ सर्वमंगलरूपा त्वं सर्वमंगलकारिणी ॥ १३ ॥ सर्वमंगलबीजस्य शिवस्य मंदिरेऽधुना ॥ शिवे शिवस्वरूपा त्वं
लक्ष्मीर्नारायणांतिके ॥ १४ ॥ सरस्वती च सावित्री वेदसूर्ब्रह्मणः प्रिया ॥ राधा रासेश्वरस्यैव परिपूर्णतमस्य च ॥ १५ ॥
परमानंदरूपासि छाया चंद्रस्य रोहिणी ॥ शची शक्रस्य कामस्य कामिनी रतिरीश्वरी ॥ १६ ॥ वरुणानी जलेशस्य
वायोः स्त्री प्राणवल्लभा ॥ वह्नेः प्रिया या स्वाहा च कुबेरस्य च सुंदरी ॥ १७ ॥ यमस्य च सुशीला वै नैर्ऋतस्य च कोटवी ॥ ईशा
नस्य शशिकला शतरूपा मनोः प्रिया ॥ १८ ॥ देवहूतिः कर्दमस्य वशिष्ठस्याप्यरुंधती ॥ अदितिर्देवमाता या मुद्रागस्त्यमुनेः प्रिया

॥ १९ ॥ अहल्या गौतमस्यापि सर्वाधारा वसुंधरा ॥ गंगा च तुलसी चापि पृथिव्यां याः सरिद्वराः ॥ २० ॥ एताः सर्वाश्च या
अन्याः सर्वास्त्वत्कलयांबिके ॥ गृहलक्ष्मीर्गृहे नृणां राजलक्ष्मीश्च राजसु ॥ २१ ॥ तपस्विनां तपस्या त्वं गायत्री ब्राह्मणस्य च ॥
सतां सत्यस्वरूपा त्वं ह्यसतां कलहांकुरा ॥ २२ ॥ ज्योतीरूपा निर्गुणस्य शक्तिस्त्वं सगुणस्य च ॥ सूर्ये प्रभास्वरूपा त्वं दाहिका च
हुताशने ॥ २३ ॥ जले सत्यस्वरूपा च शोभारूपा निशाकरे ॥ त्वं भूमौ गंधरूपा च गगने शब्दरूपिणी ॥ २४ ॥ स्मृतिमधो च
बुद्धिर्वाग्ज्ञानशक्तिर्विपश्चिताम् ॥ कृष्णेन विद्या या दत्ता सर्वज्ञानप्रसूः शुभा ॥ २५ ॥ शूलिने कृपया सा त्वं यतो मृत्युंजयः शिवः ॥
सृष्टिपालनसंहारशक्तयास्त्रिविधाश्च याः ॥ २६ ॥ ब्रह्मविष्णुमहेशानां सा त्वमेव नमोऽस्तु ते ॥ २७ ॥ मधुकैटभभीत्या च त्रस्तो
धाता प्रकंपितः ॥ स्तुत्वा मुमोच यां देवीं तां मूर्ध्ना प्रणमाम्यहम् ॥ २८ ॥ मधुकैटभयोर्युद्धे प्राप्तोऽसौ विष्णुरीश्वरीम् ॥ बभूव शक्ति
मान्स्तुत्वा यां दुर्गां तां नमाम्यहम् ॥ २९ ॥ त्रिपुरस्य महायुद्धे सरथे पतिते शिवे ॥ यां तुष्टुवुः सुराः सर्वे तां दुर्गां प्रणमाम्यहम्
॥ ३० ॥ विष्णुना वृषरूपेण स्वयं शंभुः समुत्थितः ॥ जघान त्रिपुरं स्तुत्वा यां दुर्गां तां नमाम्यहम् ॥ ३१ ॥ कालचक्रं च जगति
शश्वद् भ्रमति वेगतः ॥ मृत्युश्चरति जंत्वोघे तां दुर्गां प्रणमाम्यहम् ॥ ३२ ॥ स्रष्टा सृजति सृष्टं च पाता पाति यदाज्ञया ॥ संहर्ता हरते
काले तां दुर्गां प्रणमाम्यहम् ॥ ३३ ॥ ज्योतिःस्वरूपो भगवाञ्छ्रीकृष्णो निर्गुणः स्वयम् ॥ यया विना न शक्तश्च सृष्टिं कर्तुं नमामि
ताम् ॥ ३४ ॥ रक्ष रक्ष जगन्मातस्त्वपराधान्क्षमस्व मे ॥ शिशूनामपराधेन जातु माता न कुप्यति ॥ ३५ ॥ इत्युक्त्वा पर्शुरामश्च
प्रणम्य तां रुरोद च ॥ तुष्टा दुर्गा संभ्रमेण चाभयं सा वरं ददौ ॥ ३६ ॥ अमरो भव रे पुत्र वत्स सुस्थिरतां व्रज ॥ मम प्रसादा
त्सर्वत्र जयोऽस्तु तव संततम् ॥ ३७ ॥ सर्वांतरात्मा भगवांस्तुष्टोऽस्तु सततं हरिः ॥ भक्तिर्भवतु ते कृष्णे शिवदे च शिवे गुरौ ॥ ३८ ॥
इष्टदेवे गुरौ यस्य भक्तिर्भवति शाश्वती ॥ तं हंतुं नहि शक्ता वै रुष्टाश्च सर्वदेवताः ॥ ३९ ॥ श्रीकृष्णस्य च भक्तस्त्वं शिष्यस्त्वं

१ सहार्थे तृतीया।

शंकरस्य च ॥ गुरुपत्न्याश्च भक्तो हि कस्त्वां हंतुं महेश्वरः ॥ ४० ॥ अहो न कृष्णभक्तानामशुभं विद्यते क्वचित् ॥ अन्यदेवेषु
भक्ता वा न भक्ता वा निरंकुशाः ॥ ४१ ॥ चंद्रमा बलवांस्तुष्टो येषां भाग्यवतां भृगो ॥ तेषां तारागणा रुष्टाः किं कुर्वंति च
दुर्बलाः ॥ ४२ ॥ यस्य तुष्टः सभायां चेन्नरदेवो महान्सखा ॥ तस्य किं वा करिष्यंति रुष्टा भृत्याश्च दुर्बलाः ॥ ४३ ॥ इत्युक्त्वा
पार्वती तुष्टा दत्त्वा रामाय चाशिषम् ॥ जगन्मातुः पुरस्तूर्णं जयशब्दो बभूव ह ॥ ४४ ॥ कण्वशाखोक्तस्तोत्रं च पूजाकाले हि यः
पठेत् ॥ यात्राकाले च प्रातर्वा वांछितार्थं लभेत सः ॥ ४५ ॥ पुत्रार्थी लभते पुत्रं कन्यार्थी लभते सुताम् ॥ विद्यार्थी लभते विद्यां
प्रजार्थी लभते प्रजाम् ॥ ४६ ॥ भ्रष्टराज्यो व्रजेद्राज्यं धनं भ्रष्टधनो व्रजेत् ॥ यस्य तुष्टो गुरुर्देवो राजानो बांधवास्तथा ॥ ४७ ॥
तस्य तुष्टाश्च वरदाः स्तोत्रराजप्रसादतः ॥ दस्युग्रस्तोऽहिसंग्रस्तः शत्रुग्रस्तो भयानकः ॥ ४८ ॥ व्याधिग्रस्तो भवेन्मुक्तः स्तोत्र
स्मरणमात्रतः ॥ राजद्वारे श्मशाने च कारागारे च बंधने ॥ ४९ ॥ जलराशौ निमग्नश्च मुक्तो भवति मानवः ॥ स्वामिभेदे पुत्रभेदे
मित्रभेदेऽतिदारुणे ॥ ५० ॥ स्तोत्रस्मरणमात्रेण वांछितार्थं लभेत सः ॥ कृत्वा हविष्यं वर्षं च स्तोत्रराजं शृणोति यः ॥ ५१ ॥
भक्त्या दुर्गां च संपूज्य महावंध्या प्रसूयते ॥ लभते सा दिव्यपुत्रं ज्ञानिनं चिरजीविनम् ॥ ५२ ॥ असौभाग्या च सौभाग्यं षण्मास
श्रवणाद्व्रजेत् ॥ नवमासं काकवंध्या मृतवत्सा च भक्तितः ॥ ५३ ॥ स्तोत्रराजं या शृणोति सा पुत्रं लभते ध्रुवम् ॥ कन्यामाता
पुत्रहीना पंचमासं शृणोति या ॥ ५४ ॥ घटे संपूज्य दुर्गां च सा पुत्रं लभते ध्रुवम्"॥५५॥इति श्रीपरशुरामप्रोक्तं दुर्गास्तोत्रं समाप्तम् ॥
॥ अथ दुर्गाशतनामात्मकस्तोत्रप्रारंभः ॥ उक्तं च विश्वसारतंत्रे ॥ ईश्वर उवाच ॥ "शतनाम प्रवक्ष्यामि शृणुष्व कमलानने ॥ अस्य
प्रसादमात्रेण दुर्गा प्रीता सदा भवेत् ॥ १ ॥ ॐ सती साध्वी भवा प्रीता भवानी भवमोचिनी ॥ आर्य्या दुर्गा जया आद्या त्रिनेत्रा
शूलधारिणी ॥ २ ॥ पिनाकधारिणी चित्रा चंद्रघंटा महातपा ॥ मनोबुद्धिरहंकारश्चित्तरूपा चिता चितिः ॥ ३ ॥ सर्वमंत्रमयी सत्या
सत्यानंदस्वरूपिणी ॥ अनंता भाविनी भाव्या भवा भव्या सदागतिः ॥ ४ ॥ शंभुपत्नी देवमाता चिंतारत्ना प्रिया सदा ॥ सर्वविद्या

दक्षकन्या दक्षयज्ञविनाशिनी ॥ ५ ॥ अपर्णा चैकपर्णा च पाटला पाटलावती ॥ पट्टांबरपरीधाना कलमंजीररंजिनी ॥ ६ ॥ अमेय विक्रमाक्रूरा सुंदरी कुलसुंदरी ॥ वनदुर्गा च मातंगी मतंगमुनिपूजिता ॥७॥ ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा ॥ चामुंडा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः ॥ ८ ॥ विमलोत्कर्षिणी ज्ञाना क्रिया सत्या च वाक्प्रदा ॥ बहुला बहुलप्रेमा सर्ववाहनवाहना ॥ ९ ॥ निशुंभशुंभहननी महिषासुरमर्दिनी ॥ मधुकैटभहंत्री च चण्डमुण्डविनाशिनी ॥ १० ॥ सर्वासुरविनाशा च सर्वदानवघातिनी ॥ सर्वशास्त्रमयी विद्या सर्वास्त्रधारिणी तथा ॥ ११ ॥ अनेकशस्त्रहस्ता च अनेकास्त्रविधारिणी ॥ कुमारी चैव कन्या च कौमारी युवती यतिः ॥ १२ ॥ अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा ॥ य इदं च पठेत्स्तोत्रं दुर्गानामशताष्टकम्[1] ॥ १३ ॥ नासाध्यं विद्यते देवि त्रिषु लोकेषु पार्वति ॥ धनं धान्यं सुतां जायां हयं हस्तिनमेव च ॥ १४ ॥ चतुर्वर्गं तथा चांते विन्देन्मुक्तिं च शाश्वतीम् ॥ कुमारीः पूजयित्वा च ध्यात्वा देवीं सुरेश्वरीम् ॥ १५ ॥ पूजयेत्परया भक्त्या पठेन्नामशताष्टकम् ॥ तस्य सिद्धिर्भवेद्देवि सर्वैः सुर वरैरपि ॥ १६ ॥ राजानो दासतां यांति राज्यश्रियमवाप्नुयात् ॥ गोरोचनालक्तककुंकुमेन सिंदूरकर्पूरमधुत्रयेण ॥ विलिख्य यंत्रं विधिना विधिज्ञो भवेत्सदा धारणतः पुरारिः ॥ १७ ॥ भौमामायां निशाभागे चंद्रे शतभिषां गते ॥ विलिख्य प्रपठन्स्तोत्रं स भवेत्सं पदां पदम्" ॥१८॥ इति श्रीविश्वसारतंत्रे दुर्गानामशतकं समाप्तम् ॥ अथ मार्कण्डेयपुराणोक्तचंडिकास्तोत्रप्रारंभः ॥ "या देवी खड्गहस्ता सकलजनपदव्यापिनी विश्वदुर्गा श्यामांगी शुक्लपाशा द्विजगणगणिता ब्रह्मदेहार्धवासा ॥ ज्ञानानां साधयित्री यतिगिरिगमनज्ञानदिव्य प्रबोधा सा देवी दिव्यमूर्तिः प्रदहतु दुरितं चंडमुंडा प्रचंडा॥१॥ॐ-ह्रां ह्रीं ह्रूं चर्ममुंडे शवगमनहते भीषणे भीमवक्त्रे क्रां क्रीं क्रूं क्रोधमूर्ति र्विकृतकुचमुखे रौद्रदंष्ट्राकराले ॥ कं कं कंकालधारि भ्रमसि जगदिदं भक्षयंती ग्रसंती हुंकारं चोच्चरंती प्रदहतु० ॥ २ ॥ ॐ-ह्रां ह्रीं ह्रूं रुद्ररूपे त्रिभुवननमिते पाशहस्ते त्रिनेत्रे रां रीं रूं रंगरंगे किलिकिलितरवे शूलहस्ते प्रचंडे ॥ लां लीं लूं लंबजिह्वे हसति कहकहाशुद्ध

---

[1] कवचशताष्टकम् ।

घोराट्टहासे कंकाली कालरात्रिः प्रदहतु० ॥३॥ ॐ—ग्रां ग्रीं ग्रूं घोररूपे घघघघघटितैर्घुर्घुरारावघोरे निर्मांसी शुष्कजंघे पिबतु नरवसाधूम्र
धूम्रायमाने॥ॐ—द्रां द्रीं द्रूं द्रावयंती सकलभुवि तथा यक्षगंधर्वनागान्क्षां क्षीं क्षूं क्षोभयंती प्रदहतु०॥४॥ॐ श्रां श्रीं श्रूं चंडगर्वे हरिहरनमिते
रुद्रमूर्तिश्च कीर्तिश्चंद्रादित्यौ च कर्णौ जडमुकुटशिरोवेष्टिता केतुमाला॥स्रक्सर्वौ चोरगेंद्रौ शशिकिरणनिभा तारकाहारकंठा सा देवी दिव्य
मूर्तिः प्रदहतु० ॥ ५ ॥ ॐ—खं खं खं खड्गहस्ते वरकनकनिभे सूर्यकांते स्वतेजोविद्युज्ज्वालावलीनां नवनिशितमहाकृत्तिका दक्षिणे
च ॥ वामे हस्ते कपालं वरविमलसुरापूरितं धारयंती सा देवी दिव्यमूर्तिः प्र० ॥ ६ ॥ ॐ हुं हुं फट् कालरात्री रु रु सुरमथनी
धूम्रमारी कुमारी ह्रां ह्रीं ह्रूं हत्तिशोरोक्षपितुकिलकिलाशब्द अट्टाट्टहासे ॥ हाहाभूतप्रसूते किलिकिलितमुखा कीलयंती ग्रसंती हुंकारं
चोच्चरंती प्र० ॥[१]७ ॥ ॐ—भृंगी काली कपालीपरिजनसहिते चंडि चामुंडनित्या रों रों रोंकारनित्ये शशिकरधवले कालकूटे दुरंते ॥
हुंहुंहुंकारकारी सुरगणनमिते कालकारी विकारी वश्ये त्रैलोक्यकारी प्र० ॥ ८ ॥ ॐ वंदे दंडप्रचंडा डमरुरुणिमणिष्टोपटंकारघंटैर्नृत्यंती
याट्टपातैरटपटविभवैर्निर्मला मंत्रमाला ॥ सुक्षौ कक्षौ वहंती खरखरितसखाचार्चिनि प्रेतमालामुच्चैस्तैश्चाट्टहासैर्घुरुघुरितरवा चर्म
मुंडा प्रचंडा ॥ ९ ॥ ॐ—त्वं ब्राह्मी त्वं च रौद्रा शवशिखिगमना त्वं च देवी कुमारी त्वं चक्री चक्रहस्ता घुरघुरितरवा त्वं वराह
स्वरूपा ॥ रौद्रे त्वं चर्ममुंडा सकलभुवि परे संस्थिते स्वर्गमार्गे पाताले शैलभृंगे हरिहरनमिते देवि चंडे नमस्ते ॥ १० ॥ ॐ रक्ष त्वं
मुंडधारी गिरिवरविवरे निर्झरे पर्वते वा संग्रामे शत्रुमध्ये विश विश भविके संकटे कुत्सिते वा ॥ व्याघ्रे चौरे च सर्पेऽप्युदधिभुवि तथा
वह्निमध्ये च दुर्गे रक्षेत्सा दिव्यमूर्तिः प्रदहतु दुरितं चंडमुंडा प्रचंडा ॥ ११ ॥ इत्येवं बीजमंत्रैः स्तवनमतिशिवं पातकव्याधिनाशं
प्रत्यक्षं दिव्यरूपं ग्रहगणमथनं मर्दनं शाकिनीनाम् ॥ इत्येवं वेगवेगं सकलभयहरं मंत्रशक्तिश्च नित्यं मंत्राणां स्तोत्रकं यः पठति स
लभते प्रार्थितां मंत्रसिद्धिम् " ॥ १२ ॥ इति श्रीमार्कंडेयविरचितं चंडिकास्तोत्रं समाप्तम् ॥ अथ मार्कंडेयप्रोक्तलघुदुर्गासप्तशती

१ दीर्घ आर्षः ।

स्तोत्रप्रारंभः॥"ॐ–वीं वीं वीं वेणुहस्ते स्तुतिविधवटुके हां तथा तानमाता स्वानंदे नंदरूपे अविहतनिरुते भक्तिदे मुक्तिदे त्वम्॥हंसः सोह विशाले वलयगतिहसे सिद्धिदे वाममार्गे ह्रीं ह्रीं ह्रीं सिद्धलोके कष कष विपुले वीरभद्रे नमस्ते॥१॥ॐ–ह्रींकारं चोच्चरंती मम हरतु भयं चर्ममुंडे प्रचंडे खां खां खां खड्गपाणे ध्रकध्रकध्रकिते उग्ररूपे स्वरूपे॥ हुंहुंहुंकारनादे गगनभुवि तथा व्यापिनी व्योमरूपे हंहंहंकारनादे सुरगणनमिते राक्षसानां निहंत्रि ॥२॥ ऐं लोके कीर्तयंती मम हरतु भयं चंडरूपे नमस्ते घ्रां घ्रां घ्रां घोररूपे घघघघघटिते घर्घरे घोर रावे ॥ निर्मांसे काकजंघे घसितनखनखाधम्रनेत्रे त्रिनेत्रे हस्ताब्जे शूलमुंडे कलकुलकुकुले श्रीमहेशी नमस्ते ॥ ३ ॥ क्रीं क्रीं क्रीं ऐं कुमारी कुहकुहमखिले कोकिले मानुरागे मुद्रासंज्ञत्रिरेखां कुरु कुरु सततं श्रीमहामारि गुह्ये॥तेजोंगे सिद्धिनाथे मनुपवनचले नैव आज्ञा निधाने ऐंकारे रात्रिमध्ये शयितपशुजने तंत्रकांते नमस्ते ॥ ४ ॥ ॐ–व्रां व्रीं व्रुं व्रूं कवित्ये दहनपुरगते रुक्मरूपेण चक्रे त्रिः शक्त्या युक्तवर्णादिककरनमिते दादिवंपूर्ववर्णे ॥ ह्रींस्थाने कामराजे ज्वल ज्वल ज्वलिते कोशितैस्तास्तुपत्रे स्वच्छंदं कष्टनाशे सुरवरवपुषे गुह्य मुंडे नमस्ते ॥ ५ ॥ ॐ–घ्रां घ्रीं घ्रूं घोरतुंडे घघघघघघघे घर्घरान्यांघ्रिघोषे ह्रीं क्रीं द्रं द्रौं च चक्रे र र र र रमिते सर्वबोधप्रधाने ॥ द्रीं तीर्थे द्रीं तज्येष्ठे जुगजुगजजुगे म्लेच्छदे कालमुंडे सर्वांगे रक्तघोरामथनकरवरे वज्रदंडे नमस्ते ॥ ६ ॥ ॐ–क्रां क्रीं क्रूं वाम भित्ते गगनगडगडे गुह्ययोन्याहिमुंडे वज्रांगे वज्रहस्ते सुरपतिवरदे मत्तमातंगरूढे ॥ सूतेजे शुद्धदेहे ललललललिते छेदिते पाशजाले कुंडल्याकाररूपे वृषवृषभहरे ऐंद्रि मातर्नमस्ते ॥ ७ ॥ ॐ–हुंहुंहुंकारनादे कषकषवसिनी मांसि वैतालहस्ते सुंसिद्धर्षैः सुसिद्धिर्ढढढ ढढढः सर्वभक्षी प्रचंडी ॥ जूं सः सौं शांतिकर्मे मृतमृतनिगडे निःसमे सीसमुद्रे देवि त्वं साधकानां भवभयहरणे भद्रकाली नमस्ते ॥ ८ ॥ ॐ देवि त्वं तुर्यहस्ते करधृतपरिघे त्वं वराहस्वरूपे त्वं चेंद्री त्वं कुबेरी त्वमसि च जननी त्वं पुराणी महेंद्री ॥ ऐं ह्रीं ह्रीं कारभूते अतलतलतले भूतले स्वर्गमार्गे पाताले शैलभृंगे हरिहरभुवने सिद्धिचंडी नमस्ते ॥ ९ ॥ हंसि त्वं शौंडदुःखं शमितभवभये सर्वविघ्नांतकार्ये गांगींगूंगैंषडंगे गगनगटितटे सिद्धिदे सिद्धिसाध्ये ॥ क्रूंक्रूंमुद्रागजांशो गसपवनगते त्र्यक्षरे वै कराले

 ॐ ह्रीं ह्रूं गां गणेशी गजमुखजननी त्वं गणेशी नमस्ते " ॥ १० ॥ इति मार्कण्डेयकृतलघुसप्तशतीदुर्गास्तोत्रं समाप्तम् ॥
 अथ रुद्रचंडीपाठः ॥ उक्तं च रुद्रयामले ॥ श्रीशंकर उवाच ॥ "चंडिकाहृदयं न्यस्य शरणं यः करोत्यपि ॥ अनंतफलमाप्नोति
देवीचंडीप्रसादतः ॥ घोरचंडी महाचंडी चंडमुंडविखंडिनी ॥ १ ॥ चतुर्वक्त्रा महावीर्या महादेवविभूषिता ॥ रक्तदंता
वरारोहा महिषासुरमर्दिनी ॥ तारिणी जननी दुर्गा चंडिका चंडविक्रमा ॥ २ ॥ गुह्यकाली जगद्धात्री चंडी च यामलोद्भवा ॥
श्मशानवासिनी देवी घोरचंडी भयानका ॥ ३ ॥ शिवा घोरा रुद्रचंडी महेशी गणभूषिता ॥ जाह्नवी परमा कृष्णा महात्रिपुरसुंदरी
॥ ४ ॥ श्रीविद्या परमाविद्या चंडिका वैरिमर्दिनी ॥ दुर्गा दुर्गशिवा घोरा चंडहस्ता प्रचंडिका ॥ ५ ॥ माहेशी बगला देवी भैरवी
चंडविक्रमा ॥ प्रमथैर्भूषिता कृष्णा चामुंडा मुंडमर्दिनी ॥ ६ ॥ रणखंडा चंद्रघंटा रणे रामवरप्रदा ॥ मारणी भद्रकाली च शिवा घोरा
भयानका ॥७॥ विष्णुप्रिया महामाया नंदगोपगृहोद्भवा ॥ मंगला जननी चंडी महाक्रुद्धा भयंकरी ॥ ८ ॥ विमला भैरवी निद्रा जाति
रूपा मनोहरा ॥ तृष्णा निद्रा क्षुधा माया शक्तिर्मायामनोहरा ॥९॥ तस्यै देव्यै नमो या वै सर्वरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै
नमस्तस्यै नमो नमः ॥ १० ॥ इमां चंडीं जगद्धात्रीं ब्राह्मणस्तु सदा पठेत् ॥ नान्यस्तु संपठेद्देवि पठने ब्रह्महा भवेत् ॥ ११ ॥
यः शृणोति धरायां च मुच्यते सर्वपातकैः ॥ ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम् ॥१२॥ श्वश्रूगमनपापं च कन्यागमनपातकम् ॥
तत्सर्वं पातकं दुर्गे मातुर्गमनपातकम् ॥ १३ ॥ सुतस्त्रीगमनं चैव यद्यत्पापं प्रजायते ॥ परदारकृतं पापं तत्क्षणादेव नश्यति ॥ १४ ॥ जन्म
जन्मांतरात्पापाद्गुरुहत्यादिपातकात् ॥ मुच्यते मुच्यते देवि गुरुपत्नीप्रसंगमात् ॥१५ ॥मनसा वचसा पापं यत्पापं ब्रह्महिंसने ॥ मिथ्याजन्यं
च यत्पापं तत्पापं नश्यति क्षणात् ॥ १६ ॥ श्रवणं पठनं चैव यः करोति धरातले ॥ स धन्यश्च कृतार्थश्च राजा राजाधिपो भवेत्
॥ १७ ॥ रविवारे यदा चंडीं पठेदागमसंमताम् ॥ नवावृत्तिफलं तस्य जायते नात्र संशयः ॥ १८ ॥ सोमवारे यदा चंडीं पठेद्यस्तु
सभाहितः ॥ सहस्रावृत्तिपाठस्य फलं जानीहि सुव्रत ॥ १९ ॥ कुजवारे जगद्धात्रीं पठेदागमसंमताम् ॥ शतावृत्तिफलं तस्य बुधे

लक्षफलं ध्रुवम् ॥ २० ॥ गुरौ यदि महामाये लक्षयुग्मफलं ध्रुवम् ॥ शुक्रे देवि जगद्धात्रि चंडीपाठेन शांकरी ॥ २१ ॥ ज्ञेयं तुल्यफलं दुर्गे यदि चंडीसमाहितः ॥ शनिवारे जगद्धात्रि कोटयावृत्तिफलं ध्रुवम् ॥ २२ ॥ अत एव महेशानि यो वै चंडीं समभ्य सेत् ॥ स सद्यश्च कृतार्थः स्याद्राजराजाधिपो भवेत् ॥२३॥ आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रवालकम् ॥ पठनाच्छ्रवणाच्चैव जायते नात्र संशयः ॥ २४ ॥ धनं धान्यं प्रवालं च वस्त्रं रत्नविभूषणम् ॥ चंडीश्रवणमात्रेण कुर्यात्सर्वं महेश्वरी ॥ २५ ॥ यः करिष्यत्यवि ज्ञाय रुद्रयामलचंडिकाम् ॥ पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत् ॥ २६ ॥ अश्रद्धया च कुर्वंति ते च पातकिनो नराः ॥ रौरवं नरकं कुंडं कृमिकुंडं मलस्य वै ॥ २७ ॥ शुक्रस्य कुंडं स्त्रीकुंडं यांति ते ह्यचिरेण वै ॥ ततः पितृगणैः सार्धं विष्ठायां जायते कृमिः ॥ २८ ॥ शृणु देवि महामाये चंडीपाठं करोति यः ॥ गंगायां चैव यत्पुण्यं काश्यां विश्वेश्वराग्रतः ॥ २९ ॥ प्रयागे मुंडने चैव हरिद्वारे हरे गृहे ॥ तस्य पुण्यं भवेद्देवि सत्यं दुर्गे रमे शिवे ॥ ३० ॥ त्रिगयायां त्रिकाश्यां वै यच्च पुण्यं समुत्थितम् ॥ तच्च पुण्यं तच्च पुण्यं तच्च पुण्यं न संशयः ॥ ३१ ॥ अन्यच्च—महाचंडी शिवा घोरा भया भीमा भयानका ॥ कांचनी कमला विद्या महारोगविमर्दिनी ॥ ३२ ॥ गुह्यचंडी घोरचंडी चंडी त्रैलोक्यदुर्लभा ॥ देवानां दुर्लभा चंडी रुद्रयामलसंमता ॥ ३३ ॥ अप्रकाश्या महादेवी प्रिया रावण मर्दिनी ॥ मत्स्यप्रिया मांसरता मत्स्यमांसबलिप्रिया ॥ ३४ ॥ मदमत्ता महानित्या भूतप्रमथसंगता ॥ महाभागा महारामा धान्यदा धनरत्नदा ॥ ३५ ॥ वस्त्रदा मणिराज्यादिसदाविषयवर्धिनी ॥ मुक्तिदा सर्वदा चंडी महापत्तिविनाशिनी ॥ ३६ ॥ इमां हि चंडीं पठते मनुष्यः शृणोति भक्त्या परमां शिवस्य ॥ चण्डीं धरण्यामतिपुण्ययुक्तां स वै न गच्छेत्परमंदिरं किम् ॥ ३७ ॥ जप्यं मनोरथं दुर्गे तनोति धरणीतले ॥ रुद्रचंडीप्रसादेन किं न सिध्यति भूतले ॥ ३८ ॥ अन्यच्च—रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा ॥ रुद्र शक्ती रुद्ररूपा रुद्राननसमन्विता ॥ १ ॥ शिवचंडी महाचंडी शिवप्रेतगणान्विता ॥ भैरवी परमा विद्या महाविद्या च षोडशी ॥ २ ॥ सुंदरी परमा पूज्या महात्रिपुरसुंदरी ॥ गुह्यकाली भद्रकाली महाकालविमर्दिनी ॥ ३ ॥ कृष्णा तृष्णास्वरूपा सा जगन्मोहनकारिणी ॥

अतिमात्रा महालज्जा सर्वमंगलदायिनी ॥ ४ ॥ घोरतंद्री भीमरूपा भीमा देवी मनोहरा ॥ मंगला बगला सिद्धिदायिनी सर्वदा शिवा ॥५॥ स्मृतिरूपा कीर्तिरूपा योगीन्द्रैरपि सेविता ॥ भयानका महादेवी भयदुःखविनाशिनी ॥ ६ ॥ चंडिका शक्तिहस्ता च कौमारी सर्वकामदा॥ वाराही च वराहास्या इन्द्राणी शक्रपूजिता ॥ ७ ॥ माहेश्वरी महेशस्य महेशगणभूषिता ॥ चामुंडा नारसिंही च नृसिंहरिपुमर्दिनी ॥८॥ सर्वशत्रुप्रशमनी सर्वारोग्यप्रदायिनी ॥ इति सत्यं महादेवि सत्यं सत्यं वदाम्यहम् ॥९॥ नैव शोको नैव रोगो नैव दुःखं भयं तथा ॥ आरोग्यं मंगलं नित्यं करोति शुभमंगलम् ॥ १० ॥ महेशानि वरारोहे ब्रवीमि सदिदं वचः ॥ अभक्ताय न दातव्यं मम प्राणाधिकं शुभम् ॥ ११ ॥ तव भक्त्या प्रशांताय शिवविष्णुप्रियाय च ॥ दद्यात्कदाचिद्देवेशि सत्यं सत्यं महेश्वरि ॥ १२ ॥ अनंतफलमाप्नोति शिवचंडीप्रसादतः ॥ अश्वमेधं वाजपेयं राजसूयशतानि च ॥ १३ ॥ तुष्टाश्च पितरो देवास्तथा च सर्वदेवताः ॥ दुर्गेयं मृन्मयी ज्ञानं रुद्रयामलपुस्तकम् ॥ १४ ॥ मन्त्रमक्षरसंज्ञानां करोत्यपि नराधमः ॥ अत एव महेशानि किं वक्ष्ये तव सन्निधौ ॥ १५ ॥ लंबोदराधिकश्चंडीपठनाच्छ्रवणात्तु यः॥ तत्त्वमस्यादिवाक्येन मुक्तिमाप्नोति दुर्लभाम्” ॥ १६ ॥ इति श्रीरुद्रयामले देवीश्वरसंवादे रुद्रचंडी समाप्ता ॥

“इदं पंचांगमखिलं श्रीदुर्गाया रहस्यकम् ॥ सर्वसिद्धिप्रदं गुह्यं सर्वाशापरिपूरकम् ॥ गुह्यं मन्त्ररहस्यं तु तव भक्त्या प्रकाशितम् ॥ अभक्ताय न दातव्यमित्याज्ञा पारमेश्वरी ॥” ॥ २ ॥ इति श्रीमन्त्रमहार्णवे मध्यखण्डे श्रीदुर्गातन्त्रे द्वितीयस्तरंगः ॥ २ ॥